CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मयूखः

चारमयू

प्रिंटिंग प्रेस—मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

...n. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus...

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री ५ को सरकार
वाल्मीकि संस्कृत महाविद्यालय

घ·ज्ञा·पु·आ·५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki

CC-0. In Public Domain. Digitization by eGangotri. Funding: MoE

ACHAR आचार

पृष्ठ

तत्रोपवा

विशेषे दि

SHRI NILAKANTH BH

EDITED BY

MAHADEVA GANGADHARA BHATTA BAKRE

विक्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MDP

आचा

पृष्ठ

चरणम्	१	तत्रोपव
न्तदेववंशः	,,	समयविशेषे दि
प्रयोजनम्	(द्वितीयः)	पवादः
दशमय		

बाक्रे इत्युपाह्वगंगाधरभट्टसुतमहादेवशर्मणा

संशोधितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MHRD

आचा...

पृष्ठे

...चरणम् १ | तत्रोपव...
...न्तदेववंशः ,, | समयविशेषे दि...
...प्रयोजनम् (द्वितीयः) ...पवादः
...शमय...

...वाके इत्युपाह्वगंगाधरभट्टसुतमहादेवशर्मणा

संशोधितः ।

...म देसाई इत्यनेन

प्रकाशितः ।

Printed and Published by Manilâl Itchârâm Desâi ;
THE GUJARATI PRINTING PRESS
No. 8, Sassoon Buildings, Circle, Fort,
BOMBAY

V. S. 1971 A. D. 1915

Price Annas Eight

Rs - 2 P 0 0

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus. Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

आचा...

पृष्ठ

...चरणम् १ | तत्रोपवी...
...न्तदेववंशः ,, | समयविशेषे दि...
...प्रयोजनम् ... मपवाद...
(द्वितीयः) ...फलं

बाक्रे इत्युपाह्वगंगाधरभट्टसुतमहादेवशर्मणा
संशोधितः ।

मुंबय्याम्

फोर्टाख्यविभागे नवमे सासूनभवने मणिलाल इच्छाराम देसाई इत्यनेन
स्वीये 'गुजराती' मुद्रणालये मुद्रयित्वा तत्रैव प्रकाशितः ।

विक्रमसंवत् १९७१ क्रिस्ताब्दः १९१५

मूल्यमष्टावाणकाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आचा...

विषयः	पृष्ठ
मङ्गलाचरणम्	१
भगवन्तदेववंशः	,,
ग्रन्थप्रयोजनम्	२
द्वादशमयूखनामानि	,,
परिभाषा ।	,,
कर्म दक्षिणहस्तेन कार्यम्	,,
कर्मकाले कस्यां दिशि मुखं कार्यम्	,,
कर्मण्यवस्थानम्	३
कर्ता स्नातोपवीती बद्धशिखः स्यात्	,,
ज्ञातच्छन्दर्षिविनियोगः स्यात्	,,
प्रणवव्याहृतिपूर्वः कर्मारम्भः	,,
न्यायार्जितधनः स्यात्	,,
ज्ञानस्य सर्वकर्माङ्गत्वम्	,,
प्रौढपादः कर्म न कुर्यात्	,,
अपोपस्पर्शकारणानि अश्राव्यशब्दाश्च	४
कर्मणां संकल्पपूर्वकत्वम् ...	,,
कर्मणो ब्रह्मण्याधानम्	,,
देवादय उक्त एवानुसर्तव्या न चरितेषु	,,
उपवासव्रतैवानुष्ठेयानि तदपवादश्च	,,
प्रबोधः ।	,,
सुप्तोत्थानकालः	,,
ब्राह्ममुहूर्तलक्षणं तत्र कर्तव्यं च	,,
ब्राह्मे स्वप्तुः प्रायश्चित्तम् ...	५
सूर्योदयास्ते स्वप्तुः प्रायश्चित्तम् ...	,,
प्रातः स्मरणीयानि	५–८
भूप्रार्थना	९
प्रथमदृष्टिपथागतानां फलम् ...	,,
मूत्रपुरीषोत्सर्गः ।	,,
कस्यां दिशि कस्यन्तरे मलमूत्रोत्सर्गः कार्यः	,,
तत्रोपवी...	
समयविशेषे दि...	
दिङ्मुखादीनामपवादः ...	
केषु कर्मसु मौनिना भाव्यं तत्फलं च	१...
मूत्राद्युत्सर्गसमयस्पृष्टजलपाने प्रायश्चित्तम्	,,
उपवीतिनोत्सर्गे कृते तदुपवीतं त्यक्त्वाऽन्यद्धार्यम्... ...	,,
शौचविधिः ।	,,
गन्धलेपक्षयान्तं मृज्जलैः शौचं कार्यम्	१...
शौचं कृत्वा कथमुत्तिष्ठेत् ...	,,
शौचमृत्तिका कुतो ग्राह्या ...	,,
स्वदेशस्थमेव मृज्जलादि प्रशस्यते	,,
उद्धृतजलेनैव शौचं कार्यं न तीर्थे	,,
शौचं कृत्वा तीर्थाशोधनेऽशुचिर्भवति	,,
शौचार्थमृत्तिकापरिमाणम् ...	,,
मूत्राच्छुक्रे द्विगुणं मैथुने च त्रिगुणं शौचम्	,,
अपानादिशौचे मृतिकासंख्या ...	,,
ब्रह्मचार्यादीनां शौचे विशेषः ...	१...
अनुपनीतानां स्त्रीणां च शौचप्रमाणम्	,,
स्त्रीशूद्रार्तानां शौचप्रमाणम् ...	,,
देशकालविशेषेण शौचं कल्प्य...	,,
नाभेरुपरि दक्षिणेनाधश्च स... स्तेन शो...ं कार्यम् ...	...
धारायां शौचकरणनिषेधः ...	
मूत्रशौचमकृत्वा भोक्तुः प्रा...श्चित्तम्	
भोजनसमये गुदस्रावे प्रा...श्चित्तम्	
शौचकरणफलम् ...	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

आचार...

विषयः पृष्ठ

मङ्गलाचरणम् १
भगवन्तदेववंशः ,,
ग्रन्थप्रयोजनम् २
द्वादशमयूखनामानि ,,

परिभाषा। ,,

कर्म दक्षिणहस्तेन कार्यम् ,,
कर्मकाले कस्यां दिशि मुखं कार्यम् ,,
कर्मण्यवस्थानम् ३
कर्ता स्नातोपवीती बद्धशिखः स्यात् ,,
ज्ञातच्छन्दर्षिविनियोगः स्यात् ,,
प्रणवव्याहृतिपूर्वः कर्मारम्भः ,,
न्यायार्जितधनः स्यात् ,,
ज्ञानस्य सर्वकर्माङ्गत्वम् ,,
प्रौढपादः कर्म न कुर्यात् ,,
अपोपस्पर्शकारणानि अश्राव्यशब्दाश्च ४
कर्मणां संकल्पपूर्वकत्वम् ... ,,
कर्मणो ब्रह्मण्याधानम् ... ... ,,
देवादय उक्त एवानुसर्तव्या न चरितेषु ... ... ,,
उपवासव्रतेवानुष्ठेयानि तदपवादश्च ,,

प्रबोधः। ,,

सुप्तोत्थानकालः ... ... ,,
ब्राह्ममुहूर्तलक्षणं तत्र कर्तव्यं च ,,
ब्राह्मे स्वप्तुः प्रायश्चित्तम् ... ५
सूर्योदयास्ते स्वप्तुः प्रायश्चित्तम् ... ,,
प्रातः स्मरणीयानि ५–८
भूप्रार्थना ९
प्रथमदृष्टिपथागतानां फलम् ... ,,

मूत्रपुरीषोत्सर्गः। ,,

कस्यां दिशि कस्यन्तरे मलमूत्रोत्सर्गः कार्यः ... ... ,,
तत्रोपवी...
समयविशेषे दि...
दिङ्मुखादीनामपवादः ...
केषु कर्मसु मौनिना भाव्यं तत्फलं च ११
मूत्राद्युत्सर्गसमयस्पृष्टजलपाने प्रायश्चित्तम् ... ... ,,
उपवीतिनोत्सर्गे कृते तदुपवीतं त्यक्त्वाऽन्यद्धार्यम्... ... ,,

शौचविधिः। ,,

गन्धलेपक्षयान्तं मृज्जलैः शौचं कार्यम् १२
शौचं कृत्वा कथमुत्तिष्ठेत् ... ,,
शौचमृत्तिका कुतो ग्राह्या ... ,,
स्वदेशस्थमेव मृज्जलादि प्रशस्यते ,,
उद्धृतजलेनैव शौचं कार्यं न तीर्थे ,,
शौचं कृत्वा तीर्थाशोधनेऽशुचिर्भवति ,,
शौचार्थमृत्तिकापरिमाणम् ... ,,
मूत्राच्छुक्रे द्विगुणं मैथुने च त्रिगुणं शौचम् ... ... ,,
अपानादिशौचे मृतिकासंख्या ... ,,
ब्रह्मचार्यादीनां शौचे विशेषः ... १३
अनुपनीतानां स्त्रीणां च शौचप्रमाणम् ,,
स्त्रीशूद्रार्तानां शौचप्रमाणम् ... ,,
देशकालविशेषेण शौचं कल्प्य... ,,
नाभेरुपरि दक्षिणेनाधश्च स... ,,
...तेन शौ...ं कार्यम् ... १०
धारायां शौचकरणनिषेधः ...
मूत्रशौचमकृत्वा भोक्तुः ...श्चित्तम्
भोजनसमये गुदस्रावे प्रा...श्चित्तम्
शौचकरणफलम् ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठाङ्कः

,,
शौचः ,,
... ... ,,
रकीयादिमूत्रादिस्पर्शे मृत्संख्या १५
नाभेरधःखानां तथोत्सन्नमलानामेवाशुचित्वम् ... ... ,,
यथोक्तशौचाकरणे प्रायश्चितम्... ,,
तदपवादाभासानां निरासः ... ,,

आचमनम् । ,,

वैधाचमनम् ... ... ,,
नैमित्तिकाचमनम् १६
सकृदाचमनम्... ... ... १७
द्विराचमनम् १८
आचमननिमित्तापवादः ... ,,
उच्छिष्टतापवादः १९

आचमनविधिः । २०

आचमनीयपात्राणि ... ... ,,
स्त्रीशूद्रयोः सकृदेवेति नियमनम् ,,
ब्राह्मादितीर्थनामलक्षणानि ... ,,
आचमनसमये हस्तद्वये दर्भावश्यकत्वम् २१
आचमनसमयेऽवस्थाननियमः ... ,,
आचमने निषिद्धजलानि ... ,,
निषिद्धचेष्टा ... २२
शुचिकराणि ... ,,
त्राकरणीय ण्डूष- ... ... ,,
गीयजल णम् ... २३
करद ोकर्णसंस्थानत्वम् ,,
णम् ... ... ,,

शतिनाम्नामाचमने विनियोगविभागः । २४
आचमनप्रतिनिधिः ... ... ,,

दन्तधावनम् । २५

दन्तकाष्ठभक्षणविधिः ... ... ,,
दन्तकाष्ठभक्षणे वर्ज्यदिनानि ... ,,
काष्ठभक्षणनिषिद्धदिने कथं धावनं कर्तव्यम् २६
दन्तकाष्ठप्रमाणम् २७
दन्तकाष्ठार्थं विहितवृक्षाः ... ,,
वृक्षविशेषेषु फलविशेषाः ... २८
दन्तकाष्ठे निषिद्धवृक्षा... ... २९
अन्यच्च दन्तधावने निषिद्धम् ... ,,
दन्तधावने दिङ्मुखविशेषतः फलविशेषाः ३०
दन्तधावनमन्त्रः ... ... ,,
दन्तधावने द्रष्टव्या निषिद्धदर्शनाश्च ,,

पवित्रविधिः । ,,

कुशानां प्रशस्तिः ३१
सप्तविधं बर्हिः ... ... ,,
दर्भग्रहणविधिः ... ... ,,
पवित्रलक्षणम् ... ... ,,
पवित्रेषु दर्भसंख्या ... ... ,,
पवित्रके हेम्न एव मुख्यत्वम् ... ,,
सुवर्णादीनां धारणाङ्गुलिनिर्देशः ३२
जीवत्पितृकेणाधार्याणि... ... ,,
दारिद्र्यनाशिनी मुद्रा ... ... ,,
विजयदा मुद्रा... ... ... ,,
मारणोच्चारणादिषु सिद्धिकरी मुद्रा ३३
नवरत्नमुद्रा ... ... ,,
वशीकरणमुद्रा ... ... ,,

अथ स्नानम् । ३४

प्रातःस्नानप्रशस्तिः ... ... ,,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding :MIDF

विषयः

स्नानस्य गुणदशकनिर्देशः ... ,,
स्नानीयपुण्यतोयानि ... ... ,,
स्नानसंकल्पः ३५
लघुकल्पः ... ... ,,
स्नानाङ्गतर्पणकल्पः ३६
तोयदूषणहारि यक्ष्मतर्पणम् ... ,,
नदीक्षमापणम्... ... ... ,,
ब्राह्मणादिषु विहितवस्त्राणि ... ३७
सापवादः कौशेयनिषेधः ... ,,
परिधानाद्बहिःकक्षाबन्धननिषेधः ,,
आर्द्रवस्त्रमूर्ध्वमेवोत्तारयितव्यम् ,,
एकवस्त्रनिषेधः... ... ... ,,
धौतनिष्पीडितस्य स्कन्धे निक्षेपनिषेधः ... ... ,,
वस्त्रस्य त्रिगुणनिष्पीडननिषेधः ,,
एकवस्त्रलक्षणम् ३८
उपवीतद्वयस्य वैधत्वं त्रिचतुर्णामपि प्रयोजनम् ... ... ,,
यतिब्रह्मचारिणां जङ्घाशोधनम्... ,,
वस्त्रनिष्पीडनविधिः ... ... ,,
निवीतिना विधेयानि ... ... ,,
समन्त्रकामन्त्रकस्नानस्याधिकारिविभागः ३९
एकद्वित्रिकालस्नानस्याधिकारिविभागः ... ... ,,
गृह्योक्तः स्नानकल्पः ... ... ,,
शौनकोक्तः ४०

अथ काम्यस्नानम् ,,

पुलस्त्योक्तम् ... ... ,,
मात्स्योक्तम् ४१
आदित्यपुराणोक्तम् ... ... ,,
मार्कण्डेयोक्तम् ... ... ,,
आदि[illegible]
समु[illegible]
समुद्रस्नानकालः

नैमित्तिकस्नानम्। ,,

अस्पृश्याः ... ... ,,
देवलकलक्षणम् ४३
अस्पृश्यत्वापवादः ... ... ,,
स्नाने निषिद्धकालः ४४
रात्रिस्नाने विशेषः ... ... ,,
नैमित्तिकस्नाने कल्पतर्पणादिनिषेधः ,,
स्नाने शीतोष्णजलयोर्विषयविभागः ,,

मलापकर्षस्नानम्। ,,

अभ्यङ्गे वर्ज्यास्तिथयः... ... ,,
वारविशेषेऽभ्यङ्गफलम्... ... ,,
गन्धतैलादीनां निषेधाविषयत्वम् ४५
कातीयानां मध्याह्नस्नाने कल्पविशेषः ,,

अथ गौणस्नानम्। ४७

स्नानप्रतिनिधयः ... ... ,,
गायत्र्यादिस्नानलक्षणानि ... ४८
गौणस्नानपूतस्य कर्मविशेषेऽर्हत्वानर्हत्वम् ... ... ,,

अथ तिलकम्। ,,

तिलकयोग्यमृत्तिकाः ४९
तिलकधारणमन्त्राः ... ... ,,
स्थानविशेषेण पुण्ड्राकारविशेषाः ,,
पुण्ड्रप्रमाणानि ५०
अङ्कनस्य वेदमार्गबाह्यत्वम् ...
कालविशेषे तिलकेषु विशेषाः...
मृद्भस्मनोरूर्ध्वतिर्यक्पुण्ड्रनियमन[illegible]
भस्मधारणाङ्गनिर्देशः ... .

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...	,,	मुख्यमन्त्राणामर्थनिर्देशः ...	,,
... ...	५२	**काम्यजपाः।**	,,
... ...	,,	**होमविधिः।**	६४
अथ संध्यावन्दनम्।	,,	स्वयमेव होतव्यम्	,,
संध्याया नित्यत्वम्	,,	अशक्तौ कैर्याजयति	,,
आदित्यस्यैव गायत्रीत्वादि ...	५३	तैरपि दम्पत्योरन्यतरस्य वा समक्षमेव	६५
गायत्र्यादीनां रूपदेवतादि ...	,,	प्रातर्होमकालः...	,,
गायत्रीनिरुक्तिः	५४	सायंहोमकालः	,,
गायत्रीचिन्तनफलम्	,,	आपत्सु पाक्षिको होमः ...	,,
संध्याकालः।	,,	नित्यदानम्	६६
गौणमुख्यकालाः	,,	मङ्गलदर्शनम्	,,
वर्णविशेषेपूक्ताः कालविशेषाः	,,	अष्टधाविभक्तस्याह्नो द्वितीयभाग-कृत्यम्	,,
देशविशेषेषु फलविशेषाः ...	,,		
संध्याप्रयोगः।	५५	तृतीयभागकृत्यम्	,,
आचमनम्	,,	पोष्यवर्गः	६७
मार्जनम्	,,	प्रतिग्रहविचारः	,,
संध्योपास्तौ जलधारणपात्राणि...	,,	चतुर्थभागकृत्यम्	,,
मन्त्राचमनम्	५६	पञ्चमहायज्ञाः	६८
तत्र प्रातर्मध्यसायाह्निको विशेषः	,,	वैश्वदेवः	,,
मार्जनचतुष्टयम्	५७	स च सायं प्रातः द्विरावृत्त्या प्रातरेव वा	६९
पापनिरसनम्	,,		
अर्घ्यदानम्	५८	पञ्चयज्ञानकृत्वा भोक्तुश्चान्द्रायण प्रायश्चित्तम्...	,,
गायत्रीजपः।	५९		
तत्रावस्थानं कालविशेषेण भिन्नम्	,,	सापवादं पञ्चयज्ञानां नित्यत्वम्	७०
जपसंख्या	६०	वैश्वदेवप्रतिनिधिः	,,
उक्तासनानि	,,	वैश्वदेवे वर्ज्यान्नानि	,,
...न्दर्षिविनियोगादि	,,	प्रक्सतुः पञ्चयज्ञानामन्येनापि विधेयत्वम्...	७१
...योत्तममध्यमाधमत्वम् ...	,,		
...ोदनस्यावश्यकत्वम् ...	,,	पञ्चयज्ञानामनुष्ठानक्रमः ...	,,
... ...	६१	तर्पणम्	७२
... ...	,,	तस्य नित्यत्वम्	७३

पृष्ठाङ्कः

...कादिषु कर्तव्यः संध्याविधिः ६२

...ादीनामलाभे कार्यो विधिः ६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

विषयः पृ०

तर्पणे पात्रकुशतिलादीना विचारः ७४
तर्पणे पितृक्रमः ७५
संक्षिप्ततर्पणम् ७६
वस्त्रनिष्पीडनविधिः ... ... ,,
भीष्मतर्पणम् ७७
यमतर्पणम् ... ... ,,
तर्पणे तिलनिषेधः सप्रतिप्रसवः ७८

देवपूजा .. ७९

पूज्यदेवतानिर्देशः ... ... ,,
देवतानां युगपरतो वैशिष्ट्यम् ... ,,
पञ्चायतनस्थापनप्रकारः ... ८०
पञ्चदेवानां पूजाक्रमः ८१
पुष्पाद्यानयनं स्वयमेव कुर्यात ... ८२
सद्यो निर्माल्यकरणानि ... ,,
पर्युषितदोषप्रसरणावधिः ... ,,
सर्वदेवदेयपुष्पाणि ... ... ,,
देवताविशेषतो विहितानि निषिद्धानि च पुष्पाणि ... ,,
पूजायतनानि ८७
शालग्रामशिलाया नामलक्षणभेदाः ८८
एकमूर्तिपूजानिषेधः ... ... ,,
स्त्रीशूद्रस्य शालग्रामादिषु स्वयंपूजानिषेधः ... ... ,,
विष्णोः पूजाकल्पः ... ८९–९०
प्रतिमादिषु नित्यस्नापननिषेधः ९१
भूषणादीनां निर्माल्यत्वाभावः... ,,
महादेवपरिचर्याकल्पः ... ९२
तीर्थप्रसाददग्रहणनिर्णयः ... ९३
भस्मरुद्राक्षयोर्धारणावश्यकत्वम्
पार्थिवपूजा ९८
लिङ्गद्रव्यविशेषतः फलविशेषा ९९

...
शालग्रामशि...
शालग्रामदानफलम् ...
दुष्टशिलाः ... ...
गुरुगजा ... ... ,,

अथ वैश्वदेवः । ... ,,

पञ्चसूनानिर्देशः ... ... ,,
वैश्वदेवकल्पः १०४
भूतयज्ञकल्पः ... ... ,,
पितृयज्ञः ... ... ,,
गृहबलिः १०६
मनुष्ययज्ञः ... ... ,,
कात्यायनीयानां वैश्वदेवानुष्ठानप्रयोगः १०७

अथ भोजनम् । १०८

भोजने उक्तनिषिद्धपात्राणि ... १०९
पात्रधारणविधिः ... ... ,,
भोजनाङ्गबलिदानम् ... ... ,,
प्राणाहुतिविधिः ११०
मुन्यादिषु भोजनपरिमाणम् ... ,,
भोजनस्य कालद्वयनियमनम् ... १११
मौनक्रियाः ... ... ,,
दर्व्या रिवेषणीयानि... ... ११२
निषिद्धदर्वीपरिवेषाणि ... ... ,,
यैर्दृष्टं भोजनं निषिध्यते ते ... ,,
एकपङ्क्त्युपविष्टैः सहैवारम्भपसमाप्तिः कार्येति ... ,,
पङ्क्तिमध्यादुत्तिष्ठतो दोषः ... ,,
भोजने नियमविशेषाः ... ११३
निषिद्धदुग्धाः ...ः ११४
भोजने निषिद्धाः शब्दाः ... ,,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठाङ्कः

...धिः ११८
...कादिषु ...त्रिसूक्तजपः ... ... ,,
...शूद्रीनाम् ...
... ,,
...भागधेयेभ्यो
...र्दुवि निर्वापः, तन्मन्त्रश्च... ,,
तर्जन्या वक्त्रधावननिषेधः ... ,,
ताम्बूलसेवनम् ११६

भोजनोत्तरकृत्यानि। ,,

अष्टधाविभक्तस्याह्नः षष्ठसप्तमाष्टमानां लोकयात्रायां विनियोगः ... ,,
दीपकालः ... ... ,,
संपूर्णरात्रौ दीपस्थापनेन दारिद्र्यनाशः ... ... ,,
दीपस्य दिङ्मुखविशेषस्थापने फलविशेषः ... ... ,,
सायंसंध्यावन्दनं तद्विशेषश्च ... ,,
...प्रायश्चित्तम्... ११७

व्यतीतपूर्वरात्रे रतिमन्दिरगमनम् ,,
तत्र स्त्रीकृत्यम्... ... ... ,,
रतिः ... ... ,,
रतौ वर्ज्यावर्ज्यानि ११९
रतिशौचम् ... ... ,,
सुखशायिनो देवाः ... ... ,,
स्थलविशेषतो शिरःस्थापनेदिग्विशेषः ... ... ,,
स्वापे निषिद्धस्थलानि... ... १२०
उक्ताचारे हि मुक्तिदा परितुष्टिः १२१

स्वप्नफलानि। ,,

सामान्यतः इष्टफलस्वप्नाः... ,,
सामान्यतः अनिष्टफलाः स्वप्नाः ,,
विशे... इष्टफलाः स्वप्नाः ... १२२
...त अनिष्टफलाः स्वप्नाः... १२३
...रिष्टानि १२४
...दुःस्वप्नशान्तिः ... ... ,,

आच...
मार्जन...
संध्योपास्तौ जलधारणपात्राणि...
मन्त्र...सायंहोमकालः... ... ...५६
तत्र...
मार्जन...
...निरस...
...नम्
...का

इत्याचारमयूखविषयानुक्रमः।

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

॥ श्रीम...

आचार...

द्वितीयः २.

मङ्गलाचरणम् ।

पादौ दिवाकरस्याहमवलम्बे मुहुर्मुहुः ।
यत्पादालम्भितं पद्मं पद्माऽऽरोहति संप्रति ॥ १ ॥

[जंज्ञे पितामहतनोः खलु कश्यपो य-
स्तस्माद्जायत मुनिस्तु विभाण्डकाख्यः ।
तं पुत्रिणां धुरमरोपयदृष्यशृङ्ग-
स्तस्यान्वयेऽप्यजनि शृङ्गिवराभिधानः ॥ २ ॥

तस्मिन्वंशे महति वितते संगराख्ये नृपाणां
राजा कर्णः समजनि यथा सागरे शीतरश्मिः ।
कीर्त्या यस्य प्रथिततरया श्रोत्रपात्रेऽभिपूर्णे
कर्णस्यापि प्रविततकथा नावकाशं लभन्ते ॥ ३ ॥

विशोकाख्यदेवस्ततस्तत्सुतोऽभूद्विशोकीकृता येन सर्वा धरित्री ।
ततोऽप्यास राजाऽस्तशत्रुस्ततोऽभूद्रयाख्यो रयेणैव सर्वाहितघ्नः ॥४॥

वभूवाथ वैराटराजस्ततोऽभून्नृपो मेदिनीवल्लभो वीढराजः ।
नरब्रह्मदेवस्ततो मन्युदेवस्ततोऽभून्नृपश्चन्द्रपालाभिधानः ॥ ५ ॥

शिवगणाख्यनृपः समजन्यथो शिवगणाख्यपुरं प्रचकार यः ।
शिवगणेन समः सकलैर्गुणैः शिवशिवप्रथमो गणनासु यः ॥ ६ ॥

रोलिचन्द्र इति तत्तनयोऽभूत्कर्मसेननृपतिस्तमथानु ।
लोकपो नरहरिर्नृपराजो रामचन्द्र इति तत्तनुजातः ॥ ७ ॥

यशोदेवस्ततो जातस्ताराचन्द्रनृपस्ततः ।
चक्रसेनस्ततो राजा राजसिंहनृपो यतः ॥ ८ ॥

ततोऽप्यभूद्भूपतिसाहिदेवः स्वकीर्तिभिर्निर्जितदुग्धसिन्धुः ।
अभूत्ततः श्रीभगवन्तदेवः सदैव भाग्योदयवान्क्षितीशः ॥ ९ ॥

१ एतच्चिह्नान्तर्गताः श्लोकाः क. पुस्तके न दृश्यन्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या

यत्र पुंसां गतिः ।

कादिषु ... भिर्वर्धित-

... थहुतभुक्तुल्यः कथं नो भवेत् ॥ १० ॥

... विबुधकुलमणिर्दाक्षिणात्यावतंसो

भट्ट श्रीनीलकण्ठः स्मृतिषु दृढमतिर्जैमिनीयेऽद्वितीयः ।

अथ ... आज्ञामादाय मूर्ध्ना सविनयममुना तस्य सर्वान्निबन्धा-

न्दृष्ट्वा सम्यग्विविच्य प्रविततकिरणस्तन्यते भास्करोऽज्यम् ॥

संस्काराचारकालाः समुचितरचनाः श्राद्धनीती विवादो

दानोत्सर्गप्रतिष्ठा जगति जयकराः संगतार्थानुबद्धाः ।

प्रायश्चित्तं विशुद्धिस्तदनु निगदिता शान्तिरेवं क्रमेण

ख्याता ग्रन्थेऽत्र शुद्धे बुधजनसुखदा द्वादशैते मयूखाः ॥ १२ ॥

भगवन्तभास्कराख्ये ग्रन्थेऽस्मिन्शिष्टसंमते च ततः ।

आचारविधिमयूखः प्रतन्यते नीलकण्ठेन ॥ १३ ॥]

श्रुतीः स्मृतीर्वीक्ष्य पुराणजातं तत्तान्निबन्धानपि सन्निबन्धान् ॥

चिरन्तनाचारचयं च बध्नात्यथाह्निकं संप्रति नीलकण्ठः ॥ १४ ॥

प्रतारकैरादृतमत्र किंचिन्मया तु निर्मूलतया तदुज्झितम् ।

ऊनोक्तिताऽतो नहि तेन किंचित्खपुष्पहीनाऽपचितिर्न हीयते ॥ १५ ॥

समूलनिर्मूलमपि व्यवस्थां विनादृतं यद्विषयस्य कैरपि ।

नानौषधैस्तद्गुणिगापणस्थैर्भिषग्वरानुक्तगुणैः समं मतम् ॥ १६ ॥

तत्र परिभाषा ।

कर्मप्रदीपे—यत्रोपदिश्यते कर्म कर्तुरङ्गं न तूच्यते ।

दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः ॥

यत्र दिङ्नियमो न स्याज्जपहोमादिकर्मसु ।

तिस्रस्तत्र दिशः प्रोक्ता ऐन्द्री सौम्याऽपराजिता ॥

तिथितत्त्वे गौतमः—

रात्रावुदङ्मुखः कुर्याद्दैवं कार्यं सदैव हि ।

शिवार्चनं सदाऽप्येवं शुचिः कुर्यादुदङ्मुखः ॥

सदा दिवारात्रौ च । तत्रैव तन्त्रान्तरे—

यत्रैव भानुस्तु वियत्युदेति प्राचीं तु तां वेदविदो वदन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोऽपरां पूजकपूज्ये...

अत्र पूज्यपूजकान्तः प्राची ...
मुक्तत्वात् । अन्यत्र तु सूर्योदयोप...

छन्दोगपरिशिष्टे—

आसीन ऊर्ध्वः प्रह्वो वा नियमो यत्र ...
तदासीनेन कर्तव्यं न प्रह्वेण न तिष्ठता ॥

उपवीतशिखाबन्धनयोः पुरुषार्थत्वं क्रत्वर्थत्वं चोक्तं तत्रैव—

सदोपवीतिना भाव्यं सदा बद्धशिखेन च ।
विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् ॥

मार्कण्डेयपुराणे—

शिरःस्नातश्च कुर्वीत दैवं पित्र्यमथापि वा ।

धर्मप्रकाशे योगयाज्ञवल्क्यः—

आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव च ।
वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः ॥
अविदित्वा तु यः कुर्याद्याजनाध्यापनं जपम् ।
होममन्तर्जलादीनि तस्य चाल्पफलं भवेत् ॥

तत्रैवापस्तम्बः—

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥
त्रिमात्रस्तु प्रयोक्तव्यः कर्मारम्भेषु सर्वशः ।
तिस्रः सार्धाश्च कर्तव्या मात्रास्तत्त्वार्थचिन्तकैः ॥

बुधः—'न्यायागतेन द्रव्येण कर्माणि कुर्यात्' इति । ज्ञानस्य क्रत्वर्थत्वं छान्दोग्योपनिषदि 'यदेव विद्यया करोति श्रद्धया तदेव वीर्यवत्तरं भवति' इति उद्गीथोपासनाप्रकरणाधीतेनाप्यनेन यथा ज्ञानस्य सर्वकर्माङ्गत्वं भवति तथा निरणायि मयाऽध्ययनवादे ।

शाट्यायनिः—

दानमाचमनं होमं भोजनं देवतार्चनम् ।
प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणम् ॥
आसनारूढपादो वा जान्वोर्वा जङ्घयोस्तथा ।
कृतावसक्थिको यस्तु प्रौढपादः स उच्यते ॥

---

१ योगं त॰ क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

...अवेक्षणे ।
...कादिषु ...ऽनृतभाषणे ॥
...ादीनां ...ष्टि क्रोधसंभवे ।
,, ...सर्वत्र कर्म कुर्वन्नपः स्पृशेत् ॥
...चं तैलयन्त्रेषु शब्दो यावत्प्रवर्तते ।
...तावत्कर्म न कर्तव्यं शूद्रान्त्यपतितस्य च ॥

अथ ...

मार्कण्डेयः—

संकल्पं च यथा कुर्यात्स्नानदानव्रतादिके ।
अन्यथा पुण्यकर्माणि निष्फलानि भवन्ति च ॥

यथा यथावदित्यर्थः ।

ब्राह्मे—ब्रह्मण्याधाय कर्माणि निःसङ्गः कामवर्जितः ।
प्रसन्नेनैव मनसा कुर्वाणो याति तत्पदम् ॥

'यत्करोषि' इति गीताऽपि कर्मणामीश्वरप्रीत्यर्थत्वे प्रमाणम् ।

हारीतः—अनुष्ठितं तु यद्देवैर्मुनिभिर्यदनुष्ठितम् ।
नानुष्ठेयं मनुष्यैस्तु तदुक्तं कर्म आचरेत् ॥

वराहपुराणे—

स्नानं संध्यातर्पणादि जपहोमामरार्चनम् ।
उपवासवता कार्यं सायंसंध्याहुतीर्विना ॥

चतुर्विंशतिमते—

इक्षूनपः फलं मूलं ताम्बूलं पय औषधम् ।
भक्षयित्वाऽपि कर्तव्याः स्नानदानादिकाः क्रियाः ॥

॥ इति परिभाषा ॥

अथ प्रबोधः ।

मनुः—

प्रबोधः ।

ब्राह्मे मुहूर्ते चोत्थाय धर्मार्थावनुचिन्तयेत् ।
कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव च ॥

वेदतत्त्वार्थ ईश्वरः 'ध्यायीत परमेश्वरम्' इति कूर्मपुराणात् । 'न्यायप्रतीतोऽर्थः' इति श्रीदत्तः । ब्राह्मो मुहूर्तो रात्रेरुपान्त्यो मुहूर्तः । तथा च प्रयोगपारिजाते पुराणे रात्रिगतमुहूर्तपञ्चदशकं प्रक्रम्य—

---

१ बुध्यते ख. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्राह्मो नाभस्वतश्च
रात्रेस्तु पश्चिमो याम
इति पितामहोक्तस्तु वेदाभ्यासार्थ. ।
अत्र निद्रायां प्रायश्चित्तं स्मृतिरत्नावल्याम्–
ब्राह्मे मुहूर्ते या निद्रा सा पुण्यक्षयकारिणी ।
तां करोति द्विजो मोहात्पादकृच्छ्रेण शुध्यति ॥
शौनकः—अस्तं गच्छति तिग्मांशावव्याधिगत एव यः ।
प्रभाते निद्रितस्य प्रायश्चितम् । स्वपेत्स वाग्यतः स्थित्वा समस्तामपि तां निशाम् ॥
प्रातः स्नात्वा शुचिर्भूत्वा 'येन सूर्यादि' पञ्चभिः ।
ऋग्भिर्देवमुपस्थाय सवितारं विशुध्यति ॥
सूर्योदये स्वपेत्सोऽपि पूर्ववत्सकलं दिनम् ।
वाचंयमो भवेत्स्थित्वा चास्तं यातं दिवाकरम् ॥
ऋग्भिस्तु "यस्य ते विश्वे" त्यादिभिः पञ्च पूर्वकाः ।
उत्तराभिश्चतसृभिरुपतिष्ठेत शुद्धये ॥

अत्र स्मरणीयमाह व्यासः—
महर्षिर्भगवान्व्यासः कृत्वेमां संहितां पुरा ।
श्लोकैश्चतुर्भिर्धर्मात्मा पुत्रमध्यापयच्छुकम् ॥
मातापितृसहस्राणि पुत्रदारशतानि च ।
संसारेष्वनुभूतानि यान्ति यास्यन्ति चापरे ॥
हर्षस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥
प्रातः स्मरणम् । ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे ।
धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥
न जातु कामान्न भयान्न लोभा-
द्धर्मं त्यजेज्जीवितस्याऽपि हेतोः ।
धर्मो नित्यः सुखदुःखे त्वनित्ये
जीवो नित्यो हेतुरस्य त्वनित्यः ॥
इमां भारतसावित्रीं प्रातरुत्थाय यः पठेत् ।
स भारतफलं प्राप्य परं ब्रह्माधिगच्छति ॥
स एव—प्रातः स्मरामि भवभीतिमहार्तिशान्त्यै
नारायणं गरुडवाहनमञ्जनाभम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कादिषु ... पत्रनेत्रम् ॥
...ादीनाम् ... सा च मूर्ध्नो
... न्दियुगलं परमस्य पुंसः ।
... यणस्य नरकार्णवतारणस्य
पारायणप्रणवविप्रपरायणस्य ॥
प्रातर्भजामि भजतामभयंकरं तं
प्राक् सर्वजन्मकृतपापभयापहत्यै ।
यो ग्राहवक्रपतिताङ्घ्रिगजेन्द्रघोर-
शोकप्रणाशमकरोद्धृतशङ्खचक्रः ॥
श्लोकत्रयमिदं पुण्यं प्रातः प्रातः पठेन्नरः ।
लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः ॥

सद्धर्मचिन्तामणौ—

प्रातः स्मरामि गणनाथमनाथबन्धुं
सिन्दूरपूर्णपरिशोभितगण्डयुग्मम् ।
उद्दण्डविघ्नपरिखण्डनचण्डदण्ड-
माखण्डलादिसुरनायकवृन्दवन्द्यम् ॥
प्रातर्नमामि चतुराननवन्द्यमान-
मिच्छानुकूलमखिलं च वरं ददानम् ।
तं तुन्दिलं द्विरसनाधिपयज्ञसूत्रं
पुत्रं विलासचतुरं शिवयोः शिवाय ॥
प्रातर्भजाम्यभयदं खलु भक्तशोक-
दावानलं गणविभुं वरकुञ्जरास्यम् ।
अज्ञानकाननविनाशनहव्यवाह-
मुत्साहवर्धनमहं सुतमीश्वरस्य ॥
श्लोकत्रयमिदं पुण्यं सदा साम्राज्यदायकम् ।
प्रातरुत्थाय सततं यः पठेत्प्रयतः पुमान् ॥
स सर्वव्याधिनिर्मुक्तः परं सुखमवाप्नुयात् ॥
प्रातः स्मरामि खलु तत्सवितुर्वरेण्यं
रूपं हि मण्डलमृचो यजुषां निधानम् ।

१ तारकस्येति क. पाठः । २ ऽथ तनुर्यजूंषि ख. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सामानि यस्
ब्रह्माहरात्मकमे
प्रातर्नमामि तरणिं
ब्रह्मेन्द्रपूर्वकसुरैर्नुतमार्चितं
वृष्टिप्रमोचनविनिग्रहहेतुभूतं
त्रैलोक्यपालनपरं त्रिगुणात्मकं च ॥
प्रातर्भजामि सवितारमनन्तशक्तिं
पापौघशत्रुभयरोगहरं परं च ।
तं सर्वलोककलनात्मककालमूर्तिं
गोकण्ठबन्धनविमोचनमादिदेवम् ॥
श्लोकत्रयमिदं भानोः प्रातः प्रातः पठेत्तु यः ।
स सर्वव्याधिनिर्मुक्तः परमं सुखमाप्नुयात् ॥
प्रातः स्मरामि शरदिन्दुकरोज्ज्वलाभां
सद्रत्नवत्सकलकुण्डलहारभूषाम् ।
दिव्यायुधोर्जितसुनीलसहस्रहस्तां
रक्तोत्पलाभचरणां भवतीं परेशाम् ॥
प्रातर्नमामि महिषासुरचण्डमुण्ड-
शुम्भासुरप्रमुखदैत्यविनाशदक्षाम् ।
ब्रह्मेन्द्ररुद्रमुनिमोहन[1]लोलशीलां
चण्डीं समस्तसुरमूर्तिमनेकरूपाम् ॥
प्रातर्भजामि भजतामभिलाषदात्रीं
धात्रीं समस्तजगतां दुरितापहन्त्रीम् ।
संसारबन्धनविमोचनहेतुभूतां
मायां परां समधिगम्य परस्य विष्णोः ॥
श्लोकत्रयमिदं देव्याश्चण्डिकायाः पठेन्नरः ।
सर्वान्कामानवाप्नोति विष्णुलोके महीयते ॥
प्रातः स्मरामि भवभीतिहरं सुरेशं
गङ्गाधरं वृषभवाहनमम्बिकेशम् ।
खट्वाङ्गशूलवरदाभयहस्तमीशं
संसाररोगहरमौषधमद्वितीयम् ॥

---

१ शीललोलामिति क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...धदेहं

...कादिषु ... भादिदेवम् ।

...ादीनाम ... नाभिरामं

... हरमौषधमद्वितीयम् ॥

...मजामि शिवमेकमनन्तमाद्यं

अथ ... वेदान्तवेद्यमनघं पुरुषं महान्तम् ।

नामादिभेदरहितं षड्भावशून्यं

संसाररोगहरमौषधमद्वितीयम् ॥

प्रातः समुत्थाय शिवं विचिन्त्य श्लोकत्रयं येऽनुदिनं पठन्ति ।

ते दुःखजातं बहुजन्मसंचितं हित्वा पदं यान्ति तदेव शंभोः ॥

वामनपुराणे—

ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च ।

गुरुश्च शुक्रः शनिराहुकेतवः कुर्वन्तु सर्वे मम सुप्रभातम् ॥

सनत्कुमारः सनकः सनन्दनः सनातनोऽप्यासुरिपिङ्गलौ च ।

सप्त स्वराः सप्त रसातलानि कुर्वन्तु सर्वे मम सुप्रभातम् ॥

[सप्तार्णवाः सप्त कुलाचलाश्च सप्तर्षयो द्वीपवनानि सप्त ।

भूरादिकृत्वा भुवनानि सप्त कुर्वन्तु सर्वे मम सुप्रभातम् ॥

पृथ्वी सगन्धा सरसास्तथापः स्पर्शी च वायुर्ज्वलनं च तेजः ।

नभः सशब्दं महसा सहैव कुर्वन्तु सर्वे मम सुप्रभातम् ॥

इत्थं प्रभाते परमं पवित्रं पठेत्स्मरेद्वा शृणुयाच्च तद्वत् ।

दुःस्वप्ननाशस्त्विह सुप्रभातं भवेच्च नित्यं भगवत्प्रसादात् ॥

पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः ।

पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः ॥

अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः ।

कृपः परशुरामश्च सप्तैते चिरजीविनः ॥

सप्तैतान्संस्मरेन्नित्यं मार्कण्डेयमथाष्टमम् ।

जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः ॥

अहल्या द्रौपदी सीता तारा मन्दोदरी तथा ।

पञ्चकं ना स्मरेन्नित्यं मानहान्या न बाध्यते ॥

---

१ नित्यमिति ख. पाठः । २ जनार्दनः क. पाठः । ३ युधिष्ठिरः क. पाठः । ४ सोऽपि सर्वव्याधिं इति क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

मदनपारिजाते स्कान्दे—

अविमुक्तचरणयुग

स्मरणमपि वाराण

प्रयोगपारिजाते भूप्रार्थना—

समुद्रवसने देवि पर्वतस्तनमण्डले ।
विष्णुपत्नि नमस्तेऽस्तु पादस्पर्शं क्षमस्व नः ॥

कात्यायनः—

श्रोत्रियं सुभगं गा च अग्निमग्निचितिं तथा ।
प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते ॥
रोचनं चन्दनं गन्धान् मृदङ्गं दर्पणं मणिम् ।
गुरुमग्निं रविं पश्येन्नमस्येत्प्रातरेव हि ॥
पापिष्ठं दुर्भगं चान्यं नग्नमुत्कृत्तनासिकम् ।
प्रातरुत्थाय यः पश्येत्तत्कलेरुपलक्षणम् ॥

नग्नं बालकव्यतिरिक्तमिति नृसिंहः ।

॥ इति प्रबोधविधिः ॥

अथ मूत्रपुरीषोत्सर्गविधिः ।

अङ्गिराः—

उत्थाय पश्चिमे रात्रेस्तत आचम्य चोदकम् ।
अन्तर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा ॥
कुर्यान्मूत्रपुरीषे तु शुचौ देशे समाहितः ॥ इति ।

तृणे विशेषमाह यमः—

अयज्ञियैरनार्द्रैश्च तृणैः संछाद्य मेदिनीम् । इति ।

पराशरः—ततः प्रातः समुत्थाय कुर्याद्विण्मूत्रमेव च ।
नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः ॥
तिरस्कृत्योच्चरेत्काष्ठं पत्रं लोष्ठं तृणानि वा ।
नियम्य प्रयतो वाचं संवीताङ्गोऽवगुण्ठितः ॥ इति ।

तिरस्कृत्यान्तर्धाय । संवीताङ्ग आच्छादितदेहः । उच्चरेत्पुरीषाद्युत्सृजेदित्यर्थः । अवगुण्ठितः प्रावृतशिराः ।

---

१ चारणस्येति ख. पाठः । २ चितमिति ख. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0 JK Public Domain. Digitization by eGangotri.Funding: MIDF

...ध्वा मृद्धानीं ग्रीवायामास-
...कादिषु ... नार्थं शाटीम् ।
...ादीनाम्...
... ...तु कर्णस्थब्रह्मसूत्र उदङ्मुखः ।
... ...मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः ॥

अथ ... कर्ण ... दक्षिणः ।

कर्त्रङ्गानामनुक्तौ तु दक्षिणाङ्गं भवेत्तथा ।

इति स्मृत्यर्थसारोक्तेः । अङ्गिराः—

कृत्वा यज्ञोपवीतं तु पृष्ठतः कण्ठलम्बितम् ।
विण्मूत्रं तु गृही कुर्याद्यद्वा कर्णे समाहितः । इति ।

सांख्यायनः—

'यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा मूत्रपुरीषोत्सर्गं कुर्यात्' इति ।

'पवित्रं दक्षिणे कर्णे कृत्वा विण्मूत्रमुत्सृजेत्'

इति हारीतोक्तेः पवित्रमपि दक्षिणे कर्णे स्थाप्यम् ।

दर्भस्थानान्यपरार्के—

नीवीमध्ये तु ये दर्भा ब्रह्मसूत्रे च ये कृताः ।
पवित्रांस्तान्विजानीयाद्ये च कर्णे च दक्षिणे ॥

अत्र विशेषमाह यमः—

प्रत्यङ्मुखस्तु पूर्वाह्णेऽपराह्णे प्राङ्मुखस्तथा ।
उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुखः ॥

यत्तु पूर्वोक्तयाज्ञवल्कीयसामान्यं तदनेन बाध्यते, तस्य मध्याह्ने निशायां च सावकाशत्वात् । यत्त माधवः—'सदैवोदङ्मुखः कुर्यात्' इति देवलवाक्यस्थसदाशब्दात् प्राङ्मुखप्रत्यङ्मुखशब्दौ सूर्यानभिमुखपराविति तच्चिन्त्यं सदाशब्दस्यावश्यकत्वबोधकत्वेनाप्युपपत्तेः । यदपि देवणभट्टः याज्ञवल्क्ययमवाक्यार्थयोर्विकल्पमाह तदपि चिन्त्यम्, सामान्यविशेषशास्त्रयोर्विकल्पायोगात् ।

यत्तु देवलः—

विण्मूत्रमाचरेन्नित्यं संध्यासु परिवर्जयेत् । इति
तन्निरुद्धेतरविषयमिति माधवः ।

मनुः— छायायामन्धकारे च रात्रावहनि वा द्विजः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथासुखमुखः ...

रात्रौ तु गृहेऽपि कुर्यात्। ते ...

दाराचावसथाद्वा मूत्रपुरीषयोः कर्म ...

मदनरत्ने हारीतः—

उच्चारे मैथुने चैव प्रस्रावे दन्तधावने।
श्राद्धे भोजनकाले च षट्सु मौनं समाचरेत्॥

उच्चारः पुरीषोत्सर्गः। प्रस्रावो मूत्रोत्सर्गः।

आचारप्रदीपे अङ्गिराः—

संध्ययोरुभयोर्जाप्ये भोजने दन्तधावने।
पितृकार्ये च दैवे च तथा मूत्रपुरीषयोः॥
गुरूणां संनिधौ दाने योगे चैव विशेषतः।
एषु मौनं समातिष्ठन्स्वर्गं प्राप्नोति मानवः॥

स एव—

आहारं तु रहः कुर्याद्विहारं चैव सर्वदा।
गुप्ताभ्यां लक्ष्म्युपेतः स्यात्प्रकाशे हीयते श्रिया॥

आपस्तम्बश्च—'नच सोपानत्को मूत्रपुरीषे कुर्यात्' इति।

सायणीये—

करस्थोदकपात्रश्च कुर्यान्मूत्रपुरीषके।
तज्जलं मूत्रसदृशं सुरापानेन तत्समम्॥

प्रयोगपारिजाते—

गृहीत्वा जलपात्रं तु विण्मूत्रं कुरुते यदि।
तज्जलं मूत्रसदृशं पीत्वा चान्द्रायणं चरेत्॥
मलमूत्रं त्यजेद्विप्रो विस्मृत्योपवीतधृक्।
उपवीतं तदुत्सृज्य गृह्यादन्यन्नवं तदा॥ इति।

॥ इति मूत्रपुरीषोत्सर्गविधिः॥

अथ शौचम्।

भरद्वाजः—

अथापकृष्य विण्मूत्रे लोष्ठकाष्ठतृणादिना।
उदस्तवासा उत्तिष्ठेद्दृढं विधृतमेहनः॥

---

१ क. नास्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कादिषु ... रभ्युद्धृतैर्जलैः ।
...दीनां ... र्यादतन्द्रितः ॥
... प्र: कूलात्ससिकतां तथा । इति ।
... तडागेषु नाहरेद्ग्राह्यमृत्तिकाम् ।
... आहरेज्जलमध्यात्तु परतो मणिबन्धनात् ॥

अथ ... एतदारण्यकविषयम् । तथा च स्मृतिचिन्तामणौ—

अन्तर्जलगता ग्राह्या परतो मणिबन्धनात् ।
आरण्यकेषु त्वेवं स्याद्ग्राम्येष्वाचरणं न तु ॥

मनुः— यस्मिन्देशे तु यत्तोयं या च यत्रैव मृत्तिका ।
सैव तत्र प्रशस्ता स्यात्तया शौचं विधीयते ॥

माथुलः—तीर्थे शौचं न कुर्वीत कुर्वीतोद्धृतवारिणा ।
रत्निमात्रं जलं त्यक्त्वा कुर्याच्छौचमनुद्धृते ।
पश्चात्तच्छोधयेत्तीर्थं त्वन्यथा त्वशुचिर्भवेत् ॥

आह विवस्वान्—
अक्षमात्रप्रमाणास्तु लिङ्गशौचे मृदः स्मृताः ।

दक्षोऽपि—लिङ्गे तु मृत्समाख्याता त्रिपर्वा पूर्यते यया ।

शौनकः—आर्द्रामलकमात्रा वा मूत्रशौचे तु मृत्तिका । इति ।

अङ्गिराः—प्रथमा प्रसृतिर्ज्ञेया द्वितीया च तदर्धिका ।
तृतीया मृत्तिका ज्ञेया त्रिभागकरपूरणी ॥ इति ।

वसिष्ठः—एका लिङ्गे करे तिस्र उभयोर्मृत्तिकाद्वयम् ।
मूत्रशौचं समाख्यातं शुक्रे तु द्विगुणं भवेत् ॥

शौनकः—मूत्रात्तु द्विगुणं शुक्रे मैथुने त्रिगुणं भवेत् ।

विट्शौचे मृत्संख्यामाह दक्षः—
तिस्रोऽपाने दशैकस्मिन्नुभयोः सप्त मृत्तिकाः ।

यत्तु वसिष्ठः—
पञ्चापाने दशैकस्मिन्नुभयोः सप्त मृतिकाः । इति ।

यदपि यमः—
द्वे लिङ्गे मृतिके देये गुदे पञ्च करे दश ।
उभयोः सप्त दातव्याः पुनरेका गुदे तथा ॥ इति ।
तत्–अर्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीया च तृ...

इति विष्णूक्तालपपरिमाणाभिप्रा...

यदपि शङ्खः—

मेहने मृत्तिकाः सप्त लिङ्गे ...

शौचे मृद्ग्रहण-संख्या। एकस्मिन्विंशतिर्हस्ते द्वयोर्ज्ञेयाश्चतुर्दश...

तिस्रस्तु मृत्तिका ज्ञेयाः कृत्वा तु नखशोधनम्...

तिस्रस्तु पादयोर्देयाः शौचकामस्य नित्यशः ॥

एतच्छौचं गृहस्थानां तथा गुरुनिवासिनाम् ।

द्विगुणं स्याद्वनस्थानां यतीनां त्रिगुणं भवेत् ॥ इति ।

तदपि पूर्वोक्तालपपरिमाणलेपबाहुल्ययोः समुच्चये ज्ञेयम् ।

दक्षः— षट्कृत्वो नखशुद्धौ तु देयाः शौचेप्सुना मृदः ।

मनुः— एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् ।

त्रिगुणं तु वनस्थानां यतीनां तु चतुर्गुणम् ॥

पितामहः—

न यावदुपनीयन्ते द्विजाः शुद्धास्तथाऽङ्गनाः ।

गन्धलेपक्षयकरं शौचमेषां विधीयते ॥

आदित्यपुराणेऽपि—

स्त्रीशूद्रयोरर्धमानं शौचं प्रोक्तं मनीषिभिः ।

दिवाशौचस्य निश्यर्धं पथि पादो विधीयते ।

आर्तः कुर्याद्यथाशक्ति शक्तः कुर्याद्यथोदितम् ॥

वृद्धपाराशरः—

उपविष्टश्च विण्मूत्रं कर्तुं यस्तु न विन्दति ।

स कुर्यादर्धशौचं तु स्वस्य शौचस्य सर्वदा ॥ इति ।

बौधायनः—

देशं कालं तथाऽऽत्मानं द्रव्यं द्रव्यप्रयोजनम् ।

उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत् ॥ इति ।

मनुः— यावन्नापैत्यमेध्याक्तो गन्धो लेपश्च तत्कृतः ।

तावन्मृद्वारि चादेयं सर्वासु द्रव्यशुद्धिषु ॥

आश्वलायनः—

लिङ्गशौचं पुरा कार्यं गुदशौचं ततः परम् ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

... न योजयेत् ।
...कादिषु ... भिरूर्ध्वं न शोधयेत् ॥
...गदीनां ...द्रात्रौ चेदक्षिणामुखः ॥ इति ।
...प्र:
...शौचं न कर्तव्यं शौचशुद्धिमभीप्सुना ।
...चुलकेनैव कर्तव्यं हस्तशुद्धिविधानतः ॥

अथ ...

अङ्गिराः—मूत्रोत्सर्गं द्विजः कृत्वा न कुर्याच्छौचमात्मनः ।
मोहाद्भुङ्क्ते त्रिरात्रेण जलं पीत्वा विशुध्यति ॥

अत्र भोजनस्थाने जलपानम् ।

भुञ्जानस्य गुदस्रावे वृहस्पतिः—
पूर्वं कृत्वा च शौचं तु ततः पश्चादुपस्पृशेत् ।
ततः कृत्वोपवासं च पञ्चगव्येन शुध्यति ॥

शौचस्य क्रत्वर्थत्वं पुरुषार्थत्वं चाह दक्षः—
शौचे यत्नः सदा कार्यः शौचमूलो यतो द्विजः ।
शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः ॥

अथ शारीरमलशौचम् ।

मनुः— वसा शुक्रमसृङ् मज्जा मूत्रं विट्कर्णविण्नखाः ।
श्लेष्माश्रु दूषिका स्वेदो द्वादशैते नृणां मलाः ॥

दूषिका नेत्रमलम् ।
विण्मूत्रोत्सर्गशुद्ध्यर्थं मृद्वार्यादेयमर्थवत् ।
दैहिकानां मलानां च शुद्धिषु द्वादशस्वपि ॥

वौधायनः—
आददीत मृदः पञ्च षट्सु पूर्वेषु शुद्धये ।
उत्तरेषु तु षट्स्वद्भिः केवलाभिर्विशुध्यति ॥ इति ।

परकीयस्पर्शे देवलः—
मानुषास्थि वसा विष्ठा आर्तवं मूत्ररेतसी ।
मज्जानं शोणितं वाऽपि परस्य यदि संस्पृशेत् ॥
स्नात्वाऽपमृज्य चैलादीनाचम्य स शुचिर्भवेत् ।
तान्येव स्वानि संस्पृश्य पुनः स्यात्परिमार्जनम् ॥

विशेषमाह विष्णुः—'नाभेरधस्तात्प्रवाहुषु च कायिकैर्मलैः सुराभिर्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्यैर्वोपहतो मृत्तोयैस्तदङ्गं ...
प्रक्षाल्य स्नानेन इन्द्रियेपूपहतेपूप...

मनुः— मूत्रे तिस्रः पादयोस्तु ...
मृदः पञ्चदशामेध्ये हस्ताद ...
एतदात्मीयमूत्रादिसंस्पर्शन उदाहृतम् ...
परस्य शोणितस्पर्शे रेतोविण्मूत्रजे तथा ।
चतुर्णामपि वर्णानां द्वात्रिंशन्मृत्तिकाः स्मृताः ॥

स एव— ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्वशः ।
यान्यधस्तादमेध्यानि देहाच्चैव मलाश्च्युताः ॥

यथोक्तशौचाकरणे प्रायश्चित्तमुक्तं स्मृतिरत्नावल्याम्—
गायत्र्यष्टशतं चैव प्राणायामत्रयं तथा ॥ इति ।

यत्तु व्यासः—
अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ इति ।

तद्यथोक्तशौचे कृतेऽप्यात्मसंतोषाभावे द्रष्टव्यम् ।

॥ इति शारीरमलशौचम् ॥

अथाचमनम् ।

मनुः—

आचमननिमित्तानि । कृत्वा मूत्रं पुरीषं वा खान्याचान्त उपस्पृशेत् ।
वेदमध्येष्यमाणश्च अन्नमश्नंश्च सर्वदा ॥ इति ।

आपस्तम्बः—'मूत्रपुरीषान्नलेपान्नशेषलेपा रेतसश्च यो लेपस्तान्प्रक्षाल्य पादौ चाचम्य प्रयतो भवति'

आचमनान्तरे देवलः—
रेतोमूत्रशकृन्मोक्षे भोजने च परिश्रमे ।
उच्छिष्टं मानवं स्पृष्ट्वा भोज्यं चापि तथाविधम् ॥

आचामेदिति शेषः ।

बृहस्पतिः—
अधोवायुसमुत्सर्गे आक्रन्दे क्रोधसंभवे ।
मार्जारमूषकस्पर्शे प्रहासेऽनृतभाषणे ।

---

१ पीत्वा योऽध्ये' क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...नुपस्पृशेत् ॥
...कादिषु ... इति । स्मृत्यर्थसारे ।
...गदीनां ...
... वर्णं धीवरं नटमेव च ।
...दृष्ट्वा नरो मोहादाचामेत्प्रयतोऽपि सन् ॥
अथ ... चण्डालम्लेच्छसंभाषे स्त्रीशूद्रोच्छिष्टभाषणे ।
उच्छिष्टं पुरुषं स्पृष्ट्वा भोज्यं चापि तथाविधम् ॥
आचामेदश्रुपाते च लोहितस्य तथैव च ।
अग्नेर्गवामथालम्भे स्पृष्ट्वा प्रयतमेव वा ॥
स्त्रीणामथात्मनः स्पर्शे नीवीं वा परिधाय च ॥ इति ।

आपस्तम्वः—'स्वप्ने क्षवथौ सिंघाणिकायाश्चालम्भे लोहितस्य केशानामग्नेर्गवां ब्राह्मणस्य स्त्रियाश्चालम्भे महापथं गत्वाऽमेध्यं चोपस्पृश्याप्रयतं च मनुष्यं नीवीं परिधायाऽप उपस्पृशेद् आर्द्रं वा शकृदोषधीर्भूमिं वा' क्षवथुः क्षुतम् । सिङ्घाणिका नासामलम् । आर्द्रमिति शकृदादिभिः संवध्यते । शकृद्गोमयम् ।

यमः— उत्तीर्योदकमाचम्य अवतीर्य तथैव च ।

दक्षः— स्नानादनन्तरं तावदुपस्पर्शनमिष्यते ।

प्रजापतिः—

उपक्रमे विशिष्टस्य कर्मणः प्रयतोऽपि सन् ।

आचामेदिति शेषः ।

वसिष्ठः—कृत्वा चावश्यकार्याणि आचामेच्छौचवित्तमः ।

मार्कण्डेयपुराणे—

देवार्चनादिकार्याणि तथा गुर्वभिवादनम् ।
कुर्वीत सम्यगाचम्य तद्वदेव भुजिक्रियाम् ॥

हरीतः—'देवतामभिगन्तुकाम आचामेत्'

शातातपः—

आचामेच्चर्वणे नित्यं मुक्त्वा ताम्बूलचर्वणम् ।
ओष्ठौ विलोमकौ स्पृष्ट्वा वासो विपरिधाय च ॥

॥ इत्याचमननिमित्तानि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बृहस्पतिः—

सकृदाचमन-निमित्तानि।

प्रचरन्नन्नपानेषु यदा।...

भूमौ निधाय तद्द्रव्यम...

निधाय त्यक्त्वा।

तैजसविषये कौर्मे—

तैजसं वै समादाय यद्युच्छिष्टो भवेद्द्विजः।
भूमौ निक्षिप्य तद्द्रव्यमाचम्याभ्युक्षयेत्तु तत्॥ इति।

यत्तु हेमाद्रिः—'परिवेषणं कुर्वन्नुच्छिष्टस्पृष्टस्तदन्नपानादिकं भूमौ निधायाचम्य तदभ्युक्ष्य पुनस्तदादाय प्रचरेत्' इत्याह। तन्न, अत्र भूमौ निधानमात्रस्योक्तेः पुनरादाने मानाभावात्।

यत्तु मनुः—

उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचन।
अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात्॥ इति।

तल्लघुवस्तुविषयमिति मेधातिथिः। निधानायोग्यवस्त्रादिविषयमिति चन्द्रिकायाम्। तदेतच्चिन्त्यम्।

यद्यमत्रं समादाय भवेदुच्छेषणान्वितः।
अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात्॥
वस्त्रादिषु विकल्पः स्यात्तत्स्पृष्ट्वा चैव मेव हि।

इति कौर्मवाक्यादेव व्यवस्थोक्तेः। काष्ठपात्रे विशेषमाह निधानं प्रकृत्य बौधायनः—'एतदेव विपरीतममत्रे वानस्पत्ये विकल्पः'

पक्वान्नमादाय मूत्रादिकरणे विशेषमाह मार्कण्डेयः—

पक्वान्नेन गृहीतेन मूत्रोच्चारं करोति यः।
अनिधायैव तद्द्रव्यमङ्के कृत्वा समाश्रितम्।
शौचं कृत्वा यथान्यायमुपस्पृश्य यथाविधि।
अन्नमभ्युक्षयेच्चैव उद्धृत्यार्कस्य दर्शयेत्
त्यक्त्वाग्रमात्रं वा तस्माच्छेवं शुद्धिमवाप्नुयात्॥

यत्तु श्लोकापस्तम्बः—

भूमौ निक्षिप्य तद्द्रव्यं शौचं कृत्वा यथाविधि।
उत्सङ्गापन्नपक्वान्न उपस्पृश्य ततः शुचिः॥ इति।

तदशक्तविषयम् (?)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...कुले पथि ।
...स्तो न दुष्यति ॥

...कादिषु ...
...दीनां ...
... दृष्टौ तत्स्पृष्टान्नस्य त्यागः । अन्नाधारे ...स्पृष्टे च त्याग एव । रजकादिस्पृष्टे जलेनाप्र... ...क्षेत् ' । इति सकृदाचमननिमित्तानि ।

अथ द्विराचमननिमित्तान्याह आपस्तम्बः—

द्विराचमननिमित्तानि ।

स्नात्वा पीत्वा क्षुते सुप्ते भुक्ते रथ्योपसर्पणे ।
आचान्तः पुनराचामेद्वासो विपरिधाय च ॥

व्यासः— दाने भोजनकाले च संध्ययोरुभयोरपि ।
आचान्तः पुनराचामेज्जपहोमार्चनेषु च ॥

पैठीनसिः—'कृतमूत्रपुरीषः पश्चनखाख्यस्नेहं स्पृष्ट्वा आचान्तः पुनराचामेच्चण्डालम्लेच्छसंभाषणे च'

कौर्मे— ओष्ठौ विलोमकौ स्पृष्ट्वा वासो विपरिधाय च ।
रेतोमूत्रपुरीषाणामुत्सर्गेऽशुद्धभाषणे ॥
ष्ठीवित्वाऽध्ययनारम्भे कासश्वासागमे तथा ।
चत्वरं वा स्मशानं वा समागम्य द्विजोत्तमः ।
संध्ययोरुभयोस्तद्वदाचान्तोऽप्याचमेत्पुनः ॥

बौधायनः—

भोजने हवने दाने उपहारे प्रतिग्रहे ।
हविर्भक्षणकाले च तद्विराचमनं स्मृतम् ॥

शङ्खः— स्नानभोजनकालेष्वाचान्तः पुनराचमेत् ॥

पैठीनसिः—'कलिलकासश्वासागमने रथ्याचत्वरस्मशानाक्रान्तेष्वाचान्तः पुनराचामेत् '

आचमनापवादमाह याज्ञवल्क्यः[1]—

आचमनापवादः ।

मुखजा विप्रुषो मेध्यास्तथाचमनविन्दवः ।
श्मश्रु चास्यगतं दन्तसक्तं त्यक्त्वा ततः शुचिः ॥

विप्रुषोऽङ्गेऽनुपलभ्यमानाः ।
नोच्छिष्टं कुर्वते मुख्या विप्रुषोऽङ्गं न यान्ति याः ।

---

१ याज्ञवल्क्यः क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति बोधायनोक्तेः ।

स्मृत्यर्थसारे—

वेदाभ्यासे मुखाज्जाते ...

दन्तसक्तस्य निगरणमाह स एव—

परिच्युतेष्ववस्थानान्निगिरन्नेव तच्छुचिः ।

निगरणत्यागयोर्विकल्प इति हेमाद्रिः—

चर्वणे त्वाचामेत् । तथाचाचमनं प्रकृत्य 'चर्वणे नित्यम्' इति विष्णूक्तेः । बलात्प्रच्याविते तु देवल आह——

भोजने दन्तलग्नानि निर्हृत्याचमनं चरेत् ।

दन्तलग्नस्य जिह्वास्पर्शे रसोपलब्धौ चाशुचित्वम् । अन्यथा शुचित्वम् 'दन्तवद्दन्तलग्नेषु रसवर्जमन्यत्र जिह्वास्पर्शनातः' इति शङ्खोक्तेः । गौतमस्त्वन्यथाऽऽह——'दन्तश्लिष्टेषु दन्तवदन्यत्र जिह्वाभिस्पर्शनात्प्राक्च्युतेरित्येके' । किंच दन्तलग्नमपि अपहार्यम् ।

दन्तलग्नमसंहार्यं लेपं मन्येत दन्तवत् ।
न तत्र बहुशः कुर्याद्यत्नमुद्धरणे पुनः ।
भवेदाशौचमत्यर्थं तृणवेधाद्व्रणे कृते ।। इति देवलोक्तेः ।

षट्त्रिंशन्मते—

ताम्बूले च फले चैव भुक्तस्नेहावशिष्टके ।
त्वग्भिः पत्रैर्मूलफलैस्तृणकाष्ठमयैस्तथा ।
सुगन्धिभिस्तथा द्रव्यैर्नोच्छिष्टस्तु भवेद्द्विजः ।। इति ।

वसिष्ठः— प्राणाहुतीषु सोमेषु मधुपर्के तथैव च ।
आस्यहोमेषु सर्वेषु नोच्छिष्टो भवति द्विजः ।। इति ।

आस्यहोमेषु दष्टावशिष्टभक्षणेष्विति हेमाद्रिः । आश्वलायनीयैस्तु मधुपर्के आचमनं कार्यमेव एतद्वाक्येन सर्वेषु प्राणाहुत्यादिषु आचमनाभावे सिद्धेऽपि "न सोमेनोच्छिष्टा भवन्ति" इति तत्सूत्रेण तान्प्रति मधुपर्कादिष्वनुच्छिष्टतापरिसंख्यानात् । एष एव वृत्तिकृतोऽप्याशयः ।

।। इति द्विराचमननिमित्तानि ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कादिषु ... दौ हस्तौ च मृज्जलैः ।
...गदीना... द्विज आचमनं चरेत् ॥

...र्णरौप्यताम्रैस्तु वेणुबिल्वाश्मचर्मभिः ।
अथ ... अलाबुदारुपत्रैस्तु नारिकेरैः कपित्थकैः ॥
तृणकाष्ठैर्जलाधारैरन्यान्तरितमृन्मयैः ।
वामेनोद्धृत्य वाऽऽचामेदन्यदातुरसंभवे ॥

गौतमः—'त्रिश्चतुर्वा अप आचामेत्खानि चोपस्पृशेत्' 'चतुर्वैत्यैच्छिको विकल्पः' इति माधवः । त्रयेणापरितोष इति श्रीदत्तः । फलभूमार्थमिति केचित् । योगी—

त्रिः प्राश्यापो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत् ।

अयं च द्विजातिविषयः 'स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्ततः' इति तेनैव स्त्रीशूद्रयोः सकृद्विधानात् ।

स एव— अन्तर्जानु शुचौ देशे उपविष्ट उदङ्मुखः ।
प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत् ॥

अत्र—द्विजग्रहणात्स्त्रीशूद्रयोरनियम इति हेमाद्रिः । तथाच ब्राह्मं सर्वं साधारणं, कायदैवे तु ब्राह्मणं प्रत्येव ।

तथाच मनुः—

ब्राह्मेण विप्रस्तीर्थेन सर्वकालमुपस्पृशेत् ।
कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन ॥ इति ।

त्रैदशिकं दैवम् ।

अत्र नित्यपदात्सर्वदा ब्राह्मेणैव तस्य व्रणाद्युपघाते तूत्तराभ्यामिति व्यवस्थितो विकल्पः । उत्तरयोस्त्वैच्छिकः ।

याज्ञवल्क्यः—

कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च ।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥

बौधायनः—'निर्वपणसंस्रवणलाजाहोमनित्यहोमान्कायतीर्थेन कुर्याद्दैवेन दैविकं च पैतृकं पित्र्येण कमण्डलुस्पर्शनं दधिस्पर्शनं नवान्नप्राशनं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्रुग्ग्रहणं दैविकं सौम्येन ... करमध्ये आग्नेयम् ।

देवलः— उभयत्र स्थितैर्दर्भैः ...
सोमपानफलं सोऽपि भु... ॥

उभयत्र हस्तद्वये । केवलवामहस्ते निषेधमाह हा...
वामहस्ते कुशान्कृत्वा समाचामति यो द्विजः ।
उपस्पृष्टं भवेत्तेन रुधिरेण मलेन वा ॥ इति ।

विष्णुः— ग्रन्थिर्यस्य पवित्रस्य न तेनाचमनं चरेत् ।

शङ्खः— काशहस्तस्तु नाचामेत्कदाचिद्वेधशङ्कया ।

वेधशङ्कयेति तु 'तेन ह्यन्नं क्रियते' इति वदर्थवादमात्रम् । दूर्वाहस्तोऽपि वा इति स्मृत्यर्थसारे ।

बौधायनः—'नाङ्गुलीभिर्न सबुद्बुदाभिर्न सफेनाभिर्न क्षाराभिर्नोष्णाभिर्न कलुषाभिरद्भिर्न हसन्न जल्पन्न विलोकयन्न तिष्ठन्न प्रह्वो न प्रणतो न मुक्तशिखो नावद्धकच्छो न बहिर्जानूपस्पृशेत् नाञ्जलिना पिबेन्नानुद्धृतोदकेनाचामेत् । न तिष्ठन्' इति तु स्थले ।

जले तु विशेषमाह विष्णुः—
जान्वोरूर्ध्वं जले तिष्ठन्नाचान्तः शुचितामियात् ।
जलस्थो जलकृत्येषु स्थलस्थः स्थलकर्मसु ।
उभयोस्तूभयस्थस्तु कर्मस्वधिकृतो भवेत् ॥

हारीतः— आर्द्रवासा जले कुर्यात्तर्पणाचमनं जपम् ।
शुष्कवासाः स्थले कुर्यात्तर्पणाचमनं जपम् ॥

स एव— विवर्णं गन्धवत्तोयं फेनिलं च विवर्जयेत् ।

देवलः— सोपानत्को जलस्थो वा मुक्तकेशोऽथवा पुनः ।
उष्णीषी वापि नाचामेद्वस्त्रेणावेष्ट्य वा शिरः ॥

संवर्तः— अशब्दाभिरनुष्णाभिस्त्यक्ताभिः फेनबुद्बुदैः ।
आपद्गतेन शुद्धिः स्यादुष्णेन [1]शृतपायिनः ॥

आपद्गतेनेति तृतीया षष्ठ्यर्थे बोद्धव्या । तेनापद्गतस्य शृतपायिन उष्णेनाऽपि शुद्धिरित्यर्थः ।

बौधायनः—

---

१ क्षीर क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...ा द्विजः ।

...त्वा भूमौ तु तज्जलम् ॥

...कादिषु ...

...ादीना...

" ...ा पित्र्यार्थे वा तथैव च ।

... ... नाचामेज्जपादिहवनेषु च ॥

... ...आपः करनखस्पृष्टाः समाचामति यो द्विजः ।

अथ ... सुरां पिबति सुव्यक्तं यमस्य वचनं यथा ॥ इति ।

आपस्तम्बः—

न वर्षधारास्वाचामेत्तथा च प्रदरोदके ।

प्रदरो गर्तः। तत्प्रतिप्रसवमाह वसिष्ठः—'प्रदरादपि गोस्तर्पणात्स्यात्' इति । इदं तु कलौ निषिद्धमिति कलिवर्ज्यनिर्णये भ्रातृचरणाः ।

गोतृप्तिशिष्टे पयसि शिष्टैराचमनक्रिया ।

इतिकलिनिषिद्धेषु पाठात् ।

देवलः— येषु देशेषु यत्तोयं या च यत्रैव मृत्तिका ।

तत्र तन्नावमन्येत धर्मस्तत्रैव तादृशः ॥ इति ।

विष्णुः— न गच्छन्न शयानश्च न स्थितः प्रह्व एव च ।

न स्पृशन्न हसञ्जल्पन्न श्वचाण्डालदर्शने ॥

गोभिलः—

नान्तरीयैकदेशस्य कृत्वा चैवोत्तरीयताम् ॥ इति

आचामेदिति शेषः ।

प्रचेताः—'न निर्वासा नान्यत्कुर्वन्नासनपाद आचामेत्' ।

पुलस्त्यः—

कण्ठं शिरो वा प्रावृत्य रथ्यापणगतोऽपि वा ।

अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत् ॥

आचमनात्पूर्वं गण्डूषानाह प्रयोगपारिजाते आचार्यः—

कुर्याद्द्वादश गण्डूषान्पुरीषोत्सर्जने द्विजः ।

मूत्रोत्सर्गे तु चतुरो भोजनान्ते तु षोडश ।

भक्ष्यभोज्यावसाने तु गण्डूषाष्टकमाचरेत् ॥

वामहस्तेनान्वारम्भमाह यमः—

तावन्नोपस्पृशेद्विद्वान् यावद्वामेन न स्पृशेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

अपां पर्युक्षणमाह नागदेवः—

['¹त्रिभिः पर्युक्षणं
विन्दुं च निक्षिपेन्म
विशेषमाह याज्ञवल्क्यः]—

हृत्कण्ठतालुगाभिस्तु यथासंख्यं द्विजातयः ।
शुध्येरन्स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्ततः ॥

सकृदिति त्रित्वमात्रापवादकं न तु सर्वेतिकर्तव्यतायाः। तेन सर्वोऽप्यङ्गस्पर्शनादिरूपेतिकर्तव्यता स्त्रीशूद्राभ्यां कर्तव्यैव। अन्तत इति तृतीयार्थे तसिः। तालुगाभिः इति विज्ञानेश्वरः। दन्तगाभिरिति हेमाद्रिः। ओष्ठप्रान्तेनेति श्रीदत्तः। हृद्गानां परिमाणमाहोशनाः—'माषमज्जनमात्रा हृदयंगमा भवन्ति इति।

ग्रहणे विशेषमाह कण्वः—

आयतं पूर्वतः कृत्वा गोकर्णाकृतिवत्करम्।
संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः।
मुक्ताङ्गुष्ठकनिष्ठेन शेषेणाचमनं चरेत् ॥

भरद्वाजः—

देव्याः पादैस्त्रिभिः पीत्वा अब्लिङ्गैर्नवधा स्पृशेत्।
पुनर्व्याहृतिगायत्र्या शिरोमन्त्रैर्द्विधा स्पृशेत् ॥

वौधायनः—'त्रिः परिमृजेद्द्विरित्येके' इति। ओष्ठाविति शेषः। 'तौ च विलोमकौ' इति हेमाद्रिः।

शङ्खः— तर्जन्यङ्गुष्ठयोगेन स्पृशेन्नासापुटद्वयम्।
²अङ्गुष्ठानामिकाभ्यां च चक्षुःश्रोत्रे पुनः पुनः ॥
कनिष्ठाङ्गुष्ठयोर्नाभिं हृदयं च तलेन वै।
³सर्वाभिस्तु ततः शीर्षं वाहू चाग्रेण संस्पृशेत् ॥

आश्वलायनः—

जलैः शुद्धैः पिबेद्वेदैश्चतुर्वाऽम्बु शनैर्द्विजः।
प्रमृजेद्विरथर्वेण पुराणैश्चेतिहासकैः ॥

---

१ कुण्डलितः क. नास्ति। २ अङ्गुष्ठस्यानामिकाया योगेन श्रवणं स्पृशेत्। क. पाठः। ३ गेन स्पृशेत्स्कन्धद्वयं ततः। क. पाठः। ४ नाभिं च हृदयं तद्वत्स्पृशेत्पाणितलेन तु। संस्पृशेत्तु ततः शीर्षमयमाचमने विधिः। क. पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृशेत् ।
कादिषु ... वमृज्याथ संस्पृशेत् ॥
...ादीनां ... मुखालम्भनं स्मृतम् ।
,, ... वामे सोमाय वायवे ॥
... दिग्भ्यः श्रवणयोर्बाह्वोरिन्द्राय संस्पृशेत् ।
... पृथिव्यै पादयोर्जान्वोरन्तरिक्षाय गुह्यके ॥
दिशे नाभ्यां ब्रह्मणे च विष्णवे हृदये तथा ।
शिवायेति शिरस्यन्ते हस्तं प्रक्षालयेत्ततः ॥ इति ।

अगस्त्यसंहितायाम्—

केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ ।
द्वाभ्यामोष्ठौ तु संमृज्य द्वाभ्यामुन्मार्जनं तथा ॥
एकेन हस्तं प्रक्षाल्य पादावपि तथैकतः ।
संप्रोक्ष्यैकेन मूर्धानं ततः संकर्षणादिभिः ॥
आस्यं नासाक्षिकर्णौ[1] च नाभ्युरस्कं भुजौ स्पृशेत् ।
एवमाचमनं कृत्वा साक्षान्नारायणो भवेत् ॥

अत्रैतानि केशवादिकृष्णान्तानि चतुर्विंशतिनामानि चतुर्थ्यन्तानि नमोन्तानि प्रथमैकवचनान्तानि वोच्चार्याणि । केचित्तु संबुध्यन्तान्युच्चारयन्ति तत्रापि विष्णुपदं हरिपदं चाविभक्तिकमेवोच्चारयन्ति । तत्साधूनेव प्रयुञ्जीतेतिवचनाच्चिन्त्यम्[3]

आचमनासंभवे मार्कण्डेयपुराणे—

आचमनासंभवे प्रतिनिधिः । देवतानां पितॄणां च ऋषीणां चैव यत्नतः ।
कुर्वीतालम्भनं वापि दक्षिणश्रवणस्य वा ।
यथाविभवतो ह्येतत्पूर्वाभावे ततः परम् ॥

बौधायनः—‘ आर्द्रतृणं भूमिं गोमयं वा संस्पृशेत् ’

आचमनस्य सर्वकर्माङ्गत्वमुक्तं पुराणसारे—

यः क्रियाः कुरुते मोहादनाचम्यैव नास्तिकः ।
भवन्ति हि क्रियास्तस्य वृथाः सर्वा न संशयः ॥ इति ।

॥ इति आचमनप्रकरणम् ॥

---

१ नासोर्दि° क. पाठः । २ नासां च कर्णौ क. पाठः । ३ नियमाचिं° क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ

अत्रिः— मुखे पर्युषिते नित्यं
तदार्द्रकाष्ठं शुष्कं वा
इदं च शुद्धयर्थं न तु स्नानाद्यङ्गम् । '
छन्दोगपरिशिष्टे तु–' दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन य
लार्थः संयोगः । मदनोऽप्येवम् । इदं च भोजनानन्तरमपि क

प्रातर्भुक्त्वा च यतवाक् भक्षयेद्दन्तधावनम् ।

इति विष्णूक्तेः । ' भुक्त्वेति यतिपरम् ' इति हलायुधीये; सर्वान्प्रतीति श्रीदत्तः । अत्र च कालादिनिषेधो नास्ति ।

भोजने दन्तलग्नादि निर्हृत्याचमनं चरेत् ।

इति देवलोक्तेरुच्छिष्टनिर्हरणस्यावश्यकत्वात् ।

कात्यायनः—

नन्दासु च नवम्यां च दन्तकाष्ठं विवर्जयेत् ।

विष्णुः—नवम्यां चैव द्वादश्यां वर्जयेद्दन्तधावनम् ।

[[1]श्राद्धाहे जन्मदिवसे विवाहे सुखदुःखयोः ।
व्रते चैवोपवासे च वर्जयेद्दन्तधावनम्]

व्यासः—

श्राद्धे च यज्ञे नियमे नाद्यात्प्रोषितभर्तृका ।
श्राद्धकर्तृनिषेधोऽयं न तु भोक्तुः कदाचन ॥

नाद्याद्दन्तकाष्ठमिति शेषः ।

आचार्यः—

अष्टम्योश्च चतुर्दश्योः पञ्चदश्यां त्रिजन्मसु ।
व्यतीपाते च संक्रान्त्यां दन्तकाष्ठं न भक्षयेत् ॥
नाद्यादजीर्णवमथुश्वासकासज्वरार्दितः ।
पुरोदयाद्रवेस्त्वद्यान्नोदितेऽस्तमिते रवौ ॥
दीक्षितो ब्रह्मचारी च यतिश्च विधवाऽङ्गना ।
नित्यमद्याद्दन्तकाष्ठममायां तु विवर्जयेत् ॥

त्रिजन्मसु [2]जन्मतदाद्युत्तरभेष्वेति[3] इति केचित् जन्मनवमैकोनविंशति-केष्विति ज्यौतिषिकाः ।

---

१ कुण्डलितः श्लोकः क. नास्ति । २ जन्मभं क. पाठः । ३ द्वे क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...कादिपु ... चैव भारत ।
...ादीनां ... दहत्यासप्तमं कुलम् ॥
... ...ः ।

अथ ... प्रतिपद्दर्शपष्ठीपु नवम्यां दन्तधावनम् ।
पर्णैरन्यत्र काष्ठैस्तु जिह्वोल्लेखः सदैव तु ॥

'तृणपर्णैर्मध्यमानामिकाङ्गुष्ठैर्निपिद्धाहे कुर्युः' इति स्मृत्यर्थसारे ।

व्यासः— अलाभे दन्तकाष्ठानां निषिद्धायां तिथावपि ।
अपां द्वादशगण्डूषैर्विदध्याद्दन्तधावनम् ॥

स्कान्दे— अभ्यङ्गे चोदधिस्नाने दन्तधावनमैथुने ।
जाते च मरणे चैव तत्कालव्यापिनी तिथिः ॥

यमः— चतुर्दश्यष्टमी दर्शः पूर्णिमा संक्रमो रवेः ।
एपु स्त्रीतैलमांसानि दन्तकाष्ठं च वर्जयेत् ॥

वसिष्ठः— शन्यर्कशुक्रवारेपु कुजाहे व्रतवासरे ।
जन्माहे श्राद्धदिवसे दन्तकाष्ठं विवर्जयेत् ॥

यमः— मध्याह्ने[1] स्नानवेलायां भक्षयेद्दन्तधावनम् ।
निराशास्तस्य गच्छन्ति देवताः पितृभिः सह ॥

अत्र 'नोदिते' इत्यनेनैव मध्याह्ननिषेधे सिद्धे पुनर्निषेधो दोषाधिक्यार्थः।

गोभिलः—

रजस्वला सूतिका च वर्जयेद्दन्तधावनम् ।

स्मृतिमञ्जर्याम्—

रजस्वला चतुर्थेऽह्नि सूतिका दशमेऽहनि ।
स्नानात्पूर्वं वन्धमोक्षे निन्द्येष्वपि चरेदिति ॥

नागदेवीये—

चिरं दन्तेषु केशेषु चिरं मूत्रपुरीषयोः ।
चिरं स्नाने च शीघ्रं च मैथुने शयनेऽशने ॥

व्यासः— प्रक्षाल्य पादौ हस्तौ च मुखं च सुसमाहितः ।
दक्षिणं वाहुमुद्धृत्य कृत्वा जान्वन्तरा ततः ॥

---

१ मध्याह्ने श्राद्धवेलायामिति वा पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिक्तं कषायं च ...
क्षीरिणो वृक्षगुल्मादे...
' दक्षिणं वाहुमुद्धृत्योपवीतं कृत्वा ...

विष्णुः— कण्टकिक्षीरवृक्षोत्थं द्वादशाङ्गु...
कनिष्ठाङ्गुलिवत्स्थूलं तदग्रकृतकूर्चकम् ।...

कौर्मे— मध्याङ्गुलसमस्थूलं द्वादशाङ्गुलसंमितम् ।
सत्वचं दन्तकाष्ठं स्यात्तदग्रेण तु धावयेत् ॥

इदं विषमदन्तस्य इतरस्य तु कनिष्ठाग्रसमस्थूलम् ॥
सुसूक्ष्मं हीनदन्तस्य समदन्तस्य मध्यमम् ।

दन्तकाष्ठमानम् । स्थूलं विषमदन्तस्य त्रिविधं दन्तधावनम् ॥ इति विष्णूक्तेः ।

विष्णुः— द्वादशाङ्गुलिकं विप्रे काष्ठमाहुर्मनीषिणः ।
शूद्रविट्क्षत्रजातीनां नवषट्चतुरङ्गुलम् ॥

गर्गः— चतुरङ्गुलमानं तु नारीणां नात्र संशयः । इति ।

नृसिंहपुराणे—

तित्तिर्णीवेणुपृष्ठं च आम्रनिम्बौ तथैव च ।
अपामार्गश्च विल्वश्च अर्कश्चौदुम्बरस्तथा ॥
वदरीतिन्दुकस्त्वेते प्रशस्ता दन्तधावने ।
कोविदारः करञ्जश्च कुटजः प्लक्षमालती ॥

गर्गः— सर्जे धैर्यं वटे दीप्तिः करञ्जे विजयो रणे ।
प्लक्षजे चार्थसंपत्तिर्वदर्यां मधुरस्वरः ॥
खदिरे चैव सौभाग्यं विल्वे तु विपुलं धनम् ।
औदुम्बरे च वाक्सिद्धिर्वन्धूके च दृढा मतिः ॥

दन्तकाष्ठे प्रशस्तवृक्षास्तत्फलं च । सैन्ध्रे च कीर्तिसौभाग्यं पालाशे सिद्धिरुत्तमा ।
कदम्बे सकला लक्ष्मीराम्रे आरोग्यमेव च ॥
अपामार्गे श्रुतिर्मेधाप्रज्ञावाप्तिर्वपुः श्रुतिः ।
आयुः शीलं यशो लक्ष्मीः सौभाग्यं चोपजायते ॥
अर्केण हन्ति रोगांस्तु बीजपूरेण तु व्यथाम् ।
दाडिमे सिन्धुवारे च उटजे कुटजे तथा ॥

---

१ ष्ठिकाग्रव° क. पाठः । २ कूर्चाग्रं त्वगपर्वकम् क. पाठः । ३ ष्ठिकाग्र° क. पाठः । ४ सैध्रे क. पाठः । ५ °र्वचः क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...स्वप्नं नाशयेदिति ।

...कादिषु ... भवेत्पलितवर्जितः ॥

...ादीनाम् ...

...

अथ ... मार्गे सर्वसिद्धिः स्त्रीवश्यत्वं प्रियङ्गुभिः ।
वेणुना चाप्नुयाद्गावो राजवृक्षाज्जयं लभेत् ॥
चूते च नृपवश्यत्वं सौभाग्यं पनसेन तु ।
दीर्घायुर्जम्बुवृक्षेण इष्टां सिद्धिं लभेदयम् ॥
जयं कण्टकवृक्षात्तु वलं वै कङ्कताल्लभेत् ।
आरोग्यं कर्णिकारेण पारन्त्यां शौर्यमुत्तमम् ॥
अशोकेन विशोकः स्याल्लवङ्गाद्ब्रह्मवर्चसम् ।
खादिरादखिलान्भोगाँल्लभेदतिशयं महः ॥
वाग्यतो विमृजेद्दन्तान्मांसं नैव तु पीडयेत् ।
जिह्वामलान्तमुदितं दन्तान्तरितमेव च ॥
राक्षस्यामुत्सृजेत्काष्ठं दिशि निर्मृज्य वै शुचौ ॥

राजवृक्षो राजादनम् ।

वर्ज्यानाह वृद्धयाज्ञवल्क्यः—

इष्टिकालोष्टपाषाणैर्नखैरङ्गुलिभिस्तथा ।
मुक्त्वा चानामिकाङ्गुष्ठौ वर्जयेद्दन्तधावनम् ॥

तथा च—दक्षिणाभिमुखो नाद्यान्नीलं धवकदम्बकौ ।
तिन्दुकेङ्गुदवन्धूकमोचाकरजासिन्धुकम् ।
कार्पासं दन्तकाष्ठं च विष्णोरपि हरेच्छ्रियम् ॥

नीलं नीलीवृक्षः । धवः प्रसिद्धः । मोचा कदली ।

आचार्यः—

दन्तकाष्ठे वर्ज्यवृक्षाः । नादण्डं न त्वचा हीनं नाप्रशस्ततरूद्भवम् ।
स्नुहिकिंशुकशाल्मलीकरञ्जादींश्च वर्जयेत् ॥

तथा— कोविदारेङ्गुदांश्चैव शाल्मलीवृक्षसिह्लकाः ।
श्यामाकं पारिभद्रं च गुग्गुलं पिच्छिलं तथा ॥

---

१ कृतेन क. पाठः । २ ॅदथ क. पाठः । ३ ॅदिति यशो महत् क. पाठः । ४ मांसानामत्यपीडया क. पाठः । ५ वाऽशुचौ क. पाठः । ६ कारजसिह्लकम् क. पाठः । ७ ऽश्वत्थ क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूतिगन्धाम्लमधुर...
प्रतीचीं दक्षिणाशां ...

पूतिगन्धं दुर्गन्धि ।

विष्णुः— न श्लेष्मातकारिष्टविभीतध...
न कोविदारशमीपीलुपिप्पलेङ्गुदगुग्गु...
न बर्बरनिर्गुण्डीशिग्रुतिलकतीलजम् ॥

हारीतः—'कालेयपलाशकोविदारश्लेष्मातकविल्वकशाकवृक्षनिर्गुण्डी-शिखण्डीशिरीषमालतीकरवीरवदरीकरञ्जवेणुवर्ज्यम्' इति ।

गर्गः— कुशं काशं पलाशं च शिंशुपं यस्तु भक्षयेत् ।
तावद्भवति चाण्डालो यावद्गङ्गां न पश्यति ॥

व्यासः— पालाशमासनं यानं दन्तकाष्ठं च पादुके ।
वर्जयेत्तु प्रयत्नेन सममश्वत्थमेव च ॥

मार्कण्डेयः—
शाल्मल्यश्वत्थभट्टीनां धवकिंशुकयोरपि ।
कोविदारशमीतालश्लेष्मातकविभीतकैः ।
वर्जयेद्दन्तकाष्ठं च गुग्गुलं क्रमुकं तथा ॥

वराहमिहिरः—
अज्ञातपूर्वाणि न दन्तकाष्ठान्यद्यान्न पर्णैश्च समन्वितानि ।
न युग्मपर्णानि न पाटितानि न चोर्ध्वशुष्काणि विना त्वचा वा ॥

अत्र कानिचित्सामान्यतो निषिद्धान्यपि कामार्थत्वेन विहितत्वात् तत्कामनावद्भिर्ग्राह्याण्येव । यानि तु केवलं विहितप्रतिषिद्धानि तेषु न तौ पशौ करोतीतिवद्विकल्प इति स्मृतिचन्द्रिकायाम् । विहितालाभेऽप्रतिषिद्धं तदलाभे विहितप्रतिषिद्धमेव ग्राह्यमिति सर्वे । विहितालाभेऽप्रतिषिद्धविहितप्रतिषिद्धयोरैच्छिको विकल्प इत्यपि कश्चित् ।

आश्वलायनः—
नाङ्गुलीभिश्च मृद्भिश्च पर्णैर्लोष्टैश्च भस्मना ।
नायसैश्च तथा लोहैः सर्वैर्दन्तान् मृजेद्द्विजः ॥

शातातपः—
दन्तधावनमङ्गुल्या प्रत्यक्षं लवणं तथा ।
मृत्तिकाभक्षणं चापि तुल्यं गोमांसभक्षणम् ॥

---

१ पिप्पलैशिखण्डी मालतीकरवीरवदरीकरञ्जवेणुवर्जमिति । गर्गः—न गुग्गुलार्जुनबर्बर नि' क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...कादिषु ... नखादिभिः ।
...ादीनाम् ... कामी हर्षिते दिने ।
,, ... च तैले च शिरसि स्थिते ॥

अथ ...

...माह विष्णुः—

दन्तधावने दिङ्मुखनियमः ।

प्राङ्मुखस्य धृतिः सौख्यं शरीरारोग्यमेव च ।
दक्षिणेन तथा कष्टं पश्चिमेन पराजयः ॥
उत्तरेण गवां नाशः स्त्रीणां परिजनस्य च ।
पूर्वोत्तरे तु दिग्भागे सर्वान्कामानवाप्नुयात् ॥

दन्तधावनमन्त्रो नागदेवीये—

अन्नाद्याय व्यूहध्वं सोमो राजायमागमत् ।
स मे मुखं प्रमार्क्ष्यति यशसा च भगेन च ॥

अङ्गिराः—प्रक्ष्याल्य भक्षयेत्काष्ठं प्रक्षाल्यैव तु संत्यजेत् ।
"आयु" रित्यादि मन्त्रोऽयमुक्तः शाखाभिमन्त्रणे ॥ इति ।

मन्त्रः काशीखण्डे—

आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ।
ब्रह्म प्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥

दन्तधावनोत्तरं शौनकः—

पश्चाद्द्वादशगण्डूषैर्विदध्याद्दन्तधावनम् ।
स्मृत्वोङ्कारं च गायत्रीं निबध्नीयाच्छिखां ततः ॥ इति ।

अङ्गिराः—पतितान्त्यजपाखण्डिदेवाजीवरजस्वलाः ।
भिषक्पातकिचाण्डाला न प्रेक्ष्या दन्तधावने ॥
शुनकं विड्वराहं च छत्राकं ग्रामकुक्कुटम् ।
अन्यान्नैवेदृशान् पश्येद्द्विजशुद्धौ विचक्षणः ॥ इति ।

देवाजीवो देवलकः । द्विजा दन्ताः ।

॥ इति दन्तधावनम् ॥

अथ पवित्रविधिः ।

व्यासः—कुशैः पूतं भवेत्स्नानं कुशेनोपस्पृशेद्द्विजः ।
कुशेन चोद्धृतं तोयं सोमपानेन संमितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यमः— कुशाः काशास्तथ
वल्वजाः पुण्डरीका।
शङ्खः— कुशाभावे द्विजश्रेष्ठः
कात्यायनः—
मासे नभस्यमावास्या तस्यां दर्भोच्चयः
अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः

प्रयोगपारिजाते स्मृतिचिन्तामणौ—
मासि मास्याहृता दर्भास्तत्तन्मास्येव चोदिताः । इति ।

मार्कण्डेयः—
शुचिर्भूत्वा शुचौ देशे स्थित्वा पूर्वोत्तरामुखः ।
ओङ्कारेणैव मन्त्रेण कुशान्स्पृष्ट्वा द्विजोत्तमः ॥
विरिञ्चिना सहोत्पन्न परमेष्ठिनिसर्गज ।
दहस्व सर्वपापानि दर्भ स्वस्तिकरो भव ॥
इमं मन्त्रं समुच्चार्य ततः पूर्वोत्तरामुखः ।
हुंफट्कारेण दर्भास्तु सकृच्छित्त्वा समुद्धरेत् ॥ इति ।

कात्यायनः—
अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥

मार्कण्डेयः—
चतुर्भिर्दर्भपिञ्जूलैर्ब्राह्मणस्य पवित्रकम् ।
एकैकन्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमम् ॥
पवित्रे दर्भसंख्या। त्रिभिर्दर्भैः शान्तिकर्म पञ्चभिः पौष्टिकं तथा ।
चतुर्भिरभिचारांस्तु कुर्वन्कुर्यात्पवित्रकम् ॥ इति ।

अत्रिः— ब्रह्मयज्ञे जपे चैव ब्रह्मग्रन्थिर्विधीयते ।
भोजने वर्तुलः प्रोक्त एवं धर्मो न हीयते ॥

हेमाद्रौ— अन्यान्यपि पवित्राणि कुशदूर्वामयानि च ।
हेमात्मकपवित्रस्य कलां नार्हन्ति षोडशीम् ॥ इति ।

पारिजाते आचार्यः—
हैमेन सर्वदा सर्वं कुर्यादेवाविचारयन् ।
रौप्यं दक्षप्रदेशिन्यां बिभृयाद्दीक्षितो द्विजः ॥ इति ।

दक्षो दक्षिणः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

... रौप्यमेव च ।
कादिषु ... पूतो भवेन्नरः ॥
...गदीनाम् ...

...गपट्टं तर्जन्यां रजतं तथा ।
... जीवत्पितृकैर्धार्यं ज्येष्ठे भ्रातरि जीवति ॥

अथ ... [तथा— पादुके चोत्तरीयं च तर्जन्यां रौप्यधारणम् ।
न जीवत्पितृकः कुर्याज्ज्येष्ठे भ्रातरि जीवति ॥]

शारदातिलके—

दारिद्र्यनाशिनी मुद्रा । ताम्रतारसुवर्णानामर्कषोडशखेन्दुभिः ।
कृता त्रिशक्तिमुद्रेयं तीव्रदारिद्र्यनाशिनी ॥ इति ।

तारं रूप्यम् ।

अर्चनदीपे—

सोमसूर्याग्निरूपाः स्युर्वर्णा लोहत्रयं तथा ।
रौप्यमिन्दुः स्मृतो हेम सूर्यस्ताम्रं हुताशनः ॥
लोहभागाः समुद्दिष्टाः स्वराद्यक्षरसंज्ञया ।
तैर्लौहैः कारयेन्मुद्रामसंकलितसंगताम् ॥
विजयदा मुद्रा । साग्रं सहस्रं संजप्य स्पृष्ट्वा तां जुहुयात्ततः ।
तस्यां संपातयेन्मन्त्री सर्पिषा पूर्वसंख्यया ॥
निक्षिप्य कुम्भे तां मुद्रामभिषेकोक्तवर्त्मना ।
आवाह्य पूजयेद्देवीमुपचारैः समाहितः ॥
अभिषिच्य विनीताय दद्यात्तां मुद्रिकां गुरुः ।
इयं रक्षा क्षुद्ररोगविषज्वरविनाशिनी ॥
व्यालचौरमृगादिभ्यो रक्षां कुर्याद्विशेषतः ।
युद्धे विजयमाप्नोति धारयेन्मनुजेश्वरः ॥

स्वराद्यक्षराण्येकपञ्चाशत् । तत्र षोडशभागा रूप्यस्य । पञ्चविंशतिस्ताम्रस्य । दश हेम्नः । साग्रमष्टोत्तरं स्पृष्ट्वा संजप्य जुहुयादित्यन्वयः—तस्यां मुद्रायां संपातयेत् । संपातानिति शेषः । संख्या जपस्य आराध्यदेवताया आगमिको वैदिको नाममन्त्रो वा जपहोमयोर्ज्ञेयः । मुद्राघटनादि सर्वमुपरागसमय एव कार्यमिति सांप्रदायिकाः ।

१ ज्येष्ठो वा विद्यते यदि । क. पाठः । २ क. अधिकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथाश्वलायनः—

[हैमेन सर्वदा सर्वं ...
रौप्यं दक्षप्रदेशिन्यां बिभृ...
उच्चाटनादिषु सिद्धिदा मुद्रा । अग्रन्थिकं च हैमं च तथा ...
गायत्र्यक्षरवर्गेण गृह्णीयात्ताम्रमुत्तमम् ।
अनुष्टुभस्तथा रौप्यं त्रिष्टुभः कनकोत्तमम् ।

गायत्र्यक्षराणि चतुर्विंशतिः । अनुष्टुभो द्वात्रिंशत् । त्रिष्टुभश्चतुश्चत्वारिंशत् ।

शलाकां कारयित्वाऽतोऽभिसृजेदङ्गुलीयकम् ।
एवं लोहत्रयेणैव कृतं रक्षोघ्नमुत्तमम् ।
शुद्ध्यै धार्यं दिवारात्रं त्रयं सममथापि वा ॥
जपेद्वामप्रदेशिन्यां धृत्वा यस्तत्पवित्रकम् ।
उच्चाटनादिसंसिद्ध्यै महापत्सु द्विजोत्तमः ॥

नवरत्नमुद्रामाह वोपदेवः—

हिशुं मुचं प्रमं गोरां नीशं वैके पुगुं मंबुम् ।
प्राच्या रत्नानि खेटाश्च मध्ये माणिक्यमुष्णगोः ॥

अत्र हिशु—मित्याद्यक्षरद्वन्द्वानि हीरकशुक्रादिग्रहप्रतिपादकानि । प्राच्याः प्राचीमारभ्य । ग्रहाः खेटाः । उष्णगू रविः ।

मानसोल्लासे—

अर्केन्दुरक्तज्ञगुरुभृगुमन्दाहिकेतवः ।
माणिक्यं मौक्तिकं चारु विद्रुमं गारुडं पुनः ॥
पुष्परागं लसद्वज्रं नीलं गोमेदकं तथा ।
वशीकरणी नवरत्नमुद्रा । वैडूर्यं नवरत्नानि मुद्रां तां कल्पयेच्छुभाम् ॥
जपहोमादिकं सर्वं कुर्यात्पूर्वोक्तवर्त्मना ।
यो मुद्रां धारयेदेतां तस्य स्युर्वशगा ग्रहाः ॥

रक्तो भौमः । अही राहुः ।

॥ इति पवित्रविधिः ॥

---

१ श्लोकोऽयं क. नास्ति । २ ग' क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...।

...कादिपु ...

...ादीनाम् ... जपहोमादि किंचन ।

,, ...र्णः शयनादुत्थितः पुमान् ॥

... ...न्ति हि सुप्तस्य इन्द्रियाणि स्रवन्ति च ।

अथ ... अङ्गानि समतां यान्ति चोत्तमान्यधमैः सह ॥

अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः ।

स्रवत्येव दिवा रात्रौ प्रातः स्नानं विशोधनम् ॥

प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकरं हि तत् ।

सर्वमर्हति शुद्धात्मा प्रातःस्नायी जपादिकम् ॥

गुणा दश स्नानपरस्य साधो रूपं च तेजश्च बलं च शौचम् ।

आयुष्यमारोग्यमलोलुपत्वं दुःस्वप्ननाशश्च यशश्च मेधा ॥

स्नानं नदीदेवखातह्रदेषु च सरस्सु च ।

पञ्चपिण्डाननुद्धृत्य न स्नायात्परवारिणि ॥ इति ।

परसंत्ताकेऽनुत्सृष्टजले मृत्पिण्डपञ्चकोद्धरणाभावे न स्नायादित्यन्तिमार्धार्थः ।

मरीचिः—भूमिस्थमुद्धृतं वापि शीतमुष्णमथापि वा ।

गाङ्गं पयः पुनात्याशु पापमामरणान्तिकम् ॥ इति ।

योगयाज्ञवल्क्यः—

भूमिस्थमुद्धृतात्पुण्यं ततः प्रस्रवणोदकम् ।

ततोऽपि सारसं पुण्यं तस्मान्नादेयमुच्यते ॥

पुण्यतोयानि । तीर्थतोयं ततः पुण्यं ततो गाङ्गं तु सर्वतः ॥ इति ।

गङ्गावाक्यम्—

नन्दिनी नलिनी सीता मालती च महापगा ।

विष्णुपादाग्रसंभूता गङ्गा त्रिपथगामिनी ॥

भागीरथी भोगवती जाह्नवी त्रिजटेश्वरी ।

द्वादशैतानि नामानि यत्र यत्र जलाशये ।

स्नानोद्यतः सदा कुर्यात्तत्र तत्र वसाम्यहम् ॥ इति ।

देवलः— एकां नदीं समासाद्य नान्यां स्नाने नदीं स्मरेत् ।

मार्कण्डेयः—

संकल्पं च यथा कुर्यात्स्नानदानव्रतादिके ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा यथावदित्यर्थ इति श्रे...

शङ्खः— "आपो अस्मान्" ...

"इदं विष्णु"र्जपित्वा ...

स्नानसंकल्पः । अप्रवाहोदकस्नानं विप्रपाद...

आदित्याभिमुखः कुर्यात्संध्यावन्दन...

याज्ञवल्क्यः—

"तत्त्वायामी" तिमन्त्रेण वारुणेन तटे स्थितः ।
"तदुत्तम" मिति स्मृत्वा ह्यवतीर्य जलाशये ।
आवाह्य वरुणं स्नानमाचरेद्विधिपूर्वकम् ॥ इति ।

चतुर्विंशतिमते—

स्नानमब्दैवतैर्मन्त्रैर्वारुणैश्च मृदा सह ।
कुर्याद्व्याहृतिभिर्वाथ "यत्किंचेद" मृचापि वा ॥

शौनकः—स्नात्वाऽऽचान्तो वारिमध्ये त्रिः पठेदघमर्षणम् । इति ।

योगयाज्ञवल्क्यः—

य एव विस्तृतः प्रोक्तः स्नानस्य विधिरुत्तमः ।
असामर्थ्यान्न कुर्याच्चेत्तत्रायं विधिरुच्यते ॥
स्नानमन्तर्जले चैव मार्जनाचमने तथा ।
लघुकल्पः । जलाभिमन्त्रणं चैव तीर्थस्य परिकल्पनम् ॥
अघमर्षणसूक्तेन त्रिरावृत्तेन नित्यशः ।
स्नानाचरणमित्येतदुपदिष्टं महात्मभिः ॥ इति ।

चतुर्विंशतिमते—

स्नानादनन्तरं तावत्तर्पयेत्पितृदेवताः ।
उत्तीर्य पीडयेद्वस्त्रं संध्याकर्म ततः परम् ॥ इति

तर्पणप्रकारमाह व्यासः—

यज्ञोपवीती देवानां निवीती ऋषितर्पणे ।
प्राचीनावीती पित्र्ये तु स्वेन तीर्थेन भावितः ॥

उशनाः—द्वौ हस्तौ युग्मतः कृत्वा पूरयेदुदकाञ्जलिम् ।
गोशृङ्गमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत् ॥

सुमन्तुः—आकाशे निक्षिपेद्वारि जलस्थो दक्षिणामुखः ।
पितृणां स्थानमाकाशं दक्षिणा दिक् तथैव च
त्रींस्त्रीञ्जलाञ्जलीन्दद्यादुच्चैरुच्चतरं बुधः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[illegible] ।

[illegible] कादिषु [illegible]

[illegible] नदीनां [illegible] जपहोमादि किंचन ।

[illegible] णैः शयनादुत्थितः पुमान् ॥

[illegible] न्ति हि सुषुप्तस्य इन्द्रियाणि स्रवन्ति च ।

अथ [illegible] अङ्गानि समतां यान्ति चोत्तमान्यधमैः सह ॥

अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः ।

स्रवत्येव दिवा रात्रौ प्रातः स्नानं विशोधनम् ॥

प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकरं हि तत् ।

सर्वमर्हति शुद्धात्मा प्रातःस्नायी जपादिकम् ॥

गुणा दश स्नानपरस्य साधो रूपं च तेजश्च बलं च शौचम् ।

आयुष्यमारोग्यमलोलुपत्वं दुःस्वप्ननाशश्च यशश्च मेधा ॥

स्नानं नदीदेवखातह्रदेषु च सरस्सु च ।

पञ्चपिण्डाननुद्धृत्य न स्नायात्परवारिणि ॥ इति ।

परसंसक्तकेऽनुत्सृष्टजले मृत्पिण्डपञ्चकोद्धरणाभावे न स्नायादित्यन्तिमार्धार्थः ।

मरीचिः—भूमिस्थमुद्धृतं वापि शीतमुष्णमथापि वा ।

गाङ्गं पयः पुनात्याशु पापमामरणान्तिकम् ॥ इति ।

योगयाज्ञवल्क्यः—

भूमिस्थमुद्धृतात्पुण्यं ततः प्रस्रवणोदकम् ।

ततोऽपि सारसं पुण्यं तस्मान्नादेयमुच्यते ॥

पुण्यतोयानि । तीर्थतोयं ततः पुण्यं ततो गाङ्गं तु सर्वतः ॥ इति ।

गङ्गावाक्यम्—

नन्दिनी नलिनी सीता मालती च महापगा ।

विष्णुपादाग्रसंभूता गङ्गा त्रिपथगामिनी ॥

भागीरथी भोगवती जाह्नवी त्रिजटेश्वरी ।

द्वादशैतानि नामानि यत्र यत्र जलाशये ।

स्नानोद्यतः सदा कुर्यात्तत्र तत्र वसाम्यहम् ॥ इति ।

देवलः— एकां नदीं समासाद्य नान्यां स्नाने नदीं स्मरेत् ।

मार्कण्डेयः—

संकल्पं च यथा कुर्यात्स्नानदानव्रतादिके ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा यथावदित्यर्थ इति ...

शङ्खः— "आपो अस्मान्" ...

"इदं विष्णु" र्जपित्वा ...

स्नानसंकल्पः। अप्रवाहोदकस्नानं विप्रपाद ...

आदित्याभिमुखः कुर्यात्संध्यावन्द ...

याज्ञवल्क्यः—

"तत्त्वायामी" तिमन्त्रेण वारुणेन तटे स्थितः।
"तदुत्तम" मिति स्मृत्वा ह्यवतीर्य जलाशये।
आवाह्य वरुणं स्नानमाचरेद्विधिपूर्वकम् ॥ इति।

चतुर्विंशतिमते—

स्नानमब्दैवतैर्मन्त्रैर्वारुणैश्च मृदा सह।
कुर्याद्व्याहृतिभिर्वाथ "यत्किंचेद" मृचापि वा ॥

शौनकः—स्नात्वाऽऽचान्तो वारिमध्ये त्रिः पठेदघमर्षणम्। इति।

योगयाज्ञवल्क्यः—

य एव विस्तृतः प्रोक्तः स्नानस्य विधिरुत्तमः।
असामर्थ्यान्न कुर्याच्चेत्तत्रायं विधिरुच्यते ॥
स्नानमन्तर्जले चैव मार्जनाचमने तथा।
लघुकल्पः। जलाभिमन्त्रणं चैव तीर्थस्य परिकल्पनम् ॥
अघमर्षणसूक्तेन त्रिरावृत्तेन नित्यशः।
स्नानाचरणमित्येतदुपदिष्टं महात्मभिः ॥ इति।

चतुर्विंशतिमते—

स्नानादनन्तरं तावत्तर्पयेत्पितृदेवताः।
उत्तीर्य पीडयेद्वस्त्रं संध्याकर्म ततः परम् ॥ इति

तर्पणप्रकारमाह व्यासः—

यज्ञोपवीती देवानां निवीती ऋषितर्पणे।
प्राचीनावीती पित्र्ये तु स्वेन तीर्थेन भावितः ॥

उशनाः—द्वौ हस्तौ युग्मतः कृत्वा पूरयेदुदकाञ्जलिम्।
गोशृङ्गमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत् ॥

सुमन्तुः—आकाशे निक्षिपेद्वारि जलस्थो दक्षिणामुखः।
पितॄणां स्थानमाकाशं दक्षिणा दिक् तथैव च
त्रींस्त्रीञ्जलाञ्जलीन्दद्यादुच्चैरुच्चतरं बुधः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...दद्याज्जलाञ्जलीन् ।
...कादिषु ... ... दद्याज्जलं पुनः ॥
...गदीनां ...
...
... ...लेत्रयं दद्याद्ये चान्ये संस्कृता भुवि ।
... ...असंस्कृतप्रमीतानामेकमेव तटे क्षिपेत् ॥

अथ ... तत्र मन्त्रः—

अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम ।
भूमौ दत्तेन तोयेन तृप्ता यान्तु परां गतिम् ॥ इति ।

भगवान्—

स्नानाङ्गतर्पणं कृत्वा यक्ष्मणे जलमाहरेत् ।

तन्मन्त्रस्तु—

यन्मया दूषितं तोयं शारीरमलसंभवात् ।
तद्दोषपरिहारार्थं यक्ष्माणं तर्पयाम्यहम् ॥

नदीक्षमापनं कौर्मे—

ज्ञानतोऽज्ञानतो वाऽपि यन्मया दुष्कृतं कृतम् ।
तत्क्षमस्वाखिलं देवि जगन्मातर्नमोऽस्तु ते ॥

ततो दर्भांस्त्यजेत् ।

विकिरे पिण्डदाने च तर्पणे स्नानकर्मणि ।
आचान्तः सम्प्रकुर्वीत दर्भसंत्यजनं बुधः ॥ इति स्मृतेः ।

विष्णुः— स्नातः शिरो नावधुनेन्नाङ्गेभ्यस्तोयमुद्धरेत् ।
न च पूर्वं धृतं वासो न च तैलमुपस्पृशेत् ।
स्नात्वा न धावयेद्वस्त्रं न मृज्याद्वाससा मुखम् ॥

मार्कण्डेयपुराणे—

अवमृज्यान्न च स्नातो गात्राण्यम्बरपाणिभिः ।
न च निर्धूनुयात्केशान्वासश्चैव न निर्धुनेत् ॥ इति ।

परिधेयवस्त्रे विशेषमाह देवलः—

स्वयं धौतेन कर्तव्याः क्रिया धर्म्या विपश्चिता ।
न तु नेजकधौतेन नाहतेन न कुत्रचित् ॥ इति ।

नेजको रजकः । नाहतेनेति समस्तं पदम् ।

---

१ च मे क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भृगुः— ब्राह्मणस्य सितं व...
पीतं वैश्यस्य शूद्रस्य ...
विकच्छोऽनुत्तरीयश्च न...
श्रौतं स्मार्तं तथा कर्म न न...

ब्राह्मणादिषु प्रशस्तवर्णवस्त्राणि ।

नग्नः स्यान्मलवद्वासा नग्नः कौशेयकेवल...
नग्नो द्विगुणवस्त्रः स्यान्नग्नो दग्धपटस्तथा ॥
नग्नश्च स्यूतवस्त्रः स्यान्नग्नो ग्रथितवस्त्रकः ।
नग्नश्च बहुवस्त्रः स्यान्नग्नः कौपीनकेवलः ॥
काषायवस्त्रः साक्षाच्च दश नग्नाः प्रकीर्तिताः ॥

कौशेयमात्रधारण एव नग्नता नतु परिधेयोत्तरीयवासोन्तरसाहित्येऽपि । कौपीने च एवमुभयत्रापि केवलशब्दोपादानस्वरसात् ।

जातूकर्ण्यः—

परिधानाद्बहिः कक्षा निबद्धा ह्यासुरी मता ।
धर्मकर्मणि विद्वद्भिर्वर्जनीया प्रयत्नतः ॥

प्रयोगपारिजाते—

स्नानं कृत्वाऽऽर्द्रवस्त्रं तु ऊर्ध्वमुत्तारयेद्द्विजः ।
आर्द्रवस्त्रमधस्ताच्चेत्पुनःस्नानेन शुध्यति ॥

विष्णुपुराणे—

होमदेवार्चनाद्यासु क्रियासु पठने तथा ।
नैकवस्त्रः प्रवर्तेत द्विजो नाचमने जपे ॥

जाबालिः—

निष्पीडितं धौतवस्त्रं यदा स्कन्धे विनिक्षिपेत् ।
तदासुरं भवेत्कर्म पुनः स्नानं विशोधनम् ॥
वस्त्रं चतुर्गुणीकृत्य निष्पीड्य सदशं तथा ।
वामप्रकोष्ठे निक्षिप्य स्थलस्थश्च द्विराचमेत् ॥
वस्त्रं त्रिगुणितं यस्तु निष्पीडयति मन्दधीः ।
वृथा स्नानं भवेत्तस्य स्नातस्य दशधाम्बुभिः ॥

गोभिलः—

एकवस्त्रो न भुञ्जीत न कुर्याद्देवतार्चनम् ।

१ बहुधान्धुनि क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...कादिषु ... भिदेशे व्यवस्थितम् ।
...गदीनां ... दैवे पित्र्ये च कर्मणि ।

...लाभे धौतवस्त्रस्य शाणक्षौमाविकानि च ।
... कुतपं योगपट्टं च विवासास्तु न वै भवेत् ॥

उत्तरीयाभावे स्मृत्यन्तरे—

यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि ।
तृतीयमुत्तरीयार्थे वस्त्राभावे तदिष्यते ॥ इति ।

पारस्करगृह्ये तु—

'एकं चेद्वासो भवति तस्यैवोत्तरवर्गेण प्रच्छादयेत्'

जाबालिः—

स्नात्वा निवस्य वस्त्रं च जङ्घे शोध्ये मृदम्भसा ।
अपवित्रीकृते ते तु कौपीनस्नानवारिणा ॥ इति ।

एतद्यतिब्रह्मचारिविषयम् ।

गृह्यपरिशिष्टे—

अथ तीरमेत्य दक्षिणामुखः प्राचीनावीती

ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ।
ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥

इति वस्त्रं निष्पीड्योपवीती अप उपस्पृश्य परिधानीयमभ्युक्ष्य परिधायान्यच्चोत्तरीयमभ्युक्षितं प्रावृत्य द्विराचामेत्' इति ।

वृद्धमनुः—

निष्पीड्य स्नानवस्त्रं तु पश्चात्संध्यां समाचरेत् ।
अन्यथा कुरुते यस्तु स्नानं तस्याफलं भवेत् ॥

मनुः— मनुष्यतर्पणे चैव स्नानवस्त्रनिपीडने ।
निवीती च भवेद्विप्रस्तथा मूत्रपुरीषयोः ॥ इति ।

वासोनिष्पीडने निवीतप्राचीनावीतयोर्विकल्पः इति केचित् । गृह्यपरिशिष्टस्याश्वलायनपरत्वात्तेषां प्राचीनावीतमितरेषां निवीतमिति तु नृसिंहः ।

---

१ तं वि° ख. पाठः । २ छादयीत क. पाठः । ३ स्नात्ववाससा क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५८

विष्णुः— ब्रह्मक्षत्रविशां चैव ...
तूष्णीमेव हि शूद्रस्य ...

दक्षः— प्रातर्मध्याह्नयोः स्नानं ...
यतेस्त्रिषवणं प्रोक्तं सकृत्तु ...

कात्यायनः—

अल्पत्वाद्धोमकालस्य वहुत्वात्स्नानकर्मणः ।
प्रातः संक्षेपतः स्नानं होमलोपो विगर्हितः ॥ इति ।

गृह्यपरिशिष्टे—'अथ स्नानविधिः । तत्प्रातर्मध्याह्ने च कुर्यादेकत्र वा ।
प्रातरेव ब्रह्मचारी । द्विस्त्रिर्वानप्रस्थः । यतिस्त्रिषु सवनेषु ।
गृह्योक्तः । तत्र प्रातः सहगोमयेन कुर्यात् । मृदा मध्यान्दिने । सायं

शुद्धाभिरद्भिः । न प्रातः स्नानात्प्राक् संध्यामुपासीत । प्रातरुत्सृष्टं गोमयमन्तरिक्षस्थं संगृह्य भूमिष्ठं चोपर्यधश्च संत्यज्य तीर्थमेत्य धौतपाणिपादमुख आचम्य संध्योक्तवदात्माभ्युक्षणादि च कृत्वा द्विराचम्य संयतप्राणः कर्म संकल्प्य गोमयं वीक्षितमादाय सव्ये पाणौ कृत्वा व्याहृतिभिस्त्रिधा विभज्य दक्षिणभागं प्रणवेन दिक्षु निक्षिप्योत्तरं तीर्थे क्षिप्त्वा मध्यमम् "मानस्तोके" इत्यृचाऽभिमन्त्र्य "गन्धद्वारा" मित्यृचा मूर्धादिसर्वाङ्गमालिप्य प्राञ्जलिः—

हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः ।
यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः ॥
यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम् ।
तन्न इन्द्रो वरुणो वृहस्पतिः सविता च पुनन्तु माम् ।

इति द्वाभ्याम् "अव ते हेळ" इति द्वाभ्याम् "प्रसंम्राजे वृहदर्चा" इतिसूक्तेन संप्रार्थ्य "याः प्रवतो निवत उद्वत उदन्वतीः" इत्येतया तीर्थमुपस्पृश्यावगाह्य स्नातो द्विराचम्य मार्जयेत् "दम्वयोऽयं त्यध्वभिः" इत्यष्टाभिः "आपोहिष्ठा" इति च नवाभिः अथ तीर्थमङ्गुष्ठेन "इमं मे गङ्गे" इति ऋचा त्रिः प्रदक्षिणमालोड्य प्रकाशपृष्ठमग्नोऽघमर्षणसूक्तं त्रिरावृत्त्य निमज्ज्योन्मज्ज्यादित्यमवलोक्य द्वादशकृत्व आप्लुत्य पाणिभ्यां शङ्खमुद्रया योनिमुद्रया चोदकमादाय मूर्ध्नि भूमौ खे वाह्वोरुरसि चात्मानं गायत्र्याऽभिषिच्य "त्वं नो अग्नेवरुणस्य विद्वान्" इतिद्वाभ्याम् "तरत्समन्दीधावति" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...भपिश्वेत् "तद्विष्णोः परमं पदं"
...कादिषु ... "वेदं वरुण दैव्येजने" इत्येता जपेत्
...गादीनां ... । अन्यत्राऽऽदित्याभिमुखः ।
" ... प्राङ्मुख उपवीती देवतीर्थेन व्याहृतिभि-
...ह्मादीन्देवान्सकृत् सकृत्तर्पयित्वाऽथोदङ्मुखो निवीती
अथ ... ...द्भिः प्राजापत्येन तीर्थेन ऋषीन् [तांभि]र्व्याहृतिभिर्द्विर्द्विस्तर्पयि-
त्वाऽथ दक्षिणामुखः प्राचीनावीती पितृतीर्थेन सतिलाभिरद्भिर्व्याहृतिभि-
रेव सोमः पितृमान् यमोऽङ्गिरस्वान् अग्निष्वात्ताः कव्यवाहन इत्यादीन्
त्रिस्त्रिस्तर्पयेत्स्नानाङ्गतर्पणमिति ।

शौनकः—"प्रसंम्राजेबृह" त्सूक्तमष्टर्चं वारुणं जपेत् ।
"समुद्रादूर्मि" रित्यपां सूक्तमेकादशर्चकम् ॥
"आपो अस्मान्मातर" इत्यृचं च जपेन्नरः ।
शौनकोक्तः । अवगाह्य निमज्ज्याथ द्विराचम्याभिषेचयेत् ॥
"अम्वयोऽय" मृचोऽष्टौ च "आपोहिष्ठा"ऽऽदयो नव ।
अद्भिः स्नात्वोदके मग्नस्त्रिः पठेदघमर्षणम् ॥
कुर्याद्द्वादशभिः स्नानं सर्वपापप्रणाशनम् ।
धन्यं यशस्यमायुष्यमारोग्यं पुष्टिवर्धनम् ॥ इति ।

॥ इति नित्यस्नानम् ॥

अथ काम्यस्नानम् ।

पुलस्त्यः—पुष्ये च जन्मनक्षत्रे व्यतीपाते च वैधृतौ ।
अमायां च नदीस्नानं पुनात्यासप्तमं कुलम् ॥
चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवसंनिधौ ।
न प्रेतत्वमवाप्नोति गङ्गायां च विशेषतः ॥
पुलस्त्योक्तम् । शिवलिङ्गसमीपे तु मुच्यते सर्वकिल्बिषैः ।
ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता ।
दशजन्माघहा गङ्गा तेन पापहरा स्मृता ॥ इति ।

विष्णुः— सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ।

---

१ नास्ति क. पाठे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनर्वसुबुधोपेता ...
स्रोतस्सु विधिवत्स्ना ...

मत्स्यपुराणे—

मात्स्योक्तम्। आषाढादिचतुर्मासं प्रातःस्नायी ...
विप्रेभ्यो भोजनं दत्त्वा कार्तिक्यां गोप्र ...
स वैष्णवं पदं याति विष्णुव्रतमिति स्मृतम् ॥ ...

आषाढादीत्यतद्गुणसंविज्ञानो बहुव्रीहिः।

आदित्यपुराणे—

आदित्यपुराणोक्तम्। कार्तिकं सकलं मासं नित्यस्नायी जितेन्द्रियः।
जपन्हविष्यभुक् स्नानात्सर्वपापैः प्रमुच्यते ॥
तुलामकरमेषेषु प्रातःस्नायी सदा भवेत्।
हविष्यं ब्रह्मचर्यं च महापातकनाशनम् ॥ इति।

मार्कण्डेयः—

मार्कण्डेयोक्तम्। श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः।
सप्तमीं नवमीं चैव पर्वकालं च वर्जयेत् ॥ इति।

विष्णुः— बालाश्च तरुणा वृद्धनरनारीनपुंसकाः।
स्नात्वा माघे शुभे तीर्थे प्राप्नुवन्तीप्सितं फलम् ॥
माघमास्युषसि स्नात्वा विष्णुलोकं स गच्छति ॥

चन्द्रिकायाम्—

दर्शं च पौर्णमासं वा प्रारभ्य स्नानमाचरेत्।
पुण्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरे ॥
अप्रावृतशरीरस्तु यः कष्टं स्नानमाचरेत्।
पदे पदेऽश्वमेधस्य फलमाप्नोति मानवः ॥
अनभ्यङ्गी द्विजो मासं सर्वमेनं नयेद्गृही।
ततः स्नानावसाने तु भोज्यं द्रव्यं सुसंस्कृतम् ॥
भोजयेद्द्विजदाम्पत्यं भूषयेच्च सुभूषणैः।
दम्पत्योर्वाससी सूक्ष्मे सप्तधान्यसमन्विते।
त्रिंशच्च मोदका देयाः शर्करातिलमिश्रिताः ॥

---

१ सर्वेति क. पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...स्नानम् ।

...कादिषु ...

...नदीनां ... याद्गजच्छायेति सोच्यते ।

" ... योगः सूर्यपर्वशताधिकः ॥ इति ।

...ग—

अथ ... आदित्यपुराणोक्तम् । गुरुवारेऽप्यमायां च अश्वत्थछायवारिणा ।
स्नानं प्रयागस्नानेन समं पातकनाशनम् ॥

प्रार्थनामन्त्रः—

जीवो वृहस्पतिः सौरिराचार्यो गुरुरङ्गिराः ।
वाचस्पतिर्देवमन्त्री शुभं कुर्यात्सदा मम ॥
एतैर्नामभिरष्टाभिः प्रार्थयेत्तर्पयेत्तथा ॥

॥ इत्यश्वत्थच्छायास्नानम् ॥

अथ समुद्रस्नानम् ।

भरद्वाजः—

पक्षोपवासफलदा महानद्यः समुद्रगाः ।
मासोपवासफलदः सकृत्स्नातो महोदधिः ॥ इति ।

आचार्यः—

समुद्रस्नानकालः । समुद्रे पर्वसु स्नायादमायां तु विशेषतः ।
पापैर्विमुच्यते सर्वैरमान्ते स्नानमाचरत् ॥
भृगौ भौमदिने स्नानं समुद्रे च विवर्जयेत् ।
ग्रहणे रविवारे च पुत्रेप्सुर्नैतदाचरेत् ॥

॥ इति समुद्रस्नानम् ॥

अथ नैमित्तिकस्नानम् ।

मनुः— दिवाकीर्तिमुदक्यां च पतितं सूतिकां तथा ।
अस्पृश्याः । शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति ॥ इति ।

दिवाकीर्तिश्चण्डालः ।

संवर्तः— तत्स्पृष्टिनं स्पृशेद्यस्तु स्नानं तस्य विधीयते ।
ऊर्ध्वमाचमनं प्रोक्तं द्रव्याणा प्रोक्षणं तथा ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदबुद्धिपूर्वस्पर्शे ।

तद्बुद्धिपूर्वसंस्पृष्टे द्वय...

इति संग्रहोक्तेरिति माधवः । बुद्धि...

उपस्पृशेच्चतुर्थस्तु तदूर्ध्वं प्रोक्ष...

इति मरीच्युक्तेः ।

काष्ठाद्यचेतनान्तरितस्पर्शे तु कौर्मे—

चाण्डालसूतकिशवैः संस्पृष्टं संस्पृशेद्यदि ।
प्रमादात्तत आचम्य जपं कुर्यात्समाहितः ॥
तत्स्पृष्टस्पर्शिनं स्पृष्ट्वा बुद्धिपूर्वं द्विजोत्तमः ।
आचमेत्तु विशुद्ध्यर्थं प्राह देवः पितामहः ॥ इति ।

प्रचेताः—साक्षात्स्पर्शे तु यत्प्रोक्तं तद्वस्त्रान्तरितेऽपि च । इति ।

चतुर्विंशतिमते—

चितिं च चितिकाष्ठं च यूपं चण्डालमेव च ।
स्पृष्ट्वा देवलकं चैव सचैलो जलमाविशेत् ॥
बौद्धान्पाशुपताञ्जैनाँल्लोकायतिककापिलान् ।
विकर्मस्थान्द्विजान्स्पृष्ट्वा सवासा[1] जलमाविशेत् ॥
कापालिकांस्तु संस्पृश्य प्राणायामोऽधिको मतः ॥ इति ।

कापिलाः सांख्या इति केचित् । लोकायतिककापिलानिति कर्मधारयाल्लोकायतिकैकदेशिन एव कापिला इति हेमाद्रिः ।

स्मृत्यन्तरे—

देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयम् ।
देवलकलक्षणम् । स वै देवलको नाम हव्यकव्येषु गर्हितः ॥ इति ।

स्मृतिरत्नावल्याम्—

शिवं सूर्यं तथा चन्द्रं दुर्गादीरुग्रदेवताः ।
योऽर्चयेत्पणपूर्वं तु सद्यः पतति मानवः ॥

देवसंनिधौ पशुबन्धे च देवलयूपस्पर्शे न स्नानम् ।

न स्नायाद्देवलं यूपं देवस्थाने च बन्धने ।
अस्पृश्यापवादः । अन्यदा तावुभौ स्पृष्ट्वा सचैलो जलमाविशेत् ।

इति व्यासोक्तेः ।

---

१ सचैल इति ख. पाठः । २ संग्रहोक्तेः इति क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...यामद्वयं निशि ।
...कादिषु ... काम्यनैमित्तिकादृते ।
...गादीनाम् ... नवत्स्नानमाचरेत् ।। इति ।
,, ... त्रिः—
... स्नानं यदि भवेत्पश्यन्नग्निं समाचरेत् ।
... स्वर्णाङ्गुलिकरो विप्रो वह्निना वा विना चरेत् ।।

अथ ...

पाराशरः—

अस्पृश्यस्पर्शने जाते अश्रुपाते क्षुरे भगे ।
स्नानं नैमित्तिकं कार्यं दैवपित्र्य[1]विवर्जितम् ।। इति ।

दैवादितर्पणरहितमित्यर्थः ।

स एव— तूष्णीमेवावगाहेत यदा स्यादशुचिर्नरः ।

अशुचेः स्नाने संकल्पादिनिषेधः । आचम्य विधिवत्पश्चात्प्रयतः स्नानमाचरेत् ।। इति ।

वृद्धमनुः—

निषिद्धोष्णजलस्नानम् । मृते जन्मनि संक्रान्तौ श्राद्धजन्मदिने तथा ।
अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ।। इति ।

गार्ग्यः— कुर्यान्नैमित्तिकस्नानं शीताद्भिः काम्यमेव च ।
नित्यं याद‍ृच्छिकं चैव यथारुचि समाचरेत् ।। इति ।

।। इति नैमित्तिकस्नानम् ।।

अथ मलापकर्षस्नानम् ।

मनुः— पक्षादौ च रवौ षष्ठ्यां रिक्तायां च तथा तिथौ ।
तैलेनाभ्यज्यमानस्तु धनायुर्भ्यो विहीयते ।।

गर्गः— पञ्चदश्यां चतुर्दश्यामष्टम्यां रविसंक्रमे ।

अभ्यङ्गे वर्ज्यास्तिथयः । द्वादश्यां सप्तमीषष्ठयोस्तैलस्पर्शं विवर्जयेत् ।।
न च कुर्यात्तृतीयायां त्रयोदश्यां तिथौ तथा ।
नवम्यां च दशम्यां च क्षेममिच्छन्हि पण्डितः ।। इति ।

माधवीये—

वारविशेषेणाभ्यङ्गफलम् । संतापः कान्तिरल्पायुर्धनं निर्धनता तथा ।
अनारोग्यं सर्वकामा अभ्यङ्गाद्भास्करादिषु ।।

---

१ °पैत्र्य° ख. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रचेता:——सार्षपं गन्धतैलं
अन्यद्रव्ययुतं तैलं

याज्ञवल्क्य:—

वृथा तूष्णोदकस्नानं वृथा
वृथा त्वश्रोत्रिये दानं वृथा भुक्तमसा।

यम:— नित्यं नैमित्तिकं चैव क्रियाङ्गं मलकर्षणम्।
तीर्थाभावे तु कर्तव्यमुष्णोदकपरोदकैः ॥
आदित्यकिरणैः पूतं पुनः पूतं च वह्निना।
आम्नातमातुरस्नाने न प्रशस्तं दृढाङ्गिनाम् ॥ इति।
आपः स्वभावतो मेध्याः किं पुनर्वह्नितापिताः।
अतः सन्तः प्रशंसन्ति स्नानमुष्णेन वारिणा ॥

इति याज्ञवल्कीयमप्यातुरपरम्।

वृद्धमनुः—

संक्रान्त्यां रविवारे च सप्तम्यां राहुदर्शने।
आरोग्यपुत्रमित्रार्थी न स्नायादुष्णवारिणा ॥ इति।

॥ इति मलापकर्षस्नानम् ॥

अथ कातीयानां मध्याह्नस्नाने विशेषस्तत्सूत्रे—

संकल्पं सूत्रपठनं मार्जनं चाघमर्षणम्।
देवादितर्पणं चैव पञ्चाङ्गं स्नानमुच्यते ॥

अथातो नित्यस्नानम्। नद्यादौ मृद्गोमयकुशतिलसुमनस आहृत्योदकान्तं गत्वा शुचौ देशे स्थाप्य प्रक्षाल्य पाणिपादं कुशोपग्रहो बद्धशिखो यज्ञोपवीत्याचम्य "उरुँ ही" ति तोयमामन्त्र्य आवर्तयेत् "ये ते शत" मिति "सुमित्रियान" इत्यपोऽञ्जलिनादाय "दुर्मित्रिया" इति द्वेष्यं प्रति निषिञ्चेत्। कटिं वस्त्यूरुजङ्घे चरणौ करौ मृदा त्रिस्त्रिः प्राक्षाल्याचम्य नमस्योदकमालभेदङ्गानि मृदा "इदं विष्णु" रिति सूर्याभिमुखो मज्जेत् "आपो अस्मान्" इति स्नात्वा "उदादिभ्य" इति निमज्ज्योन्मज्ज्याचम्य गोमयेन विलिम्पन् "मानस्तोके" इति ततोऽभिषिञ्चेत् "इमं मे वरुण" इति चतसृभिः "माप" "उदुत्तमं" "मुञ्चन्तु" "अवभृथे" त्यंते चैवं निमज्ज्योन्मज्ज्याचम्य दर्भैः पावयेत् "आपोहिष्ठा" इति तिसृभिः "इद-

---

१ संयुताः ख. पाठः। २ मा° ख. पाठः। ३ म्पेत् क. पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

... इति द्राभ्याम् " अपो देवा " ...कादिषु ... रसं " " अपोदेवीः " " पुनंतु ...गदीनाम् ... इत्योंकारेण व्याहृतिभिर्गायत्र्या " ... त्रिरावर्तयेत् " द्रुपदांवा " " आयंगौः" ... सशिरसमोमिति वा विष्णोर्वा स्मरणम् । कातीया- ... भिमुखतैव प्रवाहाभिमुखता त्वन्येषामिति कर्कः । सशिरसमित्यनेनाऽशिरस्कोऽपि प्राणायामोऽस्तीति गम्यत इति हरिहरः।

अथ मध्याह्नसंध्यायां विशेषः—उत्तीर्य धौतवाससी परिधाय मृदोरुकरौ प्रक्षाल्याचम्य त्रिरायम्यासून्पुष्पाण्यम्बुमिश्राण्यूर्ध्वं प्रक्षिप्योर्ध्वबाहुः सूर्यमुदीक्षन् "उद्वयम्" "उदुत्यं" "चित्रं" "तच्चक्षुः" "गायत्र्या" च यथाशक्ति " विभ्राड् " इत्यनुवाकपुरुषसूक्तशिवसंकल्पमण्डलब्राह्मणैरुपस्थाय प्रदक्षिणीकृत्य नमस्कृत्योपविशेद्दर्भेषु । दर्भपाणिः स्वाध्यायं च यथाशक्त्यादावारभ्य वेदम् । ऊरुकरक्षालनं च शुद्ध्यर्थं नानन्तरक्रियमाणसंध्यावन्दनाङ्गं प्राणायामात्प्रागाचमनमपीति हरिहरः । ऊर्ध्वं सूर्याभिमुखं प्रक्षेपश्च प्रणवव्याहृतिपूर्विकया गायत्र्येत्यपि स एव । शिवसंकल्प इति मन्त्रा " यज्जाग्रत " इत्याद्याः षट् । मण्डलब्राह्मणम् " यदेतन्मण्डलं तपति " इत्यादि ।

ततस्तर्पयेद्ब्रह्माणं पूर्वं विष्णु[१] रुद्रं प्रजापतिं देवाञ्छन्दांसि वेदानृषीन् पुराणाचार्यान् गन्धर्वानितराचार्यान्संवत्सरं च सावयवं देवीरप्सरसो देवानुगान्नागान्सागरान्पर्वतान् सरितो मनुष्यान्यक्षान्रक्षाँसि पिशाचान्सुपर्णान् भूतानि पशून्वनस्पतीरोषधीर्भूतग्रामं चतुर्विधं तृप्यतामित्योंकारपूर्वकम् ।

ततो निवीती मनुष्यान्—

सनकं च सनन्दं च तृतीयं च सनातनम् ।
कपिलं चासुरिं चैव वोढुं पञ्चशिखं तथा ॥

ततोऽपसव्यं तिलमिश्रम्—

कव्यवाडनलःसोमं यममर्यमणमग्निष्वात्तान्सोमपान्बर्हिषदो यमांश्चैके
एकैकस्य तिलैर्मिश्राँस्त्रींस्त्रीन्दद्याज्जलाञ्जलीन् ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥

जीवत्पितृकोऽप्येतानन्यांश्चेतरः । " उदीरता " " आङ्गिरस "

१ प्रक्षेपे क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"आयन्तु नः" "ऊर्जं" ... त्यृचं जपन्प्रसिञ्चेत्तृप्यध्वमिति ... हानां चैवम् । गुरुशिष्यर्त्विग्ज्ञाति... न्ति । अत्र यद्यपि ब्रह्मादिद्वितीयान्तेषु ... थापि श्रुतत्वात्तृप्यतामित्येवानुषज्यते । तेन ब्रह्माद्या... ॐ ब्रह्मा तृप्यतामित्येकोनविंशतिवाक्यानि । सावयव... विशेषणम् । एवमेव सनकादिसप्तसु । कव्यवाट् चासावनलश्चेत्येकैव देवतेति कर्कहरिहरौ । देवताद्वयमित्यन्ये । यमादिषु चतुर्दशसु यमाय नमस्तर्पयामीत्यादिः प्रयोग इति हरिहरः । अन्यान्पित्रादींस्त्रीन् । इतरो मृतपितृकः "उदीरता" मिति षण्मन्त्रान् "मधुवाता" इति तृचं च जपन्नञ्जलीन्क्षिपेत् । तृप्यध्वमिति च प्रत्येकमुक्त्वा क्षिपेत् "नमो वः पितर" इत्यादीन्षण्मन्त्रानुक्त्वाऽनन्तरं मातामहादींस्तर्पयेत् ।

वासो निष्पीड्याचम्य ब्राह्मवैष्णव-रौद्र-सावित्र-मैत्रावरुणैस्तल्लिङ्गैर-र्चयेत् "अदृश्रमस्य" "हꣳसः" इत्युपस्थाय सूर्यं प्रदक्षिणीकृत्य नमस्कृत्य च दिशश्च देवताश्च उपविश्य ब्रह्माग्निपृथिव्योषधी वाग्वाच-स्पति विष्णुमरुद्भ्योऽपांपतये वरुणाय नम इति सर्वत्र । "संवर्चसे" इति मुखं विमृष्टे "देवागातुविदः" इति विसर्जयेत् । एष स्नानविधिः इति ।

अथ गौणस्नानानि ।

वृद्धमनुः—

> असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया ।
> मन्त्रस्नानादिकं प्रोक्तं मुनिभिः शौनकादिभिः ॥ इति ।

चतुर्विंशतिमते—

स्नानप्रतिनिधयः।

> आग्नेयं भस्मना स्नानमवगाहस्तु वारुणम् ॥
> आपोहिष्ठेति च ब्राह्मं वायव्यं रजसा गवाम् ॥
> यत्तु सातपवर्षं तु तत्स्नानं दिव्यमुच्यते ।
> स्नानान्येतानि चापत्सु व्याधितस्योदकं विना ॥ इति ।

प्रयोगपारिजाते—

> आपोहिष्ठादिभिर्मान्त्रं मृदालम्भस्तु पार्थिवम् ।
> आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम् ॥

१ 'सत्ता' क. पाठः । २ गाह्य च क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...दिव्यमुच्यते ।
...कादिषु ... मानसं विष्णुचिन्तनम् ॥
...आदीनाम् ...
... यत्स्नानं मन्त्रविधानतः ।
... वाससा चाङ्गमार्जनं कापिलं स्मृतम् ॥

अथ ...लम्—

विद्वत्सरस्वतीप्राप्तं स्नानं सारस्वतं विदुः ।

विद्वत्सरस्वती शुद्धोऽसीत्यादिवचः ।

अथ गायत्रम्—

गायत्र्या जलमादाय दशकृत्वोऽभिमन्त्र्य च ।
शिरश्चाङ्गानि सर्वाणि प्रोक्षयेत्तेन वारिणा ॥
स्नानं गायत्रकं नाम सर्वपापप्रणाशनम् ।
अशक्तानां तु जन्तूनां गुरोः पादोदकं शुभम् ॥

तथा— विप्रपादाद्विष्णुपादात्तलस्याः संभृतं जलम् ।
प्रोक्षणात्स्नानमाप्नोति ध्यानस्नानं विशिष्यते ॥
चतुर्भुजं महाकायं शङ्खचक्रगदाधरम् ।
ध्यायीत मनसा विष्णुं स्नानं मानसमीरितम् ॥

एतैस्तु स्नानानुकल्पैर्जपसंध्यावन्दनवेदाध्ययनेष्वेवाधिकारो न श्राद्धदेवपूजादौ ।

प्रातः स्नातुमशक्तस्तु रोगाद्यैर्वा भयाच्च वा ।
पूर्ववस्त्रं परित्यज्य गौणस्नानेन शुध्यति ॥
स च कर्मस्वनर्हः स्याच्छ्राद्धदेवार्चनादिषु ।
जपेत्संध्यां तथा वेदान्सोऽधीयीत यथाविधि ॥

गौणस्नानपूतस्य कर्मविशेषेऽर्हत्वानर्हत्वम् ।

इत्याचार्यस्मृतेः । इति गौणस्नानानि ।

॥ इति स्नानविधिः ॥

अथ तिलकम् ।

ब्रह्मपुराणे—

पर्वताग्रे नदीतीरे रामक्षेत्रे विशेषतः ।
सिन्धुतीरे च वल्मीके तुलसीमूलमाश्रिताः ॥

---

१ मम ' क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मृद एतास्तु संप...
द्वारवत्युद्भवाद्गोपीच...
तिलकयोग्यमृत्तिकाः । कारयेन्नित्यमेवं हि प...
जाह्नवीतीरसंभूतां मृदं मूर्ध्न...
बिभर्ति रूपं सोऽर्कस्य तमोनाशाय के...
श्यामं शान्तिकरं प्रोक्तं रक्तं वश्यकरं भवेत् ।
श्रीकरं पीतमित्याहुर्वैष्णवं श्वेतमुच्यते ॥
अङ्गुष्ठः पुष्टिदः प्रोक्तो मध्यमाऽऽयुःकरी भवेत् ।
अनामिकाऽन्नदा नित्यं मुक्तिदा च प्रदेशिनी ।
एतैरङ्गुलिभेदैस्तु कारयेन्न नखैः स्पृशेत् ।

तिलकं प्रक्रम्य स्मृतिचन्द्रिकायां ब्रह्माण्डे—

ललाटे केशवं विद्यान्नारायणमथोदरे ।
माधवं हृदि विन्यस्य गोविन्दं कण्ठकूपके ॥
उदरे दक्षिणे पार्श्वे विष्णुरित्यभिधीयते ।
तत्पार्श्वे बाहुमध्ये तु विन्यसेन्मधुसूदनम् ॥
तिलकधारणमन्त्राः । त्रिविक्रमं कर्णदेशे वामकुक्षौ तु वामनम् ।
श्रीधरं बाहुके वामे हृषीकेशं तु दक्षिणे ॥
पृष्ठदेशे पद्मनाभं ककुदामोदरं स्मरेत् ।
द्वादशैतानि नामानि वासुदेवेति मूर्धनि ।
संकर्षणादिभिः कृष्णे शुक्ले चेत्केशवादिभिः ॥ इति ।

शौनकः—

उर्ध्वं पुण्ड्रं शिवस्यैवं विष्णोः कुर्युश्च वा बुधाः ।
मूर्ध्नि मूलेन मन्त्रेण शेषं द्वादशनामभिः ॥
स्थानेष्वेषु द्विजः कुर्यात् नमोन्तैः प्रणवेन च ॥ इति ।

स्थानविशेषेणाकारविशेषः स्मर्यते—

निटिले बाहुवच्चैव दण्डवत्कर्णपल्लवे ।
हृदये कमलाकारमुदरे दीपवल्लिखेत् ॥
पुण्ड्राकारविशेषाः । वेणुपत्रसमाकारं बाहुमध्ये समालिखेत् ।
अधःपृष्ठे स्कन्धदेशे लिखेज्जम्बुफलाकृति ॥

१ स्नात्वेति ख. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...कादिषु ... ...मुत्तमोत्तममुच्यते ।
...ादीनाम... ...स्यादष्टाङ्गुलमतः परम् ।
... ... पुण्ड्रं मध्यमं त्रिविधं स्मृतम् ।
... ...स्त्रिव्यङ्गुलैः पुण्ड्रं कनिष्ठं त्रिविधं भवेत् ॥
... ऊर्ध्वं पुण्ड्रमृजुं सौम्यं कनिष्ठाङ्गुलिवत्स्मृतम् ।
अथ ... नासादिकेशपर्यन्तं प्रयत्नाद्धारयेद्द्विजः ॥

सत्यव्रतः—

मद्भक्तो धारयेन्नित्यमूर्ध्वपुण्ड्रं विना तु तत् ।
यत्कर्म कारयेन्नित्यं तत्सर्वं निष्फलं भवेत् ॥ इति ।

प्रयोगपारिजाते संग्रहे—

ऊर्ध्वं पुण्ड्रं त्रिपुड्रं वा मध्ये शून्यं प्रधारयेत् ।
शृणु षण्मुख तन्मध्ये उमयाऽहं श्रिया हरिः ॥ इति ।

तत्रैव सारणीये शङ्खः—

शङ्खचक्राद्यङ्कनं च तुलसीदलभक्षणम् ।
यः कुर्यान्नियतं भक्त्या स याति परमां गतिम् ॥
नान्यं देवं नमस्कुर्यान्नान्यं देवं निरीक्षयेत् ।
चक्राङ्कितः सदा तिष्ठेन्मद्भक्तः पाण्डुनन्दन ॥ इति ।

शङ्खादिवचांसि वैदिकमार्गभ्रष्टपराणि ।

वेदमार्गानुयायिनामङ्कननिषेधः । शिवकेशवयोरङ्कान्शूलचक्रादिकान्द्विजः ।
न धारयेत मतिमान्वैदिके वर्त्मनि स्थितः ॥

इत्याश्वलायनोक्तेः ।

ब्रह्माण्डे—मृत्तिका चन्दनं चैव भस्म तोयं चतुर्थकम् ।
एभिर्द्रव्यैर्यथाकालमूर्ध्वं पुड्रं सदा भवेत् ॥

कालविशेषेतिलकविशेषः । स्नात्वा पुड्रं मृदा कुर्याद्धुत्वा चैव तु भस्मना ।
देवानभ्यर्च्य गन्धेन सर्वपापापनुत्तये ।
जलेन तिलकं कुर्याज्जलान्तः कर्मसिद्धये ॥ इति ।

संग्रहे— न कदाचिन्मृदा तिर्यक् न्यसेदूर्ध्वं न भस्मयेत् ।
अत्र भस्मनोर्ध्वपुंण्ड्रस्य विहितप्रतिषिद्धत्वाद्विकल्पः ।

स च वृद्धाचारतो व्यवस्थित इति नृसिंहः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कात्यायनः—

श्राद्धे यज्ञे जपे होमे
धृतत्रिपुण्ड्रः पूतात्मा मृ

भविष्यपुराणे—

सत्यं शौचं जपो होमस्तीर्थं देवादिपूजन
तस्य व्यर्थमिदं सर्वं यस्त्रिपुण्ड्रं न धारयेत् ॥

भस्मधारणप्रदेशः स्मृतिरत्नावल्याम्—

भस्मधारणस्थानि ।

ललाटे हृदये नाभौ गलेंऽसे बाहुसंधिषु ।
पृष्ठदेशे शिरस्येवं स्थानेष्वेतेषु धारयेत् ॥

भस्मधारणे मन्त्रानाह पुलस्त्यः—

भस्मधारणविधिः ।

"अग्निरि"त्यादिभिर्मन्त्रैः शुद्धं भस्माभिमन्त्रितम् ।
शिवमन्त्रेण तद्धार्यं मन्त्रेणाष्टाक्षरेण वा ॥
गायत्र्या वाथ देवर्षे मन्त्रेण प्रणवेण वा ।
करोति शिवमन्त्रेण यस्त्रिपुण्ड्रं द्विजोत्तमः ॥
त्र्यक्षः शूलधरः सौम्यः शिवलोके महीयते ॥
अष्टाक्षरेण मन्त्रेण यः करोति त्रिपुण्ड्रकम् ।
विष्णोः पदमवाप्नोति नान्यथा श्रुतिचोदितम् ॥
सौरं पदमवाप्नोति गायत्र्या मुनिसत्तम ।
प्राप्नोति ब्रह्मणो रूपं प्रणवेन न संशयः ॥ इति ।

अग्निरित्यादिमन्त्रास्त्वाथर्वणस्य पिप्पलाद ऋषिः । गायत्री छन्दः । रुद्रो देवता । भस्मशुद्धौ विनियोगः । अग्निरिति भस्म । वायुरिति भस्म । जलमिति भस्म । स्थलमिति भस्म । व्योमेति भस्म । सर्वं ह्वा इदं भस्म ।

प्रयोगपारिजाते—

धार्यं भस्म त्रिपुण्ड्रं तु गृहिणा जलसंयुतम् ।
सर्वकालं भवेत्स्त्रीणां यतीनां जलवर्जितम् ॥

भस्मधारणे धारकविशेषेण सजलनिर्जलविशेषः ।

वानप्रस्थस्य कन्यानां दीक्षाहीननृणां तथा ।
मध्याह्नात्प्राक्जलैर्युक्तं परतो जलवर्जितम् ॥
मध्याङ्गुलित्रयेणैव स्वदक्षिणकरस्य तु ।
त्रिपुण्ड्रं धारयेद्विद्वान् सर्वकल्मषनाशनम् ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[illegible] ।

कादिषु [illegible] ॥

आदीनाम् [illegible] त्रिपुण्ड्रं [illegible] ।

[illegible] ब्राह्मणानां त्रिपुण्ड्रकम् ॥

[illegible]णां चतुरङ्गुल्यं वैश्यानां द्व्यङ्गुलं तथा ।
शूद्राणामथ सर्वेषामेकाङ्गुल्यं त्रिपुण्ड्रकम् ॥ इति ।

[illegible]— त्रिपुण्ड्रं ब्राह्मणो विद्वान्मनसाऽपि न लङ्घयेत् ।
स्मृत्या विधीयते यस्मात्त्यागी पतितो भवेत् ॥
त्रिपुण्ड्रेण विना येन विप्रेण यत्कृतं कृतम् ।
न तत्स्नानं न तद्ध्यानं न तद्दानं जपो न सः ॥

संग्रहे— ये भस्मधारिणं दृष्ट्वा वाचा निन्दन्ति मानवाः ।
तेषां शूद्रेण संभूतिरनुमेया विपश्चिता ॥ इति ।

[नारदः— मद्यं पीत्वा गुरुदारांश्च गत्वा
स्वर्णस्तेयं ब्रह्महत्यां च कृत्वा ।
भस्मच्छन्नो भस्मशय्याशयानो
रुद्रं ध्यायन्मुच्यते पातकेभ्यः ॥ इति ।]

॥ इति तिलकम् ॥

अथ संध्यावन्दनम् ।

तस्य च नित्यतामाह मरीचिः—

संध्या येन न विज्ञाता संध्या येनानुपासिता ।
जीवमानो भवेच्छूद्रो मृतः श्वा चाभिजायते ॥ इति ।

शुचित्वसंपादनेन कर्माङ्गतामाह दक्षः—

संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।
यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत् ॥ इति ।

अङ्गता च प्रातःसंध्याया एवेति केचित् । युक्तं तु वचनान्तरप्राप्ततत्तत्संध्याकालोत्तरभावितत्तत्कर्माङ्गता संध्यात्रयस्याप्यविशेषात् ।

अत्रिः—संध्यात्रयं तु कर्तव्यं द्विजेनात्मविदा सदा । इति ।

---

१ °णं तु ख. पाठः । २ क. नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र संध्यापदं स...
कर्मनाम दर्शपूर्णमासादिवत् । ...
प्रधानम्—

संध्यामुपासते ये तु सत...
विधूतपापास्ते यान्ति ब्रह्म...

इति फलसंबन्धात् । अतो रणेऽर्जुनादिभिरङ्गेष्व...
मात्रं प्रधानमकारि इति ।

भारते— ते तथैव महाराज दंशिता रणमूर्धनि ।
संध्यागतं सहस्रांशुमादित्यमुपतस्थिरे ॥ [इति ।

तथाच] तैत्तिरीये—" उद्यन्तमस्तं यन्तमादित्यमभिध्यायन्कुर्वन्ब्राह्मणो विद्वान्सकलं भद्रमश्नुतेऽसावादित्यो ब्रह्मेति ब्रह्मैव सन् ब्रह्माप्येति य एवं वेद " इति ।

कुर्वन्गायत्रीजपं भद्रमीप्सितं फलं ब्रह्म वेत्यादि । अज्ञानाज्जीवतां प्राप्तोऽनेन ध्यानेन ब्रह्माप्नोतीत्यर्थः ।

व्यासः— संध्येति सूर्यगं ब्रह्म संधानाद्विभागतः ।
ब्रह्माद्यैः सकलैर्भूतैः स्तम्बान्तैः सच्चिदात्मनः ॥
तस्य दासोऽहमस्मीति सोऽहमस्मीति वा मतिः ।
भवेदुपासकस्येति ह्येवं बहुविदो विदुः ॥

आदित्यस्यैव कालभेदेन नामान्याह स एव—
गायत्रीनाम पूर्वाह्णे सावित्री मध्यमे दिने ।
सरस्वती च सायाह्ने सैव संध्या त्रिषु स्मृता ॥ इति ।

संधिकालोपास्यत्वात्संध्येति माधवः । सम्यग्ध्येयत्वात्संध्येति नृसिंहः । उभयथा ध्येयः सूर्य एव ।

[वर्णविशेषः] स्मृत्यन्तरे दर्शितः—
गायत्री तु भवेद्रक्ता सावित्री शुक्लवर्णिका ।
सरस्वती तथा कृष्णा उपास्या वर्णभेदतः ॥ इति ।

तत्रैव— गायत्री ब्रह्मरूपा तु सावित्री रुद्ररूपिणी ।
सरस्वती विष्णुरूपा उपास्या रूपभेदतः ॥ इति ।

व्यासः— न भिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह ।
सोऽहमस्मीत्युपासीत विधिना येन केनचित् ॥ इति ।

---

१ क. नास्ति । २ 'येष्वाध्ये' क. पाठः । ३ क. नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कादिषु [illegible] मविलोमतः ।
...दीनाम् [illegible] दीर्घं तपःक्षयः ॥
" [illegible] त्रिपुण्ड्रं धारयेद्द्विजः ।
... [illegible] प्रमाणेन ब्राह्मणानां त्रिपुड्रकम् ॥
... [illegible] नृपाणां चतुरङ्गुल्यं वैश्यानां व्यङ्गुलं तथा ।
शूद्राणामथ सर्वेषामेकाङ्गुल्यं त्रिपुड्रकम् ॥ इति ।

तत्रैव— त्रिपुड्रं ब्राह्मणो विद्वान्मनसाऽपि न लङ्घयेत् ।
स्मृत्या विधीयते यस्मात्तत्त्यागी पतितो भवेत् ॥
त्रिपुण्ड्रेण विना येन विप्रेण यदनुष्ठितम् ।
न तद्ध्यानं न तज्ज्ञानं न तद्दानं जपो न सः ॥

संग्रहे— ये भस्मधारिणं दृष्ट्वा वाचा निन्दन्ति मानवाः ।
तेषां शूद्रेण संभूतिरनुमेया विपश्चिता ॥ इति ।

[नारदः— मद्यं पीत्वा गुरुदारांश्च गत्वा
स्वर्णस्तेयं ब्रह्महत्यां च कृत्वा ।
भस्मच्छन्नो भस्मशय्याशयानो
रुद्रं ध्यायन्मुच्यते पातकेभ्यः ॥ इति ।]

॥ इति तिलकम् ॥

अथ संध्यावन्दनम् ।

तस्य च नित्यतामाह मरीचिः—
संध्या येन न विज्ञाता संध्या येनानुपासिता ।
जीवमानो भवेच्छूद्रो मृतः श्वा चाभिजायते ॥ इति ।

शुचित्वसंपादनेन कर्माङ्गतामाह दक्षः—
संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।
यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत् ॥ इति ।

अङ्गता च प्रातःसंध्याया एवेति केचित् । युक्तं तु वचनान्तरप्राप्ततत्तत्संध्याकालोत्तरभावितत्तत्कर्माङ्गता संध्यात्रयस्याप्यविशेषात् ।

अत्रिः—संध्यात्रयं तु कर्तव्यं द्विजेनात्मविदा सदा । इति ।

---

१ °णं तु ख. पाठः । २ क. नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र संध्यापदं स[illegible]
कर्मनाम दर्शपूर्णमासादिवत् । [illegible]
प्रधानम्—

संध्यामुपासते ये तु सत[illegible]
विधूतपापास्ते यान्ति ब्रह्म[illegible]

इति फलसंबन्धात् । अतो रणेऽर्जुनादिभिरङ्गेष्व[illegible]
मात्रं प्रधानमकारि इति ।

भारते— ते तथैव महाराज दंशिता रणमूर्धनि ।
संध्यागतं सहस्रांशुमादित्यमुपतस्थिरे ॥ [इति ।

तथाच] तैत्तिरीये—" उद्यन्तमस्तं यन्तमादित्यमभिध्यायन्कुर्वन्ब्राह्मणो विद्वान्सकलं भद्रमश्नुतेऽसावादित्यो ब्रह्मेति ब्रह्मैव सन् ब्रह्माप्येति य एवं वेद " इति ।

कुर्वन्गायत्रीजपं भद्रमीप्सितं फलं ब्रह्म वेत्यादि । अज्ञानाज्जीवतां प्राप्तोऽनेन ध्यानेन ब्रह्माप्नोतीत्यर्थः ।

व्यासः— संध्येति सूर्यगं ब्रह्म संधानादविभागतः ।
ब्रह्माद्यैः सकलैर्भूतैः स्तम्बान्तैः सच्चिदात्मनः ॥
तस्य दासोऽहमस्मीति सोऽहमस्मीति वा मतिः ।
भवेदुपासकस्येति ह्येवं बहुविदो विदुः ॥

आदित्यस्यैव कालभेदेन नामान्याह स एव—
गायत्रीनाम पूर्वाह्णे सावित्री मध्यमे दिने ।
सरस्वती च सायाह्ने सैव संध्या त्रिषु स्मृता ॥ इति ।

संधिकालोपास्यत्वात्संध्येति माधवः । सम्यग्ध्येयत्वात्संध्येति नृसिंहः । उभयथा ध्येयः सूर्य एव ।

[वर्णविशेषः] स्मृत्यन्तरे दर्शितः—
गायत्री तु भवेद्रक्ता सावित्री शुक्लवर्णिका ।
सरस्वती तथा कृष्णा उपास्या वर्णभेदतः ॥ इति ।

तत्रैव— गायत्री ब्रह्मरूपा तु सावित्री रुद्ररूपिणी ।
सरस्वती विष्णुरूपा उपास्या रूपभेदतः ॥ इति ।

व्यासः— न भिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह ।
सोऽहमस्मीत्युपासीत विधिना येन केनचित् ॥ इति ।

---

१ क. नास्ति । २ 'येध्याध्ये' क. पाठः । ३ क. नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...तकात् ।
...यन्तं त्रायते ततः ॥
...कादिषु ... वित्री परिकीर्तिता ।
...ादीना... वा वाग्रूपत्वात्सरस्वती ॥ इति ।
...त्रीपदस्य मन्त्रे प्रयोगस्तु प्रतिपाद्यादित्यनेन सहा-
...नृसिंहः ।

स्मृत्यन्तरे—

गायत्रीं चिन्तयेद्यस्तु हृत्पद्मे समुपस्थिताम् ।
धर्माधर्मविनिर्मुक्तः स याति परमां गतिम् ॥ इति ।

॥ इति संध्यास्वरूपम् ॥

अथ संध्याकालः ।

धर्मसारे—

उत्तमा तारकोपेता मध्यमा लुप्ततारका ।
संध्यायां गौण-मुख्यकालाः । अधमा सूर्यसहिता प्रातःसंध्या त्रिधा मता ॥
उत्तमा सूर्यसहिता मध्यमा लुप्ततारका ।
कनिष्ठा तारकोपेता सायंसंध्या त्रिधा मता ॥ इति ।

अग्निस्मृतौ—

वर्णविशेषेण कालविशेषः । संध्याकालः प्रागुदयाद्विप्रस्य द्विमुहूर्तकः ।
क्षत्रियस्य तदर्धं स्यात्तदर्धं स्याद्विशोऽप्युत ।
तथैवास्तमिते तेषां वैश्यादीनामयं क्रमः ॥ इति ।

दक्षः— रात्र्यन्तयामनाडी द्वे संध्याकालोऽयमुच्यते ।
दर्शनाद्रविरेखायास्तदन्तो मुनिभिः स्मृतः ।
अध्यर्धयामादासायं संध्या माध्याह्निकीष्यते ॥ इति ।

॥ इति संध्याकालः ॥

अथ देशः ।

व्यासः— गृहे त्वेकगुणा संध्या गोष्ठे दशगुणा स्मृता ।
शतसाहस्रिका नद्यामनन्ता विष्णुसन्निधौ ॥
वहिः संध्या दशगुणा गर्तप्रस्रवणेषु च ।
ख्याते तीर्थे शतगुणा ह्यनन्ता जाह्नवीजले ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

शातातपः—

अनृतं मद्यगन्धं …

पुनाति वृषलस्यान्नं …

विहरणलोपप्रसंगेन बहिर्गमने अव…

संध्यात्रयं तु कर्तव्यं द्विजेना…

उभे संध्ये तु कर्तव्ये ब्राह्मणैस्तु गृहेष्…

॥ इति देशः ॥

अथ प्रयोगः ।

शौनकः—

प्राणानायम्य विधिवद्वाग्यतः संयतेन्द्रियः ।
अथ संध्यामुपासिष्य इति संकल्प्य मार्जयेत् ॥
तिसृभिर्मार्जनं कुर्यात् आपोहीति कुशोदकैः ।
पादे पादे क्षिपेदापो मूर्ध्नि प्रणवसंयुताः ॥

स एव— नासिकामङ्गुलीभिश्च तर्जनीमध्यमादृते ।
सव्येन तु समाकृष्य दक्षिणेन विसर्जयेत् ॥
प्रणवं व्याहृतीः सप्त गायत्रीं शिरसा सह ।
त्रिःपठेदायतप्राणः प्राणायामः स उच्यते ॥
शनैर्नासापुटे वायुमुत्सृजेन्न तु वेगतः ।
न कम्पयेच्छरीरं तु स योगी परमो मतः ॥ इति ।

ऋग्विधाने—

नवप्रणवयुक्तेन आपोहिष्ठा त्र्यृचेन तु ।
संवत्सरकृतं पापं मार्जनान्ते विनश्यति ॥

ऋक्त्रये प्रतिपादमादौ प्रणवे सति नव प्रणवाः ।

ब्रह्माप्याह प्रयोग पारिजाते—

आपोहिष्ठादिभिः पादैः शिरस्यंसे च विप्रुषः ।
यस्य क्षयायेत्यधस्तात्क्षिप्त्वाद्भिः परिषेचयेत् ॥ इति ।

स एव— धाराच्युतेन तोयेन संध्योपास्तिर्विगर्हिता ।

कथं तर्हीत्यत आह—

नद्यां तीर्थे ह्रदे वापि भाजने मृन्मयेऽपि वा ।
औदुम्बरे च सौवर्णे राजते दारुसंभवे ।
कृत्वा तु वामहस्ते वा संध्योपास्तिं समाचारेत् ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

। पात्राभावे वामहस्तेन न

कादिषु [illegible] तु संध्यामुपासते ।
[illegible]दीनाम् [illegible] या असुरास्तैस्तु तर्पिताः ॥ इति स्मृतेः
" [illegible] कमादाय "सूर्यश्च" इति पिबेत् सूर्यश्च मा
[illegible] मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यद्रात्र्या पापमकार्ष
[illegible] हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु यत्किंच
दुरितं मयि इदमहं मा ममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा इति
समन्त्राचमनम् ॥

अथ मध्याह्ने—" आपः पुनंतु " इति समन्त्राचमनम् ।

आपः पुनंतु पृथिवीं पृथिवी पूता पुनातु माम् ।
पुनंतु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम् ॥
यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम ।
सर्वं पुनातु मामापो सतां च प्रतिग्रहं स्वाहा ॥ इत्येवम् ।

सायं विशेषः—सूर्यश्चेतिमन्त्रे सूर्यस्थाने अग्निपदं रात्र्याः स्थाने अहः सत्ये ज्योतिषीति चान्ते जुहुयादिति ।

भगवांश्चाह—

सूर्यश्चेत्यनुवाकेन प्रातःकाले पिबेदपः ।
अग्निश्चेत्यनुवाकेन सायंकाले पिबेदपः ।
आपः पुनंतु मध्याह्ने मन्त्राचमनमाचरेत् ॥ इति ।

सूर्यश्चेति मन्त्रस्य याज्ञवल्क्युपनिषदृषिः[१] सूर्यमन्युमन्युपतयो रात्रिश्च देवता गायत्रीपङ्क्तिविराजश्छन्दांसि रक्षन्तामित्यन्ता गायत्री, दुरितं मयीत्यन्ता पङ्क्तिः "पञ्चपदा पङ्क्तिः" इति श्रुतेः । स्वाहेत्यन्ता दशाक्षरपादद्वयोपेता विराट् दशाक्षराविराट् इति श्रुतेः । प्रकृतिश्छन्द इति मदनः । आपः पुनन्वित्यस्य याज्ञवल्क्युपनिषदृषिः पूतो वा आपः पृथिवी ब्रह्मणस्पतिर्ब्रह्मदेवता अष्टपदा अष्टिछन्दः आचमने विनियोगः ।

इति मन्त्राचमनम् ।

---

१ अत्र 'याज्ञवल्क्य उपनिषदृषिः' इति केचित् पठन्ति । केचिच्च तैत्तिरीयाणां महानारायणोपनिषदि सूर्यश्चेत्यादिमन्त्राणामाम्नानात् तस्याश्च याज्ञिक्युपनिषदितिसमाख्यानात्, याज्ञिक्युपनिषदृषिरिति पठन्ति । तत्रापि उपनिषत्पदस्य ऋषिसंज्ञान्तर्गतत्वं चिन्त्यम् । गृह्यपद्दे तु ब्रह्माऋषिरित्युक्तम् । स्वगृह्योक्तत्वाद्वचैस्तदेवाश्रयितुं युक्तमिति प्रतिभाति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ द्वि

कात्यायनः—

प्रणवो भूर्भुवःस्वश्च ग
अब्देवता ऋचश्चैव चतुर्थमि

भगवान्—

प्रणवेन व्याहृतिभिर्गायत्र्या प्रणवाद्यया ।
आपोहिष्ठेतिसूक्तेन मार्जनं हि चतुर्थकम् ॥

प्रजापतिः—

ऋगन्ते मार्जनं कुर्यात्पादान्ते वा समाहितः ।
अर्धर्चान्तेऽथवा कुर्याच्छिष्टानां मतमीदृशम् ॥

अथ पापनिरसनम् ।

भगवान्—

उद्धृत्य दक्षिणे हस्ते जलं गोकर्णवत्कृते ।
निःश्वासं नासिकाग्रे तु पाप्मानं पुरुषं स्मरेत् ॥
ऋतं चेति त्र्यृचंवाऽपि [द्रुपदां वा जपेदृचम् ।
दक्षनासापुटेनैव पाप्मानमपसारयेत् ।
तज्जलं नावलोक्याथ वामभागे क्षितौ क्षिपेत् ॥

द्रुपदा च वाजसनेयके—]

द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव ।
पूतं पवित्रेणेवाज्यमापः शुद्धं तु मैनसः ॥ इति ।

कात्यायनः—

करेणोत्सृज्य सलिलं घ्राणमासज्य तत्र च ।
जपेदनियतासुर्वा त्रिः सकृद्वाघमर्षणम् ॥ इति ।

आसज्य निरुध्य विकल्पः शक्ताशक्तविषयः

गृह्यपरिशिष्टे—" तदुदकमवीक्षमाणो वामतो भुवि तीव्रपातेन क्षिप्त्वा तं पाप्मानं वज्रहतं सहस्रधा दलितं भावयेत् " इति ।

स्मृत्यन्तरे—

ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयम् ।
सुरापानहृदायुक्तं गुरुतल्पकटिद्वयम् ॥

---

१ क. नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...ातकर्म् ।
...ुविलोचनम् ।
...कादिषु ... पापं विचिन्तयेत् ॥ इति ।
...ादीनाम् ...पुरुषनिरसनम् ॥

अथार्घ्यदानम् ।

... न प्रधानं फलसंबन्धाभावात् । गृह्यपरिशिष्टे—अथाचम्य दर्भपाणिः पूर्णमुदकाञ्जलिमुद्धृत्यादित्याभिमुखः स्थित्वा प्रणवव्याहृतिपूर्वया सावित्र्या त्रिर्निवेदयन्नुत्क्षिपेत्तदेवार्घ्यनिवेदनम् । असावादित्यो ब्रह्मेति प्रदक्षिणं परिपतन्परिषिच्याप उपस्पृशेत् इति ।

मध्याह्ने विशेषस्तत्रैव—अथाकृष्णीयया हंसवत्या वा त्रिःसकृद्वार्घ्यमुत्क्षिपेत् ।

आश्वलायनः—

ततस्तिष्ठञ्जलं गृह्य प्राङ्मुखोऽञ्जलिना स्मरेत् ।
स्थानादौ सुस्थितं तेजः स्फटिकज्योतिषा समम् ॥
उत्तार्य तच्च संप्राप्तं दक्षिणेन यथाञ्जलिम् ।
व्याहृत्यादिजपेन्मत्रं स्मृत्वैवं परितो रवेः ॥
मन्देहान्युध्यतः क्रूरान्निक्षिपेत्तेष्वथाञ्जलिम् ।
षोडषाक्षरमत्रेण पुनराकृष्य सत्वरः ॥
पुनर्जलं गृहीत्वैवं तेजोमन्त्रं च संस्मरन् ।
एवं त्रिवारमावृत्त्य दग्ध्वा तानसुरान्द्विजः ॥
मन्त्रेणाकृष्य तत्तेजः स्थानादौ स्थापयेत्स्मरन् ।
पूर्ववद्वाममार्गेण स्मृत्वा संस्थाप्य चात्मनि ॥
प्रदक्षिणं समावर्त्य जलं गृह्याचमेत्ततः ॥ इति ।

स्थानादावाधारमण्डपे नासादक्षिणरन्ध्रेण आधारमण्डपाज्ज्योतिरञ्जलिमागतं मन्देहाख्यराक्षसनाशाय तोयेन सह क्षिप्तं गायत्रीशिरसा नासावामरन्ध्रेण पुनराधारमण्डपे स्थापयामीति सर्वतात्पर्यार्थः ।

शोडशाक्षरमत्रमाह व्यासः—

शोडशाक्षरकं ब्रह्म गायत्र्यास्तु शिरः स्मृतम् ।
"ॐ आपोज्योतिः" इत्येष मन्त्रो वै तैत्तिरीयके ॥ इति ।

---

१ स्थितं ज्योतिर्नासादक्षिणरन्ध्रेण पुन° क. पाठः ।

भि
ऋ
तद्
शि
या
वौ
ऽस
वि
ति
सा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संग्रहे— मुक्तहस्तेन दातव्

तर्जन्यङ्गुष्ठयोगे

राक्षसी मुद्रिकार्वेण त

जलेष्वर्घ्यं प्रदातव्यं जला

संप्रोक्ष्य वारिणा सम्यक् ततोऽर्घ्यं तु

अथ गायत्रीजपः ।

याज्ञवल्क्यः—

जपन्नासीत सावित्रीं प्रत्यगातारकोदयात् ।
संध्याप्राक् प्रातरेवं हि तिष्ठेदासूर्यदर्शनात् ॥
सायं प्रत्यङ्मुखासीन आनक्षत्रोदयं जपेत् ।

प्रातस्तु प्राङ्मुखस्तिष्ठन्नासूर्योदयामित्यर्थः ।

गृह्यपरिशिष्टे—"शुचौ देशे दर्भाम्भसोक्षिते दर्भान्संस्तीर्य व्याहृतिभिरुपविश्य प्राणायामत्रयं कृत्वा आत्मानं व्याहृतिभिरभ्युक्ष्य सावित्र्या ऋषिदैवतच्छन्दांस्यनुस्मृत्य षड्भिस्तदङ्गमन्त्रैर्यथाङ्गमात्मनि न्यस्यात्मानं तद्रूपं भावयेत्" तद्यथा "तत्सवितु" र्हृदयानम इति हृदये । " वरण्यं " शिरसे स्वाहेति शिरसि । "भर्गो देवस्य" शिखायै वौषडिति शिखायाम् । "धीमहि" कवचायहुमित्युरसि । " धियो यो नो " नेत्रत्रयाय वौषडिति नेत्रललाटेषु न्यस्याथ "प्रचोदयात्" अस्त्रायफडिति करतलेऽस्त्रं प्राचादिषु दशसु न्यसेदेषोऽङ्गन्यासः । एवमप्येके नेच्छन्ति स हि विधिरवैदिक इति । अथ मन्त्रदेवतां ध्यात्वा 'आगच्छ वरदे देवि' इत्यावाह्य तिष्ठन्नर्धनक्षत्रेष्वामण्डलदर्शनान्मन्त्रार्थमनुसंदधानः प्रणवव्याहृतिपूर्विकां सावित्रीं जपेत् ॥ इति ।

भगवान्—

सायं प्रातश्च मध्याह्ने सावित्रीं वाग्यतो जपेत् ।
सहस्रपरमां देवीं शतमध्यां दशावराम् ॥
गायत्रीं संस्मरेद्धीमान्हृदि वा सूर्यमण्डले ।
मनःसंतोषणं शौचं मौनं मन्त्रार्थचिन्तनम् ।
अव्यग्रत्वमनिर्वेदो जपसंपत्तिहेतवः ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...विंशतिमेव वा ।
...कादिषु ... त्रिकालेषु जपेद्बुधः ।। इति ।
...ादीनाम्...
...

... कम्बलं चैव अजिनं पट्टमेव च ।
...दारुजं तालपत्रं वा आसनं परिकल्पयेत् ।।
कृष्णाजिने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि ।
जपे आसनानि । वशाजिने व्याधिनाशः कम्बले दुःखमोचनम् ।
अभिचारे नीलवर्णं रक्तं वश्यादिकर्मणि ।
शान्तिके कम्बलं प्रोक्तं सर्वेष्टं चित्रकम्बले ।। इति ।

वशा वन्ध्या सा च मृगी व्याघ्री वा । उपरिस्थितेः स एव—

वंशासने तु दारिद्र्यं पाषाणे व्याधिसंभवः ।
धरण्यां दुःखसंभूतिर्दौर्भाग्यं छिद्रदारुजे ।
तृणे धनयशोहानिः पल्लवे चित्तविभ्रमः ।। इति ।

उपवेशने मन्त्र उक्तो गायत्रीकल्पे—

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ।। इति ।

ऋष्याद्याह—

पृथिव्या मेरुपृष्ठं तु ऋषिरित्यभिधीयते ।
सुतलं छन्द इत्याहुः कूर्मो वै देवता स्मृता ।
मेरोरारोहणे तस्य विनियोगः प्रकीर्तितः ।। इति ।

विश्वामित्रः—

उत्तमं मानसं जाप्यमुपांशु मध्यमं विदुः ।
अधमं वाचिकं प्राहुः सर्वमन्त्रेषु वै द्विजाः ।। इति ।

वृद्धमनुः—

वस्त्रेणाच्छाद्य तु करं दक्षिणं यः सदा जपेत् ।
तस्य तत्सफलं जप्यं तद्धीनमफलं स्मृतम् ।। इति ।

गौतमः—गच्छतस्तिष्ठतो वापि स्वेच्छया कर्म कुर्वतः ।
अशुचेर्वा विना संख्यां तत्सर्वं निष्फलं भवेत् ।। इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बौधायनः—नाभेरधःसंस्पर्शं व

हारीतः—

रजतेन्द्राक्षकैर्माला तथैवा

शतं स्याच्छङ्खमणिभिः प्रवा

स्फटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते

पद्माक्षैर्दशलक्षं तु सौवर्णैः कोटिरुच्यते ।

कुशग्रन्थ्या च रुद्राक्षैरनन्तफलमुच्यते ॥ इति ।

प्रजापतिः—

अष्टोत्तरशतं कुर्याच्चतुःपञ्चाशिकां तथा ।

सप्तविंशतिकां वाऽपि ततो नैवाधिका मता ॥

गोभिलः—

आयावित्यनुवाकस्य वामदेव ऋषिः स्मृतः ।

आनुष्टुभं भवेच्छन्दो वाग्देवी देवता स्मृता ।

आवाहने तु गायत्र्या विनियोगः प्रकीर्तितः ॥

व्यासोऽपि—

आवाहयेत्तु गायत्रीं सर्वपापप्रणाशिनीम् ।

आगच्छ वरदे देवि जपे मे सन्निधौ भव ।

गायन्तं त्रायसे यस्माद्गायत्री तेन सोच्यते ॥ इति ।

सप्तव्याहृतीनां देवताद्याह वृद्धपराशरः—

अग्निर्वायुस्तथा सूर्यो वृहस्पत्याप एव च ।

इन्द्रश्च विश्वेदेवाश्च देवताः समुदीरिताः ॥

गायत्र्युष्णिगनुष्टुप् च वृहती पङ्क्तिरेव च ।

त्रिष्टुप् च जगती चैव छन्दांस्येतान्यनुक्रमात् ॥

[भरद्वाजः कश्यपश्च गौतमोऽत्रिस्तथैव च ।

विश्वामित्रो जमदग्निर्वसिष्ठ ऋषयः क्रमात् ॥ इति ।]

अथोपस्थानम् ।

गृह्यपरिशिष्टे—“ जातवेदसे सुनवामसोमं ” “ तच्छंयोरावृणीमहे ” “ नमो ब्रह्मणे नमो अस्त्वग्नये ” इत्युपस्थाय प्रदक्षिणं दिशः साधिपा-

१ ‘राजतैर्द्रांक्षकैः’ इति पाठः । २ क. नास्ति.

६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

…त्य सर्वाभ्यो देवताभ्यश्च नम-

…कादिषु … यां पर्वतमूर्धनि ।
…गादीनाम् … गच्छ देवि यथासुखम् ।। इति ।

… द्रिन्नो अपि वातयमनः' इत्युक्त्वा शान्तिं च त्रिरुच्चा-
…मन्

आसत्यलोकात्पातालादालोकालोकपर्वतात् ।
ये सन्ति ब्राह्मणा देवास्तेभ्यो नित्यं नमो नमः ।।

इति नमस्कृत्य भूमिमुपसंगृह्य गुरून्वृद्धांश्चोपसंगृह्णीयात् । एवं सायम्—" इति ।

मध्याह्नसंध्यायां विशेषस्तत्रैव— "उद्वाहुरुदङ्मुखः "उदुत्यं जातवेदसं" "चित्रं देवानां" इति सूक्ताभ्यामादित्यमुपस्थाय जपमासीनो यथेष्टकालं कुर्यादित्येष संध्याविधिर्व्याख्यातः" इति ।

दैवाद्यदि माध्याह्निकं दिवा न कृतं तत्र विशेषः स्मर्यते—

रात्रौ प्रहरपर्यन्तं दिवाकृत्यानि कारयेत् ।
अवगाहं ब्रह्मयज्ञं सौरजप्यं च वर्जयेत् ।। इति ।

सायंप्रातःकालयोरुपस्थाने विशेषमाह भगवान्—

नमो ब्रह्मण इत्येतां त्रिरुक्त्वाथ दिशो नमेत् ।
इमं मे वरुण तत्वेति सायंकाले विशेषतः ।
मित्रस्य चर्षणी द्वाभ्यां प्रातःकाले विशेषतः ।। इति ।

आश्वलायनस्मृतौ तु—

ऋग्भिश्चतसृभिर्मैत्रैर्गायत्रैरेव बह्वृचः । इत्युक्तम् ।

मैत्रैर्मित्रदैवत्यैः "मित्रस्य चर्षणी धृत" इत्यादिभिरित्यर्थः ।

माधवीये नारायणः—

वारुणीभिरथादित्यमुपस्थाय प्रदक्षिणम् ।। इति ।

भरद्वाजः—

सूतके मृतके वापि प्राणायाममन्त्रकम् ।
तथा मार्जनमन्त्रांस्तु मनसोच्चार्य मार्जयेत् ।।
गायत्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेत् ।
मार्जनं तु न वा कार्यमुपस्थानं न चैव हि ।। इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गायत्र्यपि दशवारं जप्या ।

आपन्नश्चाशुचिः का

इत्याश्वलायनोक्तेः । आपन्न आपद्

न्तरेष्वसामर्थ्येऽपि अर्घ्यप्रक्षेप आवश्यकः

जलाभावे महामार्गे वन्धने त्वशुचावपि ।
उभयोः संध्ययोः काले रजसावार्घ्यमुत्सृजेत् ॥ इ

अशुचौ आशौच इत्यर्थः ।

अग्निश्चेति अस्यार्थः—मा इति मां मन्युः क्रोधः तदभिमानिनी देवते- त्यौपनिषदाः । मन्युपतयो जितक्रोधाः अग्न्यादयो मा रक्षन्तामित्य- न्वयः । शिश्ना शिश्नेन "सुपां सुलुग्" इति डादेशः । इदं पापं तत्कारणं चाहंकारम् अमृतयोनौ मोक्षहेतौ अग्न्याख्ये ज्योतिषि परब्रह्मणि जुहो- मि । तदर्थमिदं तोयं स्वाहा मदीये जाठराग्नौ हुतमस्तु । एवं सूर्यश्चेत्यपि ।

आपः पुनन्त्वित्यादि आपः पृथ्वी मच्छरीरम् यच्छरीरं सा पृथ्वी- त्यारण्यकात् । साच मामात्मानं पुनातु । किंच ब्रह्मणो वेदस्य पतिः परमात्मा पुनन्तु पुनातु व्यत्ययेन वहुवचनम् । ब्रह्म वेदः पूता पूतमि- त्यर्थः । "सुपां सुलुक्" इति पूर्वसवर्णः । सर्वं परिहृत्येति शेषः । मां पुनन्तु स्वाहा जाठराग्नौ हुतमस्तु ।

प्रणवसप्तव्याहृतिगायत्रीतच्छिरसां संक्षेपतोऽर्थः कथ्यते—ॐ ब्रह्म, भवन्त्यस्माद्भूतानीति भूः, भावयति स्थापयति विश्वमिति भुवः, गुणा- भावच्छान्दसः । सुष्ठु अर्यते प्राप्यते तदिति स्वः, महः पूज्यं, जन जनने 'तप आलोचने' सत्यं कालत्रयावाध्यं, सवितुः देवस्य सूर्यस्य, वरेण्यं भजनीयं भर्गः संसारभर्जनात् ज्योतीरूपं धीमहि ध्यायेम । यः स सविता नो धियः प्रचोदयात् प्रेरयेदिति लिङ् । आपः व्यापकं, ज्योतिश्चिद्रूपं, रसः सुखं, अमृतं मोक्षः, ईदृग्ब्रह्मेति ॐ अङ्गीकुर्वे चिन्त- यामीति यावत् ।

॥ इति संध्याप्रकरणम् ॥

अथ काम्यजपाः ।

वसिष्ठः—

तमुष्टुहीत्यृचं वापि सद्योजातादि पञ्चकम् ।
पञ्चाक्षरं महामन्त्रं जपेदनुदिनं सुधीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

... पूर्णजीवनम् ।
... लभते शिवशासनात् ॥ इति ।
...कादिषु ...
...गादीनाम् ...
... ...रिः पावमानीभिरेव च ।
... ...शु पापानि कामांश्च निखिलान्लभेत् ॥
... ...द्रैर्विशेषतो घोरान्ब्रह्महत्यादिकानपि ।
क्षपयेत्पौरुषेणापि कामांश्चेयर्ति दुर्लभान् ॥

इयर्ति प्राप्नोति ।

शतरुद्रेण जप्तेन चास्यवामीयकेन वा ।
मोक्षमृच्छत्यसंदेहं किमन्यदधिकं ततः ॥ इति ।

ऋग्विधाने—

विष्णोर्नुकं जपन्सूक्तं विष्णुरेव भविष्यति ।

स्नानकाले जप्यमाह व्यासः—

द्रुपदा नाम गायत्री वेदे वाजसनेयके ।
सकृदन्तर्जले जप्त्वा ब्रह्महत्यां व्यपोहति ॥ इति ।

साच पूर्वमघमर्षणप्रसङ्गेनालेखि ।

सुमन्तुः—हंसः शुचिषदित्येतामृचमन्तर्जले जपन् सर्वस्मात्पापात्प्रमुच्यतेऽपि वा व्याहृतीरन्तर्जले जपन्सर्वस्मात्पापात्प्रमुच्यते ॥ इति । गौतमः—अपि वा गायत्रीं पच्छोर्धर्चशः समस्तामपि त्रिरन्तर्जले जपन्सर्वस्मात्पापात्प्रमुच्यतेऽपि वा प्रणवं त्रिरन्तर्जले जपन्सर्वस्मात्पापात्प्रमुच्यते । इति ।

॥ इति काम्यजपाः ॥

अथ होमविधिः ।

दक्षः— संध्याकर्मावसाने तु स्वयं होमो विधीयते ॥ इति ।

अशक्तौ स एवाह—

ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः ।
एतैरपि हुतं यत्स्यात्तद्धुतं स्वयमेवहि ॥ इति ।

विट्पतिर्जामाता ।

आश्वलायनः—

स्वयं पत्न्यपि वा पुत्रः कुमार्यन्तेवासी वा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कात्यायनः—

असमक्षं तु दम्पत्यो...

द्वयोरप्यसमक्षं तु भवेद्धु...

उभयोः संनिधौ मुख्यम् अन्यतरसन्निध...

प्रातर्होमकालमाहमनुः—

उदितेऽनुदिते चैव समयाध्युषिते तथा ॥ इ...

सायंहोमकालमाह कात्यायनः—

यावत्सम्यङ् न भाव्यन्ते नभस्यृक्षाणि सर्वतः ।

लोहितत्वं तु नापैति तावत्सायं तु हूयते ॥

यत्त्वाश्वलायनः—

संगवान्तः प्रातः प्रदोषान्तः सायमिति तद्गौणकालपरम् ।

यदपि वौधायनः—

आसायं कर्मणः प्रातराप्रातः सायकर्मणः ।

आहुतिर्नातिपद्येत पार्वणं पार्वणान्तरात् ॥ इति ।

तद्गौणतरपरम् । पार्वणं स्थालीपाको, दर्शेष्टिः पौर्णमासेष्टिश्च ।

पक्षहोममाह मरीचिः—

शरीरापद्रवेद्यत्र भयाद्वार्तिः प्रजायते ।

तथान्यास्वपि चापत्सु पक्षहोमो विधीयते ॥ इति ।

कात्यायनः—

विहायाग्निं सभार्यश्चेत्सीमामुल्लङ्घ्य गच्छति ।

होमकालात्यये तस्य पुनराधानमिष्यते ॥

होमश्च स्वगृह्योक्तविधिना वोध्यः ।

भरद्वाजः—

होमं वैतानिकं कृत्वा स्मार्तं कुर्याद्विचक्षणः ।

स्मृतीनां वेदमूलत्वात्स्मार्तं केचित्पुरा विदुः ॥ इति ।

याज्ञवल्क्यः—

कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही ।

दायकालाहृते वापि श्रौतं वैतानिकाग्निषु ॥

वैतानिकाः गार्हपत्यादयः स्मार्तपदं गृह्योक्तकर्मपरम् ।

वैवाहिकेऽग्नौ कुर्वीत गार्ह्यं कर्म यथाविधि ।

पञ्चयज्ञविधानं च पक्तिंचान्वाहिकीं गृही ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...कीम् । अन्यत्तु स्मार्ते ग्रहमख-
कादिषु ... । अत एत विज्ञानेश्वरेण विनाय-
कादीनां ... हशान्तौ तदीये स्मार्ताग्निलेखने तु
...

...कन्धने वाग्नौ सुसमिद्धे हुताशने ।
...विधूमे लेलिहाने च होतव्यं कर्मसिद्धये ॥
योऽनर्चिषि जुहोत्यग्नौ व्यङ्गारे चैव मानवः ।
मन्दाग्निरामयावी च दरिद्रश्चाभिजायते ॥ इति ।

॥ इति होमप्रकरणम् ॥

अथ नित्यदानम् ।

महाभारते—

एकस्मिन्नप्यतिक्रान्ते दिने दानविवर्जिते ।
दस्युभिर्मुषितस्येव युक्तमाक्रन्दितं भृशम् ॥ इति ।

तस्माद्विभवानुसारेण पूगीफलादिकमपि प्रत्यहं देयमिति नृसिंहः ।

अथ मङ्गलदर्शनम् ।

नारदः— लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ॥

मनुः— अग्निचित्कपिला सत्री राजा भिक्षुर्महोदधिः ।
दृष्टमात्राः पुनन्त्येते तस्मात्पश्येत्सदा बुधः ॥ इति ।

॥ इत्यष्टधा विभक्तस्याह्न आद्यभागकृत्यम् ॥

अथ द्वितीयभागकृत्यम् ।

दक्षः— द्वितीये च तथा भागे वेदाभ्यासो विधीयते ॥ इति ।

चतुर्विंशतिमते—

वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः ।
तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ॥ इति ।

कौर्मे— जपेदध्यापयेच्छिष्यान्धारयेद्वा विचारयेत् ।
अवेक्षेत च शास्त्राणि धर्मादीनि द्विजोत्तमः ॥ इति ।

दक्षः— समित्पुष्पकुशादीनां स कालः समुदाहृतः ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDP

अथ तृतीय

दक्षः— तृतीये च तथा भागे

पोष्यवर्ग स एवाह—

माता पितृ...गुरुर्भार्या प्रजाहीनः...

अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृतः ।

पोष्यवर्गार्थसिद्ध्यर्थं धनमिच्छेत बुद्धिमान् ॥

आत्मनेपदमार्षम् ।

याज्ञवल्क्यः—

कुसूलकुम्भीधान्यो वा त्र्याहिकोऽश्वस्तनोऽपि वा ।

जीवेद्वापि शिलोञ्छेन श्रेयानेषां परः परः ॥ इति ।

स्वकुटुम्बभोजनद्वादशदिनपर्याप्तधान्यस्याधारपात्रं कुसूलम् । षडहपर्याप्तधान्याधारः कुम्भी । वल्लरीणामुपादानं शिलम् । कणोपादानमुञ्छमिति ।

याज्ञवल्क्यः—

न राज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्तिनः ॥ इति ।

नारदः— शुचीनामशुचीनां तु सन्निपातो यथाम्भसाम् ।

समुद्रे समतां याति तथा राज्ञां धनागमः ॥

यथाग्नौ संस्थितं सर्वं शुद्धिमायाति काञ्चनम् ।

एवं प्रतिग्रहाः सर्वे शुचितां यान्ति राजनि ॥ इति ।

एतद्धार्मिकराजप्रतिग्रहपरम् ।

याज्ञवल्क्यः—

कुशाः शाकं पयो मत्स्याः पुष्पं गन्धा दधि क्षितिः ।

मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि च ॥

अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्मणः ।

अन्यत्र कुलटाषण्ढपतितेभ्यस्तथा द्विजः ॥

अथ चतुर्थभागकृत्यम् ।

दक्षः— चतुर्थे तु तथा भागे स्नानार्थं मृदमाहरेत् ।

तिलपुष्पकुशादींश्च स्नायाच्चाकृत्रिमे जले ॥

गृह्यपरिशिष्टे—अथ मध्यंदिने तीर्थमेत्येत्युपक्रम्याथ वरुणप्रार्थनादितर्पणान्तेनोक्तेन विधिना स्नायान्नास्मिन्प्रागब्रह्मयज्ञतर्पणाद्वस्त्रं निष्पीडयेत् । पुत्रादयो ह्यन्ते तथा तर्प्या इति शङ्खः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...यमां स्नानकर्मणि ।
...कादिषु ... ामुपासीत यथाविधि ॥ इति ।
...ादीनां ... शपः इति स्मृतिचन्द्रिकायाम् । माध्याह्नि
" ... ... ।
... ...मेवा ... ।

अथ पञ्चमहायज्ञाः ।

याज्ञवल्क्यः—

बलिकर्म स्वधा होमः स्वाध्यायाऽतिथिसत्क्रियाः ।
भूतपित्रमरब्रह्ममनुष्याणां महामखाः ॥

आश्वलायनगृह्ये—‘अथातः पञ्चमहायज्ञा देवयज्ञो, ब्रह्मयज्ञो, भूतयज्ञः, पितृयज्ञो, मनुष्ययज्ञ इति । तद्यदग्नौ जुहोति स देवयज्ञयः, स्वाध्यायमधीते स ब्रह्मयज्ञः, यद्बलिं करोति स भूतयज्ञः, यत्पितृभ्यो ददाति स पितृयज्ञः, यन्मनुष्येभ्यः स मनुष्ययज्ञ इति तानेतान्यज्ञानहरहः कुर्वीत’ इति । वीप्सयैते नित्याः ॥

व्यासः—

वैश्वदेवं प्रकुर्वीत स्वशाखाविहितं ततः ।
संस्कृतान्नैर्हि विविधैर्हविष्यव्यञ्जनान्वितैः ॥ इति ।

वैश्वदेवपदं भूतपितृयज्ञानां नाम व्यञ्जनमपि हविष्यमेव घृतादि तैलादि । तथा च

स एव—जुहुयात्सर्पिषाभ्यक्तं तैलक्षारविवर्जितम् ॥ इति ।

कौर्मे— शालाग्नौ लौकिके वाऽपि जले भूम्यामथापि वा ।
वैश्वदेवस्तु कर्तव्यो देवयज्ञः स वै स्मृतः ॥ इति ।

लौकिकशालाग्न्योः पाकतो व्यवस्थामाहाङ्गिराः—

यस्मिन्नग्नौ पचेदन्नं तस्मिन्होमो विधीयते । इति ।

अत्र वैश्वदेवशब्दो देवभूतपितृयज्ञानां समुदाये प्रयुज्यते । तत्र होमो देवयज्ञः, बलिर्भूतयज्ञः, स्वधाकारः पितृयज्ञः । एवं च तेनैव पितृयज्ञसिद्धेर्नित्यश्राद्धं नावश्यकम् । अत एव देवलो नित्यश्राद्धं प्रक्रम्य यथाशक्ति तत्कालानाह—

एतेन विधिना श्राद्धं कुर्यात्संवत्सरं सकृत् ।
त्रिश्चतुर्वा यथाश्राद्धं(?)मासे मासे दिने दिने ॥ इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं दर्शश्राद्धमपि अशक्तौ सं...

मासिकं पार्वणं प्रोक्त...

मासिकं प्रतिमासं कर्तव्यं पार्वणं दर्श...

वैश्वदेवश्चात्मनोऽन्नस्य च संस्कारार्थः "...

इतिवचनात् । "अथ सायंप्रातः सिद्धस्य हविष्यस्य जुहु... नाच्च । एकस्य तूभयत्वे संयोगपृथक्त्वमिति न्यायात् । नच 'प्रातप्रधानं गुणावृत्तिः' इति न्यायात्प्रतिपाकं तदावृत्तिः स्यात् संध्यावन्दनादिवद्विभक्तानां पृथगनुष्ठानं च स्यादिति वाच्यं, "यद्येकस्मिन्काले पुनः पुनरन्नं पच्येत सकृदेव तद्बलिं तत्र कुर्वीताथ यद्येकस्मिन्काले बहुधान्नं पच्येत गृहपतिमहानसादेवैतद्बलिं तत्र कुर्वीत" इति गोभिलोक्तेः । एतच्च सायंप्रातः कार्यम् " अथ सायंप्रातः सिद्धस्य हविष्यस्य जुहुयात् " इति आश्वलायनोक्तेः । उभयत्रासंभवे प्रातरेव द्विरावृत्त्या सह वा कार्यम् । यथोक्तं तेनैव—

प्रातरेव द्विरावृत्त्या कुर्याद्वा सह तद्द्विजः ।
सायं वा यदि भुञ्जीयात्तत्कृत्वा ज्ञानतः स्वयम्(?)॥ इति ।

मनुष्ययज्ञस्त्वतिथिपूजा ।

एषामकरणे प्रायश्चित्तमाह व्यासः—

होमान्नदानरहितं न भोक्तव्यं कदाचन ।
अविभक्तेषु संसृष्टेष्वेकेनैव कृतं तु वा ॥
पयोमूलफलैर्वाऽपि पञ्चयज्ञान्समाचरेत् ।
अकृत्वा पञ्चयज्ञांस्तु भुक्त्वा चान्द्रायणं चरेत् ॥ इति ।

आश्वलायनः—

वसतामेकपाकेन विभक्तानामपि प्रभुः ।
एकस्तु चतुरो यज्ञान्कुर्याद्वाग्यज्ञपूर्वकान् ॥

वाग्यज्ञो ब्रह्मयज्ञः ।

अविभक्ता विभक्ताश्च पृथक्पाका द्विजातयः ।
कुर्युः पृथक् पृथग् यज्ञान् भोजनात्प्राग् दिने दिने ॥
पृथगप्येकपाकानां ब्रह्मयज्ञो द्विजन्मनाम् ।
सूतकाद्यैस्त्वशुद्धात्मा न कुर्यान्न च कारयेत् ॥

अत्राविभक्तानां पाकभेदे पृथग्वैश्वदेवानुष्ठानं नाद्रियन्ते शिष्टाः ।

१ 'जात्वपि' इति पाठः । २ 'एकपाकाः' इति पाठः । ३ 'पाकैक्ये' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...तिपयाहृताश्वलायनवचसो वाधा...
...कादिषु ...
...ादीनां ...ऽपि ब्रह्मयज्ञभिन्नाश्चत्वारो न त्याज...
..." ...त" इति सूत्रात् । एतस्य हि
...तके कर्मणां त्यागः संध्यादीनां विधीयते ।
इत्यादिना वाधितानां प्रतिप्रसवेनैव सार्थक्यम् । ब्रह्मयज्ञस्तु न भव... "तस्य द्वावनध्यायौ यदात्माऽशुचिर्यद्देशः" इति सूत्रात् । तत्र... 'पञ्चयज्ञविधानं तु न कुर्यान्मृतिजन्मनोः ।' इति देवलोक्तेः । अहर... कुर्वीतेति तु संध्यावन्दनादिवन्नित्यत्वमात्रवोधकम् । अत एव स्मृ...न्तरे—'आपत्रमपि दातव्यं, आकाष्ठमपि जुहुयादाऋचमपि ब्रह्म... कुर्यात्' इति ।

चतुर्विंशतिमते—

अलाभे येन केनाऽपि फलशाकादिभिर्द्विजः ।
पयोदधिघृतैः कुर्याद्वैश्वदेवं स्रुवेण तु ।
हस्तेनान्नादिभिः कुर्यादद्भिरञ्जलिना जले ॥

परिशिष्टे—

उत्तानेन तु हस्तेन ह्यङ्गुष्ठाग्रेण पीडितम् ।
संहताङ्गुलिपाणिस्तु वाग्यतो जुहुयाद्धविः ॥ इति ।

गृह्यपरिशिष्टेऽपि—

शाकं वा यदि वा पत्रं मूलं वा यदि वा फलम् ।
संकल्पयेद्यदाहारस्तेनैव जुहुयादपि ॥

स्मृत्यन्तरेऽपि—

कोद्रवं चणकं माषं मसूरं च कुलत्थकम् ।
क्षारं च लवणं सर्वं वैश्वदेवे विवर्जयेत् ॥

हविष्याभावे क्षारादिभिरपि अग्नेरीशान्यामुष्णे भस्मनि होतव्य...त्याहापस्तम्वः—न क्षारलवणहोमो विद्यते तथा परान्नसंसृष्टस्याह...ष्यस्य होम उदीचीनमुष्णं भस्मापोह्य जुहुयात्तद्धुतमहुतं चाग्नौ भवती...

वृद्धवसिष्ठः—

अनग्निकस्तु यो विप्रः सोऽन्नं व्याहृतिभिः स्वयम् ।
हुत्वा शाकलमन्त्रैश्च शिष्टं काकवलिं हरेत् ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बौधायनः—

प्रवासं गच्छतो यस्य ...

पश्चानां महतामेषां ...

आहाग्निः—

पुत्रो भ्राताऽथवा ऋत्विक् शि... श्वशु...

पत्नीश्रोत्रिययाज्याश्च दृष्टाश्च वलिकर्मणि...

एते च प्रवसतः प्रतिनिधयः ।

ब्रह्मयज्ञस्य पाठप्राप्तां देवयज्ञोत्तरतां वाधते आश्वलायनः—

स गृह्यविधिना कृत्वा ब्रह्मयज्ञं पुरा द्विजः ।
स्वाध्यायतर्पणाभ्यां च गृहमेत्याचरेत्परान् ॥ इति ।

यत्तु वृहस्पतिः—

स चार्वाक् तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः ।
वैश्वदेवावसाने वा नान्यदर्ते निमित्ततः ॥ इति ।

तदाश्वलायनान्यपरं, आश्वलायनानां तर्पणस्योत्तराङ्गत्वेनैव तत्सूत्रात्प्राप्तेरर्वाक्तर्पणादित्यस्य तदितरान्प्रत्येव सार्थक्यात् । तत्साहचर्यात्पश्चाद्वेति वैश्वदेवावसाने चेत्येतदपि तान्प्रत्येव ।

कारिकायाम्—

दर्भान्वहून्शुचौ देशे प्रागग्रानास्तृणात्यथ ।
दर्भेषूपवसेत्कर्मण्यत्र प्राङ्मुख एव सन् ॥
कृत्वोपस्थं करे सव्ये उत्ताने प्राग्दिगङ्गुलौ ।
पवित्रे स्थापयेदुक्ते प्रागग्रे दक्षिणेन तु ।
न्यञ्चं प्रागङ्गुले तेन संदध्याद्दक्षिणं करम् ॥ इति ।

तत्रैव— सूक्ताद्यन्यतमं पूर्वमाभिशंसन्ति शक्तितः ।
ओंपूर्वा व्याहृतीस्तिस्रः समस्ताश्च सकृद्वदेत् ।
पच्छस्त्वर्धर्चशः सर्वां सावित्रीं त्रिर्वदेदथ ॥ इति ।

शौनकः—

ततो यावत्प्रतिज्ञातमध्यायं सूक्तमेव वा ।
ऋचं वाप्यन्ततोऽवश्यमधीयीत स्वशक्तितः ॥ इति ।

ऋग्विधाने—

आग्नेयं सूक्तमाद्यं तु पुण्यं ब्रह्मर्षिसंमतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...प्रोऽर्थमाप्नुयात् ॥
... स पूतो नियतः शुचिः ।
...कादिषु ... वेदस्य न संशयः ॥ इति ।
...ादीना... सूक्तं पापघ्नं श्रीकरं परम् ।
... ...फलं तस्य वेदानां स्यात्सहस्रशः ॥ इति ।
... —'स यावन्मन्येत तावदधीत्यैतया परिदधाति "नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे नमो वाचस्पतये नमो विष्णवे महते करोमि" इत्येनां च त्रिः पठेत् "नमो ब्रह्मणे" इति परिधानीयं त्रिरन्वाह" इति श्रुतेः ।

उपवेशनाशक्तौ आश्वलायनगृह्ये—"स यदि तिष्ठन्व्रजन्नासीनः शयानो वा यं यं क्रतुमधीते तेन तेन हास्य क्रतुनेष्टं भवतीति विज्ञायते । तस्य द्वावनध्यायौ यदात्माऽशुचिर्यद्देशः" इति द्वावित्यनध्यायान्तरपरिसंख्यार्थम् । केषुचिन्नैमित्तिकानध्यायेषु विशेषमाहापस्तम्बः—' अथ यदि वातो वायात्स्तनयेद्वा विद्योतते वा स्फूर्जेद्वैकां चर्चमेकं वा यजुरेकंवा सामाभिव्याहरेत् भूर्भुवः स्वः सत्यं तपः श्रद्धायां जुहोमि इति ॥

अथ तर्पणम् ।

आश्वलायनगृह्ये—देवतास्तर्पयति प्रजापतिर्ब्रह्मा वेदा देवा ऋषयः सर्वाणिच्छन्दांस्योङ्कारो वषट्कारो व्याहृतयः सावित्री यज्ञा द्यावापृथिवी अन्तरिक्षमहोरात्राणि सांख्याः सिद्धाः समुद्राः नद्यो गिरयः क्षेत्रौषधिवनस्पतिगन्धर्वाप्सरसो नागा वयांसि गावः साध्या विप्रा यक्षा रक्षांसि भूतान्येवमन्तानि । अथ ऋषयः, शतर्चिनो माध्यमो गृत्समदो विश्वामित्रो वामदेवोऽत्रिर्भरद्वाजो वसिष्ठः प्रगाथाः पावमान्यः क्षुद्रसूक्ता महासूक्ता इति । प्राचीनावीती, सुमन्तुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्या जानन्तिवाहविगार्ग्यगौतमशाकल्यवाभ्रव्यमाण्डव्यमाण्डूकेया गर्गीवाचक्नवी वडवाप्रातीथेयी सुलभामैत्रेयी कहोळं कौषीतकं महाकौषीतकं पैङ्ग्यं महापैङ्ग्यं सुयज्ञं सांख्यायनम् ऐतरेयं महैतरेयं शाकलं बाष्कलं सुजातवक्त्रमौदवाहिं महौदवाहिं सौजामिं शौनकमाश्वलायनं ये चान्ये आचार्यास्ते सर्वे तृप्यन्तु प्रतिपुरुषं पितृंस्तर्पयित्वा' इति । अत्र प्राजापत्याद्या एवमन्तानीत्यन्ता एकोनत्रिंशन्मन्त्राः । अथ ऋषय इति तु न मन्त्रः, शतर्चिन इत्याद्या महासूक्तान्ता द्वादश, सुमन्त्वित्याद्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ये चान्य इत्यन्ता द्वाविंशतिः ।। तं
यमध्याहृत्य प्रयोज्याः । एवमन्तान
महासूक्तास्तृप्यन्त्वित्यस्यानन्तरं पूव
द्यावापृथिवी तृप्येतामिति लोडात्मनेपदं प्रयु
स्मैपदित्वात् । लिङि तु परस्मैपदं भवेत् । तत्र तु क
स्तृप्यतु तृप्यन्तामिति लोट्प्रायपाठविरोधः । तेन द्यावापृथि
मित्येव प्रयोज्यमिति भट्टोजिदीक्षिताः । सा च कारिका—

अपां समीपमागत्य तर्पयेदथ देवताः ।
एवमन्तानि तृप्यन्त्वित्यन्तैश्च प्रतिमंत्रकम् ।।
सिञ्चेत्प्रजापतिस्तृप्यत्वित्यपो देवतीर्थतः ।
धातुस्तृप्तिर्यथालिङ्गं मन्त्रान्तेषु प्रयुज्यते ।। इति ।

शौनकोऽपि—मन्त्रैः प्रजापतिस्तृप्यत्वित्यारभ्य यथोदितैः ।
एवमन्तानि तृप्यन्त्वित्येव मन्त्रैर्यथाक्रमम् ।। इति ।

कहोळादिष्वाश्वलायनान्तेषु षोडशसु द्वितीयान्तेषु तर्पयामीति शेषो
ोज्यो योग्यत्वात् ।

तच्च नित्यमुक्तं प्रयोगपारिजाते स्मृत्यन्तरे—

देवतांश्च मुनींश्चैव पितॄन्यो हि न तर्पयेत् ।
देवादीनामृणी भूत्वा नरकं प्रतिपद्यते ।।

मदनपारिजाते संग्रहे—

अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु ।
सव्योत्तराभ्यां पाणिभ्यामथवा तर्पणं भवेत् ।।

सव्यान्वारब्धेन एकेनैव दक्षिणेन पाणिना इति तु आश्वालयनपरं,
णिभ्यामिति त्वन्यान्प्रतीति व्यवस्थेति केचित् । व्यवस्थामूलं चिन्त्यम् ।

कारिका—प्राचीनावीत्यथेदानीं तर्पयेत्पितृतीर्थतः ।। इति ।

व्यासः—एकैकमञ्जलिं देवा द्वौ द्वौ तु सनकादयः ।
अर्हन्ति पितरस्त्रींस्त्रीन् स्त्रियस्त्वेकैकमञ्जलिम् ।। इति ।

योगयाज्ञवल्क्यः—

सनकश्च सनन्दनस्तृतीयश्च सनातनः ।
कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा ।
एते ब्रह्मशिखास्तर्प्या मनुष्याः परिकीर्तिताः ।। इति ।

७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चिनो द्वादशैव तत्सूत्रोक्त्वात्
र्थत्वादिति तु युक्तम् । कासां
कादिषु
आदीनां
,, यास्तिस्रस्तासां त्रींस्त्रीञ्जलाञ्जलीन् ॥ इ
त्न्याचार्यपत्नीनां द्वौ द्वौ दद्याज्जलाञ्जलीन् ॥ इति।
शेषमाह हारीतः—

वसित्वा वसनं शुष्कं स्थले विस्तीर्णबर्हिषि ।
विधिज्ञस्तर्पणं कुर्यान्न पात्रेषु कदाचन ॥
पात्राद्वा जलमादय शुभे पात्रान्तरे क्षिपेत् ।
जलपूर्णेऽथवा गर्ते न स्थले तु विबर्हिषि ॥ इति ।

पितामहः—हेमरूप्यमयं पात्रं ताम्रकांस्यसमुद्भवम् ।
पितॄणां तर्पणे पात्रं मृन्मयं तु परित्यजेत् ॥ इति ।

शङ्खः— उदकेनोदकं दद्यात्पितृभ्यश्च कदाचन ।
उत्तीर्य च शुचौ देशे कुर्यादुदकतर्पणम् ॥ इति ।

अग्निपुराणे—प्रागग्रेषु सुरास्तर्प्या मनुष्याश्चैव मध्यतः ।
पितरो दक्षिणाग्रेषु एकद्वित्रिमिताञ्जलीन् ॥ इति।

मरीचिः—सौवर्णेन च पात्रेण ताम्ररूप्यमयेन वा ।
औदुम्बरेण खड्गेन पितॄणां दत्तमक्षयम् ॥ इति ।

विष्णुः— यत्राशुचि स्थलं वा स्यादुदके देवताः पितॄन् ।
तर्पयेत्तु यथाकाममप्सु सर्वं प्रतिष्ठितम् ॥ इति ।

योगयाज्ञवल्क्यः—

यद्युद्धृतं निषिञ्चेत्तु तिलान्संमिश्रयेज्जले ।
अतोऽन्यथा तु सव्येन तिला ग्राह्या विचक्षणैः ॥

अन्यथेति अनुद्धृतेन तर्पण इत्यर्थः ।

गोभिलः— रोमसंस्थांस्तिलान्कृत्वा यस्तु तर्पयते पितॄन् ।
पितरस्तर्पितास्तेन रुधिरेण मलेन च ॥ इति ।

स्मृतिभास्करे—

कुशाग्रैस्तर्पयेद्देवान्मनुष्यान्कुशमध्यतः ।
द्विगुणीकृत्यमूलाग्रैः पितॄन्संतर्पयेद्द्विजः ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगयाज्ञवल्क्यः—

कव्यवालोऽनलः सोम

अग्निष्वात्ताः सोमपाश्च

यदि स्याज्जीवपितृक एतान्वि

अत्र कव्यवालं तर्पयामीति, कव्यवालस्तृप्यतु तृप्य

गः। एवमनलादिषु।

अथ पित्रादितर्पणे विशेषमाह वोपदेवः—

तातास्वात्रितयं सपत्नजननी मातामहादित्रयं
सस्त्रि स्त्रीतनयादि तातजननीस्वभ्रातरः सस्त्रयः।
तातास्वात्मभगिन्यपत्यधवयुग् जायापिता सद्गुरुः
शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे॥ इति।

तातास्वात्रितयं, पित्रादित्रयं, मात्रादित्रयं, मातामहादित्रयम्। सस्त्रीति सपत्नीकं तर्पयामीति प्रयोज्यम्। अपत्यधवयुगिति सापत्यां सधवां तर्पयामीत्यर्थः।

क्रमान्तरं प्रघट्टके स्मृत्यन्तरे—

आदौ पिता ततो माता सपत्नजननी तथा।
मातामहाः सपत्नीकाः स्वपत्नी तदनन्तरम्॥
सुतभ्रातृपितृव्याश्च मातुलाश्च सभार्यकाः।
दुहिता भगिनी चैव दौहित्रो भागिनेयकः।
पितृष्वसा मातृष्वसा श्वशुरो गुरुरर्थिनः॥ इति।

प्रयोगपारिजाते संग्रहे—

पितृमातृमातामहाः पितृव्यो भ्रातरः सुतः।
पितृष्वसा मातुलाश्च तद्भगिन्यः स्वजामयः॥
भार्याभगिन्यो दुहिता श्वशुरो भावुकाः स्नुषाः।
श्यालको गुरुराचार्यः स्वामी मित्रं यथाक्रमम्॥ इति।

स्वजामयः स्वभगिन्यः। भावुका भगिनीपतयः। एतेषां च क्रमाणामैच्छिको विकल्पः।

तत्र विशेषमाह यमः—

संबन्धनामगोत्रेण स्वधान्तेन नमोन्ततः।
वस्वादिरूपं निर्दिश्य तर्पयेत्पितृपूर्वकम्॥ इति।

---

१ सुहृदः क. पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...गोत्रमनन्तरम् ।
...कादिषु ... स्वधाकारेण तर्पयेत् ॥ इति ।
...गदीनाम् ... गोत्रं वसुरूपं स्वधानमस्तर्पयामि
,, ...
,, ...

... तर्पणं विष्णुपुराणे—

संक्षिप्ततर्पणम् ।

...ब्रह्मस्तम्बपर्यन्तं जगत्तृप्यत्विति ब्रुवन् ।
क्षिपेत्तोयाञ्जलींस्त्रींस्त्रीन्कुर्वन्संक्षेपतर्पणम् ॥

अन्यमञ्जलिमाह कात्यायनः—

' पितृवंश्या मातृवंश्या ये चान्ये मत्त उदकमर्हन्ति तांस्तर्पयामीत्य... सानाञ्जलिः ' इति ।

ततः सूर्यायार्घ्यदानमुक्तं विष्णुपुराणे—

दत्त्वा कामोदकं सम्यक् प्रेतेभ्यः श्रद्धयाऽन्वितः ।
आचम्य च ततो दद्यात्सूर्याय सलिलाञ्जलिम् ॥
नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे ।
जगत्सवित्रे शुचये सवित्रे कर्मदायिने ॥ इति ।

तत आचम्य हस्तस्थान्कुशांस्त्यजेत् । तथाच रत्नावल्याम्—

विकिरे पिण्डदाने च तर्पणे श्राद्धकर्मणि ।
आचान्तः सन्प्रकुर्वीत दर्भसंत्यजनं बुधः ॥ इति ।

तन्मन्त्रोऽपि तत्रैव—

येषां पिता न च भ्राता न पुत्रो नान्यगोत्रिणः ।
ते सर्वे तृप्तिमायान्तु मयोत्सृष्टैः कुशैस्तथा ॥ इति ।

ततो भूमौ वस्त्रं निष्पीडयेत् । तथाच भरद्वाजः—

वस्त्रनिष्पीडनविधिः ।

वस्त्रोदकमपेक्षन्ते ये मृता दासकर्मिणः ।
तस्मात्सर्वप्रयत्नेन जलं भूमौ निपातयेत् ॥ इति ।

शौनकः—देवादितर्पणं कृत्वा वस्त्रं निष्पीड्य शोधयेत् ।
स्नानार्थं प्रस्थितं विप्रं देवाः पितृगणैः सह ॥
वायुरूपेण तिष्ठन्ति तृषितास्ते जलार्थिनः ।
निराशास्तु निवर्तन्ते वस्त्रनिष्पीडने कृते ।
तस्मान्न पीडयेद्वस्त्रमकृते तर्पणे द्विजः ॥ इति ।

---

१ निर्दिश्य क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ भी[illegible]

व्यासः— शुक्लाष्टम्यां तु माघस्य [illegible]
संवत्सरकृतं पापं तत्क्षणादेव[illegible]

तत्रायं मन्त्रः—
वैयाघ्रपद्यगोत्राय सांकृत्यप्रवराय च ।
गङ्गापुत्राय भीष्माय प्रदास्येऽहं तिलोदकम् ॥
अपुत्राय ददाम्येतत्सलिलं भीष्मवर्मणे ॥

॥ इति भीष्मतर्पणम् ॥

अथ यमतर्पणम् ।

वृद्धमनुः—दीपोत्सवचतुर्दश्यां काय तु यमतर्पणम् ।
कृष्णाङ्गारचतुर्दश्यामपि कार्यं सदैव च ॥ इति ।

स एव—इहजन्मकृतं पापमन्यजन्मार्जितं च यत् ।
कृष्णाङ्गारचतुर्दश्यां तर्पयंस्तद्व्यपोहति ॥ इति ।

स्मृतिचन्द्रिकायाम्—
यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्वभूतक्षयाय च ॥
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय ते नमः ॥
चतुर्दशैते मन्त्राः स्युश्चतुर्थ्यन्ता नमोन्तकाः ।
एकैकेन तिलैर्मिश्रांस्त्रींस्त्रीन्दद्याज्जलाञ्जलीन् ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥

श्लोकगौतमः—
यमो निहन्ता पितृधर्मराजो वैवस्वतो दण्डधरश्च कालः ।
प्रेताधिपो दत्तकृतानुसारी कृतान्त एतद्दशभिर्जपन्ति ॥ इति ।

दशभिः आवृत्तिभिः । व्यासः—
तथा कृष्णचतुर्दश्यां यमायेत्यादिसप्तभिः ।
सप्तोदकाञ्जलीन्दद्यात्सर्वपापैः प्रमुच्यते ॥

---

१ स इति ख. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...तिलान्सव्ये समाहितः ।
...कादिषु ... प्रेताधिपो यतः ॥
...गदीनाम् ...
...
...वीतिना कार्यं प्राचीनावीतिनाऽपि वा ।
...देवत्वं च पितृत्वं च यमस्याऽपि द्विरूपता ॥

॥ इति यमतर्पणम् ॥

अथ तर्पणे तिलनिषेधः ।

संग्रहे— नन्दायां भार्गवदिने कृत्तिकासु मघासु च ।
भरण्यां भानुवारे च गजच्छायाह्वये तथा ॥
अयनद्वितये चैव मन्वादिषु युगादिषु ।
पिण्डदानं मृदास्नानं न कुर्यात्तिलतपर्णम् ॥

मरीचिः—सप्तम्यां रविवारे च गृहे जन्मदिने तथा ।
भृत्यपुत्रकलत्रार्थी न कुर्यात्तिलतर्पणम् ॥

बौधायनः—सप्तम्यां रविवारे च मातापित्रोः क्षयेऽहनि ।
तिलैर्यस्तर्पणं कुर्यात्स भवेत्पितृघातकः ॥

सप्तमीरविविशिष्टं निमित्तमिति केचित् तन्न, विशेषणविशेष्यभावे विनिगमनाविरहात् । कथंचित्तत्सत्त्वेऽपि निमित्तविशेषणमविवक्षितमेव । "यस्योभयं हविरार्तिमार्च्छेत्" इत्यत्रेवोभयत्वं, सप्तमीरविगृहजन्मदिनानामन्येषामपि परस्परविशिष्टानामेव निमित्ततापत्तेश्च अधिकारविशेषश्रुतेश्च भृत्यपुत्रादिकामस्यैवायं निषेधः न तु विधुरापुत्रादेः ।

स्मृत्यन्तरे—विवाहव्रतचूडासु वर्षमर्धं तदर्धकम् ।
पिण्डदानं मृदास्नानं न कुर्यात्तिलतर्पणम् ॥ इति ।

बौधायनः—विवाहे चोपनयने चौले सति यथाक्रमम् ।
वर्षमर्धं तदर्धं च नेत्येके तिलतर्पणम् ॥
संस्कारेषु तथान्येषु जातपुंसवनादिषु ।
यावन्मासः समाप्येत तावत्पिण्डांश्च वर्जयेत् ।
वृद्धावनन्तरं प्राज्ञस्तथैव तिलतर्पणम् ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

वृद्धमनुः—संक्रान्त्यादिनिमित्ते...
तिलप्रतिप्रसवः । तिथिवारनिषेधेऽपि ...
कात्यायनः—उपरागे पितुःश्राद्धे पातत्र...
निषेधेऽपि हि सर्वत्र तिलैस्तर्पणमा...
व्यतीपातो वैधृतेः, पिता च पितृव्यादेरुपलक्षणम् ।
त्रेति पारिजाते ।

॥ इति तर्पणप्रकरणम् ॥

अथ देवपूजा ।

कूर्मपुराणे—ब्रह्माणं शंकरं सूर्यं तथैव मधुसूदनम् ।
अन्यांश्चाभिमतान्देवान्भक्त्या त्वक्रोधनो नरः ।
स्वैर्मन्त्रैस्त्वर्चयेन्नित्यं पत्रैः पुष्पैस्तथाम्बुभिः ॥
गन्धपुष्पमात्रं पञ्चोपचाराद्यसंभव इति तिथितत्त्वे ।
नृसिंहपुराणे—
जलदेवं नमस्कृत्य ततो गच्छेद्गृहं बुधः ।
पौरुषेण च सूक्तेन ततो विष्णुं समर्चयेत् ॥ इति ।
स्कान्दे— ब्रह्मा कृतयुगे देवस्त्रेतायां भगवान् रविः ।
द्वापरे भगवान्विष्णुः कलौ देवो महेश्वरः ॥ इति ।
[नियमविधिरयं न तु परिसंख्या । एवं सर्वेषु सर्वेषां पूज्यत्वं न निषिध्यते ।
तथाच महाभारते—
कलौ कलिमलध्वंसं सर्वपापहरं हरिम् ।
येऽर्चयन्ति नरा नित्यं तेऽपि वन्द्या यथा हरिः ॥][1]
मन्त्रा वैदिका नाममन्त्राश्च । अत एव ब्राह्मे—
ओङ्कारादिकसंयुक्तं नमस्कारान्तसंयुतम् ।
स्वनाम सर्वसत्त्वानां मन्त्र इत्यभिधीयते ॥
अनेनैव विधानेन गन्धपुष्पे निवेदयेत् ।
एकैकस्य प्रकुर्वीत यथोद्दिष्टक्रमेण तु ॥ इति ।

---

१ एतदादि यथा हरिरित्यन्तं, अग्रिमकोटिकोटिगुणोत्तरमित्यस्मादग्रे क. पाठे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

... क्त्या लक्षगुणोत्तरम् ।
... कादिषु ... टिकोटिगुणोत्तरम् ॥

... ादीनाम् ...

... यतनस्थापनप्रकारः ।

... म्—

यदा तु शंकरं मध्ये ईशान्यां श्रीपतिं यजेत् ।
आग्नेय्यां च तथा हंसं नैर्ऋत्यां पार्वतीसुतम् ॥
वायव्यां च सदा पूज्या भवानी भक्तवत्सला ।
यदा तु मध्ये गोविन्दमैशान्यां शंकरं यजेत् ॥
आग्नेय्यां गणनाथं च नैर्ऋत्यां तपनं तथा ।
वायव्यामम्बिकां चैव यजेन्मन्त्री समाहितः ॥
सहस्रांशुं यदा मध्ये ईशान्यां पार्वतीपतिम् ।
आग्नेय्यामेकदन्तं[1] च नैर्ऋत्यामच्युतं[2] तथा ।
वायव्यां पूजयेद्देवीं भोगमोक्षैकभूमिकाम् ॥
भवानीं तु यदा मध्ये ईशान्यां माधवं यजेत् ।
आग्नेय्यां पार्वतीनाथं नैर्ऋत्यां गणनायकम् ।
प्रद्योतनं तु वायव्यामाचार्यस्तु प्रपूजयेत् ॥
हेरम्बं तु यदा मध्ये ईशान्यामच्युतं यजेत् ।
आग्नेय्यां पञ्चवक्त्रं तु नैर्ऋत्यां जगदम्बिकाम्[4] ।
वायव्यां द्युमणिं[3] चैव यजेन्मन्त्री ह्यतन्द्रितः ॥
स्वस्थानवर्जिता देवाः शोकदुःखभयप्रदाः ।
तन्मण्डलस्थितो राजा साधकश्च विनश्यति ॥ इति ।

वोपदेवः—

शंभौ मध्यगते हरीनहरभूदेव्यो हरौ शंकरे-
भास्ये नागसुता रवौ हरगणेशाजाम्बिकाः स्थापिताः ।
देव्यां विष्णुहरैकदन्तरवयो लम्बोदरेऽजेश्वरे-
नार्याः शंकरभागतोऽतिसुखदा व्यस्तास्तु ते हानिदाः ॥ इति

अत्र पञ्चानामप्येकस्यावाहनादिनमस्कारान्तं पूजाकाण्डं कृत्वा स्यापीत्येवं काण्डानुसमयः ।

---

१ गजवक्त्रं त्विति क. पाठः । २ माधवं यजेदिति क. पाठः । ३ द्युमणिमिति क. पाठः । ४ जगदम्बां चेति क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुख्ये पुष्पाञ्जलिं द

गणेश एव मुख्यश्चेत्त

इति वचनेन क्रमाभिधानात्। मुख्ये भ
ब्देन च तन्दता पूजा लक्ष्यते, पुष्पाञ्जल्यन्ता
तिलकटीकायाम्। युक्तं तु मुख्यत्वोक्त्या तत्प्रतियोगिका
प्रयोगविधिकल्पनं तेन चैककालत्वावगतेः, वैश्वदेवीं कृत्वा प्रा
न्तीतिवत्सर्वेषामावाहनं ततः स्थापनमिति पदार्थानुसमय एव। स तु
मुख्ये पुष्पाञ्जल्यन्तां पूजां कृत्वाऽङ्गदेवतायाः पूजायां कार्य इति दिक्।

भविष्यत्पुराणे—

पुष्पैररण्यसंभूतैः पत्रैर्वा गिरिसंभवैः।
अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः॥
आत्मारामोद्भवैर्वाऽपि भक्त्या संपूजयेत्सुरान्॥
कृमिकीटावपन्नानि शीर्णपर्युषितानि च।
स्वयंपतितपुष्पाणि त्यजेदुपहतानि च॥

उपहतानि मलादिभिः।

मुकुलैर्नार्चयेद्देवमपक्वं न निवेदयेत्।
[फलं च कृमिबद्धं च प्रयत्नात्तद्विवर्जयेत्॥
अलाभे तु सुपुष्पाणां पत्राण्यपि निवेदयेत्।]
पत्राणामप्यलाभे तु फलान्यपि निवेदयेत्॥
फलानामप्यलाभे तु तृणगुल्मौषधीरपि।
ओषधीनामलाभे तु भक्त्या भवति पूजितः॥
प्रत्येकमुक्तपुष्पेण दशसौवर्णिकं फलम्।
स्रजाऽपि नृपशार्दूल तदेव द्विगुणं भवेत्॥

विष्णुधर्मोत्तरे—

धर्मार्जितधनक्रीतैर्यः कुर्यात्केशवार्चनम्।
उद्धरिष्यत्यसंदेहं सप्त पूर्वांस्तथा परान्॥ इति।

इदं विप्रातिरिक्तपरम्।

समित्पुष्पकुशादीनि ब्राह्मणः स्वयमाहरेत्।
शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन्पतत्यधः॥

---

१ क. नास्ति २ स्रभिश्चेति क. पाठः। ३ संदेहादिति क. पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

... भ्रातृचरणाः । लक्षपुष्पार्चना
...कादिषु ... ...कारः ।
...गादीनां ... वहन्तं नाभिवादयेत् ।
... ...न्यान्हि निर्माल्यं तद्धवेत्तयोः ॥
...पोपरि धृतं यच्च वामहस्ते धृतं च यत् ।
अधोवस्त्रधृतं यच्च जलेऽन्तः क्षालितं च यत् ।
देवतास्तन्न गृह्णन्ति पुष्पं निर्माल्यतां गतम् ॥ इति ।
नित्यपूजार्थं परोपवनादेरपि ग्राह्यम् । न च तच्चौर्यम् ।
देवतार्थं च कुसुममस्तेयं मनुरब्रवीत् ।
इति वचनात् । पूजार्थं पुष्पादि न याचेत ।
याचितैः पत्रपुष्पाद्यैर्यः करोति समार्चनम् ।
इति वाराहे तस्यापराधिषु गणितत्वात् ।
भविष्यत्पुराणे—
प्रहरं तिष्ठते जाती करवीरमहर्निशम् ।
तुलस्यां विल्वपत्रेषु जलजेषु च सर्वशः ॥
न पर्युषितदोषोऽस्ति मालाकारगृहेषु च ।
मुद्गराणि कदम्बानि रात्रौ देयानि भास्करे ॥
कनकानि कदम्बानि रात्रौ देयानि शंकरे ।
दिवा चान्यानि पुष्पाणि दिवा रात्रौ च मल्लिकाः ॥
तत्रैव— जाती शमी कुशाः कङ्कु मल्लिकाः करवीरजम् ।
नागपुन्नागकाशोकरक्तनीलोत्पलानि च ॥
चम्पकं वकुलं चैव पद्मं विल्वं पवित्रकम् ।
एतानि सर्वदेवानां विहितानि समानि च ॥
कङ्कु कुब्जकम् । नागो नागकेशरम् ।
पाटला च शमीपत्रं दुर्गायास्तु हिताहितम् ।
विहितं प्रतिषिद्धं चेत्यर्थः ।
कुन्दं पलाशकुसुमं दूर्वा च शिवपूजने ।
कुसुदं कुङ्कुमं द्रोणं तगरं सूर्यपूजने ॥
विहितनिषिद्धमित्यर्थः । कुङ्कुममत्र पुष्पम् ।
अवकः कर्णिकारस्तु किङ्किरातो हरेस्तथा ।
किङ्किरातः पीताम्रकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिलकं मालती वा...
तमालं शिवदुर्गार्थे ...

बाणः करस(म)ला इति प्रसिद्धः ...

जयः काशः श्वेतपद्मं श्वेत...
दुर्गायाश्चैव विष्णोश्च निषिद्धं विहित...

जयो जयन्ती ।

अगस्तिरतिमुक्तश्च तिरीटं च हरे हरौ ।
अपामार्गस्य पुष्पं च दुर्गायाश्च हिताहितम् ॥

अतिमुक्तो माधवीलता । तिरीटं लोध्रम् ।

धत्तूरं शिंशपापुष्पं मन्दारश्चापराजिता ।
सूर्यविष्ण्वोर्न विहितं दमनं शिवसूर्ययोः ॥

अथ शिवे निषिद्धानि—

केतकी चातिमुक्तश्च कुन्दो यूथो मदन्तिका ।
शिरीषसर्जबन्धूककुसुमानि विवर्जयेत् ॥
अङ्कोलपत्रकुसुमं करञ्जेन्द्रतरूद्भवम् ।

सर्जः शालः । इन्द्रतरुः सिन्धुवारः ।

शिवे विवर्जयेत्कुन्दमुन्मत्तं च तथा हरौ ।
देवीनामर्कमन्दारौ सूर्यस्य तगरं तथा ॥ इति ।

विष्णुः । अर्कनिषेधो दुर्गेतरदेवीविषयः, दुर्गापूजाधिकारे करवीरार्कपुष्पैरित्युक्तत्वात् ।

विष्णौ तु, विष्णुः—नोग्रगन्धीनि नागन्धीनि पुष्पाणि न कण्टकितम् । कण्टकितमपि शुक्लसुगन्ध्यमपि दद्यात् । न रक्तं दद्यात् । रक्तमपि कुङ्कुमजं जलजं च दद्यात् । अजलजमपि पाटलानि संध्याकरवीरपारिभद्रशमीपत्रपलाशाशोककुशवर्ज्यं न दद्यात् ।

विष्णुधर्मोत्तरे—'कुटजशाल्मलीपुष्पं शैरीषं क्रकचं धत्तूरं कृष्णपुष्पार्कं च विष्णौ निषिद्धम्'

नृसिंहपुराणे—माला योग्यताराहित्ये सति निर्माल्यं भवतीत्युक्तं, तुलसीचन्दनादीनां च न निर्माल्यतेत्युक्तं, तेन प्रातःकालेऽप्यपनयने न दोषः ।

---

१ शिरीषमिति क. पाठः । २ नयत इति क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...ानि ।

...कादिषु ...

...ादीना... दूर्वा काशोऽतिमुक्तकः ।
...कर...णि जपा जयन्तिरेव च ॥
...म्पको रोतकः कन्दो वाणो वर्वरमल्लिका ।
अशोककर्णिकारौ च तथैव चाटरूषकः ॥
शतपत्राणि चान्यानि वकुलं च विशेषतः ।
अगस्तिकिंशुकौ तद्वत्पूजार्थं भास्करस्य च ॥

विहितानीति शेषः ।

अथ पत्राणि ।

विल्वपत्रं शमीपत्रं भृङ्गराजस्य पत्रकम् ।
तमालपत्रं च हरेः सद्यस्तुष्टिकरं रवेः ॥
तुलसी कालतुलसी तथा रक्तं च चन्दनम् ।
केतकीपत्रकुसुमं सदैव तपनप्रियम् ॥

अथ शिवे ।

करवीरो वकश्चैव अर्क उन्मत्तकस्तथा ।
पाटला वृहती चैव तथा च गिरिकर्णिका ॥
तथा काशस्य पुष्पाणि मन्दारश्चापराजिता ।
शमीपुष्पाणि चान्यानि कुब्जकं शिखिनी तथा ॥
अपामार्गस्तथा पद्मं शमीपत्रं सरोचकम् ।
चम्पकोशीरतगरं तथा वै नागकेसरम् ॥
पुन्नागं किङ्किरातं च द्रोणपुष्पं तथा शुभम् ।
शिंशपोदुम्वरश्चैव जपा मल्ली तथैव च ॥
पुष्पाणि यज्ञवृक्षस्य तथा विल्वं प्रियं शुभे ।
कुङ्कुमस्य च पुष्पाणि तथा वैकङ्कतस्य च ॥
नीलं च कुमुदं चैव तथा रक्तोत्पलानि च ।
सुरभीणि च सर्वाणि स्थलजान्यौदकानि च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृह्णामि शिरसा देव
शिखिनी मयूरशिखा।
नीलोत्पलसहस्रस्य यो
शिवाय विधिवद्भक्त्या द
कल्पकोटिसहस्राणि कल्पकोटिशतानि
वसेच्छिवपुरे श्रीमान्शिवतुल्यपराक्रमः ॥
अर्ककरवीरधत्तूरादिपुष्पदानफलं न लिखितं ग्रन्थगौरवभयात्।
सामान्यफलं शिवलोकप्राप्तिः।

अथ दुर्गायाः।

देवीपुराणे—शृणु शुक्र प्रवक्ष्यामि पुष्पाध्यायं समासतः।
ऋतुकालोद्भवैः पुष्पैर्मल्लिकाजातिपुष्पकैः ॥
[illegible]रक्तैस्तथा पुष्पैः पद्मैश्च पाण्डुरैस्तथा।
किंशुकैस्तगरैश्चैव किङ्किरातैः सचम्पकैः ॥
वकुलैश्चैव मन्दारैः कुन्दपुष्पैस्तिरीटकैः।
करवीरार्कपुष्पैश्च शैंशिपैश्चापराजितैः ॥
सितरक्तैस्तथा पीतैः कृष्णैश्चैव चतुर्विधैः।
धत्तूरकादिपुष्पैश्च वन्धूकागस्तिसंभवैः ॥
मदनैः सिन्धुवारैश्च सुरभिः कु(भिम ?)रुवकैस्तथा।
लताभिर्वल्लवृक्षस्य दूर्वाकन्दैः सुशोभनैः ॥
मञ्जरीभिः कुशानां च बिल्वपत्रैः सुशोभनैः।
रक्तान्वितैस्तथा सर्वैर्जलजैः स्थलसंभवैः ॥
पत्रैः पुष्पैर्यथान्यायं सर्वौषधिमयैः शुभैः।
धान्यानां सर्वपत्रैश्च पुष्पैश्चैव प्रपूजयेत् ॥
बिल्वपत्रैः पूजने राजसूयफलम्। करवीरस्रजा अग्निष्टोमफलम्। वकुलस्रजा वाजपेयफलम्। द्रोणस्रजा राजसूयफलम्। एवमन्यत्।

अथ विष्णोः। नरसिंहपुराणे—
मल्लिका मालती जाती केतक्याऽशोकचम्पकैः।
पुन्नागनागवकुलैः पद्मकैरुत्पलादिभिः।
एतैरन्यैश्च कुसुमैः प्रशस्तं पूजनं हरेः ॥
वामनपुराणे—जाती शताह्वा सुमना कुन्दं चाम्बुपुटस्तथा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...र्कं करवीरं च यूथिका ॥
... च वकुलं गिरिशालिनी ।
...कादिषु ... जं पीतजं तगरं त्वपि ॥
...दीना... ...स्तानि कुसमान्यच्युतार्चने ।
... सुरभीणि तथान्यानि वर्जयित्वा तु केतकीम् ।

...त्तूरमिति केचित् । वनकेतकीत्यपरे । शताह्वाऽशोक प्रसिद्धः । सुमनाः सुवर्णजातिः । अम्बुपुटः कर्णिकारः । जासुव जपा । गिरिशालिनी श्वेतकुटजम् ।

अथ पत्राणि ।

अपामार्गस्य प्रथमं भृङ्गराजमतः परम् ।
तस्माच्च खादिरं श्रेष्ठं शमीपत्रं ततः परम् ॥
दूर्वापत्रं तथा श्रेष्ठं ततोऽपि कुशपत्रकम् ।
तस्माद्दमनकं श्रेष्ठं ततो विल्वस्य पत्रकम् ॥
विल्वपत्रादपि हरेस्तुलसीपत्रमुत्तमम् ।
एतेषां तु यथालाभं पत्रैर्यश्चार्चयेद्धरिम् ॥
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥

नैरसिंहपुराणे—

कृष्णमूर्धनि विन्यस्ता तुलसीपत्रमञ्जरी ।
सुवर्णकोटिपुण्यानां पुण्यं यच्छत्यतोऽधिकम् ॥

तुलसीरोपणमन्त्रः—

महाप्रसादजननी सर्वसौभाग्यवर्धिनी ।
आधिव्याधिहरा नित्यं तुलसि त्वं नमोऽस्तु ते ॥
द्रोणपुष्पे तथैकस्मिन्साधकाय निवेदिते ।
दश दत्त्वा सुवर्णानि तत्फलं लभते नरः ॥
अगस्तिकुसुमैर्देवं योऽर्चयेच्च जनार्दनम् ।
दर्शनात्तस्य देवर्षे नरकान्को नु यास्यति ।
द्रोणपुष्पं खादिरं च शमीविल्ववकं तथा ॥

वकं वकुलम् ।

नन्द्यावर्तं करवीरं तथा श्वेतं च किंशुकम् ।

---

१ इमानीति क. पाठः । २ विल्वपत्रं ततः परमिति क. पाठः । ३ नृसिंहे क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुशपुष्पं तमालं च [illegible]
त्रिसंध्यं मालतीपुष्पं [illegible]
कुन्दं च शतपुष्पं च [illegible]
पूर्वपूर्वसहस्रेभ्योऽधिकं [illegible]त्तरोत्त[illegible]
जातीपुष्पसहस्रेण यच्छेन्मालां सुशोभ[illegible]
विष्णवे विधिवद्भक्त्या तस्य पुण्यफलं शृणु ।।
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
वसेद्विष्णुपुरे श्रीमान्विष्णुतुल्यपराक्रमः ।।
मञ्जरी सहकारस्य केशवोपरि नारद ।
यच्छन्ति ते महात्मानो गोकोटिफलभागिनः ।।
पुरन्ध्रिपुष्पं यो दद्यादेकमप्यथ पण्डितः ।
तिलपात्रप्रदानस्य फलमाप्नोत्यसंशयम् ।।

पुरन्ध्रिः पूर्वदेशे 'पङ्कुः' इति प्रसिद्धा ।

।। इति पुष्पाध्यायः ।।

अथ पूजायतनानि ।

अग्निपुराणे—अप्स्वग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च ।
षट्स्वेतेषु हरेः सम्यगर्चनं मुनिभिः स्मृतम् ।।

स्कान्दे— कामासक्तोऽथवा क्रुद्धः शालग्रामशिलार्चनात् ।
भक्त्या न यदि वाऽभक्त्या कलौ मुक्तिमवाप्नुयात् ।।
वैवस्वतभयं नास्ति तथाच कलिकालजम् ।
यः कथां कुरुते विष्णोः शालग्रामशिलाग्रतः ।।
शालग्रामशिलायास्तु प्रतिष्ठा नैव विद्यते ।
महापूजां तु कृत्वादौ पूजयेत्तां ततो बुधः ।। इति ।

शिवायतनं भारते—
सदा तं यजते यस्तु श्रद्धया मुनिपुंगव ।
लिङ्गे वा स्थण्डिले वाऽपि शंकरं विधिपूर्वकम् ।
युगदोषं विनिर्जित्य रुद्रलोके प्रमोदते ।। इति ।

भविष्ये—बाणलिङ्गानि राजेन्द्र ख्यातानि भुवनत्रये ।
न प्रतिष्ठा न संस्कारस्तेषामावाहनं तथा ।। इति ।

हेमाद्रौ—ब्राह्मणैर्वासुदेवस्तु नृपैः संकर्षणस्तथा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...निरुद्धस्तु शूद्रजैः ॥ इति ।

...कादिषु ... षड्भिः प्रद्युम्नकः स्मृतः ।
...रादीनां ... सप्तवर्गाऽनिरुद्ध एकादशैः स्मृतः ॥
...चत्वारो ब्राह्मणैः पूज्यास्त्रयो राजन्यजातिभिः ।
वैश्यैर्द्वाविव संपूज्यौ तथैकः शूद्रजातिभिः ॥ इति ।

यत्तु स्मृत्यन्तरे—

एकमूर्तिर्न पूज्यैव गृहिणा भूतिमिच्छता ।
अनेकमूर्तिसंपन्नः सर्वान्कामानवाप्नुयात् ॥

तत्काम्यपूजापरं त्रैवर्णिकपरं वा, शूद्रस्यैकविधानात् ।

यदपि— शालग्रामाः समाः पूज्या [विषमा न कदाचन ।
समेषु द्वितयं नेष्टं विषमेष्वेकमेव हि ॥ इति ।

तत्र पादत्रयं विप्रपरं, तत्राप्याद्यार्धं चत्वारो ब्राह्मणैः पूज्याः][१] स्यैवार्थमनुवदति । तृतीयपादस्तु अनेकमूर्तिसंपन्न इत्यनेकताप्राप्तौ निषेधकम् । अन्त्यपादस्तु शूद्रपरः ।

यत्तु विष्णुधर्मोत्तरे—

शालिग्रामशिलां वापि चक्राङ्कितशिलां तथा ।
ब्राह्मणः पूजयेन्नित्यं क्षत्रियादिर्न पूजयेत् ॥

तत्क्षत्रियादिरादिर्यस्येति मध्यमपदलोपिबहुव्रीहिगर्भेण तद्गुणसंवि नबहुव्रीहिणा शूद्रपरम् । तथाचापस्तम्बः—

प्रणवोच्चारणाच्चैव शालग्रामशिलार्चनात् ।
ब्राह्मणीगमनाच्चाऽपि शूद्रश्चाण्डालतां व्रजेत् ॥

एतदपि शूद्रस्य स्पर्शसहितपूजानिषेधार्थम् ।

ब्राह्मणस्यैव पूज्योऽहं शुचेरप्यशुचेरपि ।
स्त्रीशूद्रकरसंस्पर्शो वज्रस्पर्शाधिको मम ॥ इति लैङ्गोक्ते
स्त्रीणामनुपनीतानां शूद्राणां च नराधिप ।
स्पर्शने नाधिकारोऽस्ति विष्णोर्वा शंकरस्य च ॥ इति
शूद्रो वाऽनुपनीतो वा स्त्रीवाऽपि पतितोऽथवा ।
केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते ॥

---

१ क. नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

इति च वृहन्नारदीयाच्चेति ...
निषेधकमिति तु युक्तम् । अत एव ...

ब्राह्मणक्षत्रवैश्यानां त्रय...
अधिकारः स्मृतः सद्भिः शालग्रामा...
स्त्रीशूद्रपतितादीनां षण्ढादीनां विकर्म...
नैवाधिकारो विज्ञेयः शालग्रामशिलार्चने ॥
दीक्षायुक्तैस्तथा शूद्रैर्मद्यपानविवर्जितैः ।
कर्तव्यं ब्राह्मणद्वारा शालग्रामशिलार्चनम् ॥ इति ।

तत्रैव— द्वारकाशैलसंभूतं यस्तोयं पिबते कलौ ।
पापानि तस्य नश्यन्ति शतजन्मार्जितान्यपि ॥
धृते शिरसि पीते च सर्वास्तुष्यन्ति देवताः ।
प्रायश्चित्तं हि पापानां कलौ पादोदकं हरेः ॥ इति ।

शिलैव शैलं स्वार्थेऽण् । द्वारकाशिलातोयपानविधेः सापि शालग्रामेण सह पूज्येति केचित् । तत्तोयपानमात्रं पूजायां तु मानाभाव इत्यपरे ।

अथ विष्णोर्गन्धपुष्पादि विष्णुधर्मोत्तरे—

कलौ यच्छन्ति ये विष्णोस्तुलसीकाष्ठचन्दनम् ।
विष्णुप्रीतिकरं मर्त्या उत्तरां यान्ति ते भुवम् ॥
योऽर्चयेन्मालतीपुष्पैर्न भूयः स्तनपो भवेत् ।
अहो मुष्टास्ते नष्टास्ते पतिताः कलिकन्दरे ।
यैर्नार्चितो हरिर्भक्त्या कमलैरसितैः सितैः ॥ इति ।

पाद्मे— कार्तिके केतकीपुष्पं येन दत्तं हरेः कलौ ।
दीपदानं च देवर्षे तारितं तेन वै कुलम् ॥ इति ।

अथ पूजेतिकर्तव्यता आग्नेयपुराणे—

अर्चनं संप्रवक्ष्यामि विष्णोरमिततेजसः ।
यत्कृत्वा मुनयः सर्वे परं निर्वाणमाप्नुयुः ॥
आनुष्टुभस्य सूक्तस्य त्रिष्टुबन्तस्य देवता ।
पुरुषो यो जगद्बीजं ऋषिर्नारायणः स्मृतः ॥
प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे ।
तृतीयां वामपादे च चतुर्थीं दक्षिणे न्यसेत् ॥
पञ्चमीं वामजानौ च षष्ठीं वै दक्षिणे न्यसेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...ष्टमीं दक्षिणे तथा ॥
...दशमीं हृदये तथा ।
...कादिषु ... द्वादशीं वामबाहुके ॥
...दीन... दक्षिणे तु तथैवास्ये चतुर्दशीम् ।
...ष्णोः पञ्चदशीं चैव विन्यसेन्मूर्ध्नि षोडशीम् ॥
यथा देहे तथा देवे न्यासं कृत्वा यथाविधि ।
न्यासेन तु भवेत्सोऽपि स्वयमेव जनार्दनः ॥
एवं न्यासविधिं कृत्वा पश्चात्पूजां समाचरेत् ।
पूर्वमावाहयेद्देवमासनं तु द्वितीयया ॥
पाद्यं तृतीयया चैव चतुर्थ्याऽर्घ्यं प्रदापयेत् ।
पञ्चम्याऽऽचमनं दद्यात्षष्ठ्या स्नानं समाचरेत् ॥
सप्तम्या तु ततो वासोऽप्यष्टम्या चोपवीतकम् ।
नवम्या चन्दनं दद्याद्दशम्या पुष्पमेव च ॥
एकादश्या तथा धूपं द्वादश्या दीपमेव हि ।
नैवेद्यं तु त्रयोदश्या नमस्कारे चतुर्दशी ।
प्रदक्षिणे पञ्चदशी वर्जने षोडशी तथा ॥

वर्जने विसर्जने ।

स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनं तथा ।
हुत्वा षोडशभिर्मन्त्रैः षोडशान्नस्य चाहुतीः ॥
पुनः षोडशभिर्मन्त्रैर्दद्यात्पुष्पाणि षोडश ।
तच्च सर्वं जपेद्भूयः पौरुषं सूक्तमेव च ।
षण्मासात्सिद्धिमाप्नोति ह्येवमेव समर्चयेत् ॥ इति ।

यत्तु भागवते—

उद्वासावाहने न स्तः स्थिरायामुद्धवार्चने ।
अस्थिरायां विकल्पः स्यात्स्थण्डिले च भवेद्द्वयम् ॥ इति

यदपि स्कान्दे—

शालग्रामार्चने नैव आवाहनविसर्जने ।
शालग्रामे हि भगवान् समुद्भूतः सदा हरिः ॥

इत्यावाहनविसर्जने निषिद्धे तत्र तदृचो विनियोगो मन्त्रराजविधौ-

आवाहनऋचा दद्यात्पूर्वं पुष्पाञ्जलिं हरेः ।
तस्यैवोन्मुखताप्राप्त्यै यागे चोद्वासने ऋचा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्ते पुष्पाञ्जलिं ...

तत्रैव— प्रतिमापट्टयन्त्राणां ...
कारयेत्पर्वदिवसे यथा ...

वस्त्रमपि न प्रत्यहं नियमेन नूतनमेव समर्पणी...

वस्त्रमभ्युक्षणाच्छुद्धेदपरं तु दिने दिने ।

इति तत्त्वसागरोक्तेः । अपरं पुष्पादि ।

तत्रैव—यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठन्ति देवताः ।
न निर्माल्यं भवेत्तावत्स्वर्णरूप्यविभूषणम् ॥ इति ।

बौधायनः—'अथातो' [महादेवस्या]ऽहरहः परिचर्याविधिं व्याख्यास्यामः । स्नात्वा शुचौ देशे गोमयेनोपलिप्य प्रतिकृतिं कृत्वाक्षतपुष्पैर्यथालाभमर्चयेत् । सहपुष्पोदकेन महादेवमावाहयेत् ॐ भूः महादेवमावाहयामि, ॐ भुवः महादेवमावाहयामि, ॐ स्वः महादेवमावाहयामि, इत्यावाह्य आयातु भगवान् महादेव इत्यथ स्वागतेनाभिनन्दति । स्वागतमनुना स्वागतं भगवते महादेवाय तत्स्वासनं श्लक्ष्णमास्ताम् भगवान् महादेव इत्यत्र कूर्चं ददाति भगवतोऽयं कूर्चो दर्भमयस्त्रिवृद्धरितः सुवर्णस्तं जुषस्वेति । अत्र स्थानानि कल्पयामि । अग्रतो ब्रह्मणे कल्पयामि दक्षिणतः स्कन्दाय कल्पयामि विनायकाय कल्पयामि पश्चिमतः । स्थूलाय कल्पयाम्युत्तरतः उमायै कल्पयामि नन्दिकेश्वराय कल्पयामीति कल्पयित्वाथ सावित्र्या पात्रमभिमन्त्र्य प्रक्षाल्य त्रिरपः पवित्रमध्य आनीय सहपवित्रेणादित्यं दर्शयेत् । ॐमृतमिति स्नानम् । ॐ स्वरिति रुद्रेण पाद्यं दद्यात् । प्रणवेनार्घ्यम् । अथ व्याहृतिभिर्निर्माल्यं व्यपोह्योत्तरतश्चण्डाय नमः इत्यथैनं स्नापयित्वा "आपोहिष्ठा मयोभुवः" इति तिसृभिः "हिरण्यवर्णाः शुचयः पावका" इति चतसृभिः "पवमानः सुवर्जनः" इत्येतेनानुवाकेन स्नापयित्वाद्भिस्तर्पयति । भवं देवं तर्पयामि । शर्वं देवं तर्पयामि । ईशानं देवं तर्पयामि । पशुपतिं देवं तर्पयामि । रुद्रं देवं तर्पयामि । उग्रं देवं तर्पयामि । भीमं देवं तर्पयामि । महान्तं देवं तर्पयामि । इति तर्पयित्वाऽथैतानि वस्त्रयज्ञोपवीतान्याचमनीयान्युदकेन व्याहृतिभिर्दत्त्वा व्याहृतिभिः प्रदक्षिणमुदकं परिषिच्य "नमस्ते रुद्रमन्यव" इति गन्धं दद्यात् । "सहस्राणि सहस्रशः"

१ क. नास्ति । २ कृतमिति ख. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...धिश्रियम्"इति चाक्षतान्दद्यात्
...वरयत्वा सवितुः प्रसवेऽश्विनोर्बा
कादिषु ... महादेवाय जुष्टं चरुं निवेदयामी
...गादीन् ... धेयैरष्टौ पुष्पाणि दद्यात् । भवाय देवाय नमः
... । ईशानाय देवाय नमः । पशुपतये रुद्राय उग्रा
... भीमाय देवाय नमः । महते देवाय नमो ब्रह्मणे न
विष्णवे नमः । स्कन्दाय नमः । [पिनाकाय नमः । शूराय शूराय महा
कालाय नन्दिकेश्वराय नमः । इति चरुशेषेणाऽष्टाभिर्नामधेयैरष्टाहुती
होति । भवाय देवाय स्वाहेत्यष्टाभिर्हुत्वाऽथ शिष्टैर्गन्धमाल्यैर्ब्राह्मणानलं
कृत्याथैनमृग्यजुःसामभिः स्तुवन्ति " सहस्राणि सहस्रशः " इत्यनुवा
जपित्वा अन्यांश्च रौद्रान्मन्त्रान्यथाशक्त्या एकैकं भूर्भुवःस्वर्महा
भगवते महादेवाय च । रुद्रस्योद्वासकाले ॐ महादेवमुद्वासयामी
रुद्रमुद्वास्य ।]

प्रयातु भगवानीशः सर्वलोकनमस्कृतः ।
अनेन हविषा तृप्तः पुनरागमनाय च ।

पुनः संदर्शनाय च । इति प्रतिमास्थानेषु अप्स्वग्नावाहनविसर्जनव
सर्वं समानम् । महत्स्वत्ययनमाचक्षते इत्याह भगवान् बौधायनः इति

कौर्मे— न विष्ण्वाराधनात्पुण्यं विद्यते कर्म वैदिकम् ।
तस्मादनादिमध्यान्तं नित्यमाराधयेद्धरिम् ॥
अथवा देवमीशानं भगवन्तं सनातनम् ।
आराधयेन्महादेवं भावपूतो महेश्वरम् ।
मन्त्रेण रुद्रगायत्र्या प्रणवेनाथवा पुनः ॥

रुद्रगायत्री "तत्पुरुषाय विद्महे" इत्याद्या ।

ईशानेनाथवा रुद्रं त्र्यम्बकेन समाहितः ।
पुष्पैः पत्रैरथाद्भिर्वा चन्दनाद्यैर्महेश्वरम् ॥
तथोंनमः शिवायेति मन्त्रेणानेन वा यजेत् ।
नमस्कुर्यान्महादेवं ऋतं सत्यमितीश्वरम् ॥
निवेदयीत चात्मानं यो ब्राह्मणमितीश्वरे ।
प्रदक्षिणं द्विजः कुर्यात्पञ्च ब्रह्माणि वा जपेत् ।
ध्यायीत देवमीशानं व्योममध्यगतं शिवम् ॥ इति ।

---

१ क. नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

स्कान्दे— अग्राह्यं शिवनिर्मा[illegible]
शालग्रामस्य संसर्गा[illegible]

कौर्मे— यो मोहादथवाऽऽलस्[illegible]
भुङ्क्ते स याति नरकं सूकरेष्वभि[illegible]

शिववाक्यं स्कान्दे—
विप्रस्य तु सदैवाहं शुचेरप्यशुचेरपि ।
गृह्णन्बलिं प्रहृष्यामि विप्राणामिव दर्शनात् ॥

बलिं पूजाम् ।

तथा— शूद्रः कर्माणि यो नित्यं स्वीयानि कुरुते प्रिये ।
तस्याहमर्चां गृह्णामि चन्द्रखण्डविभूषिते ॥

तथा— नमोन्तेन शिवेनैव स्त्रीणां पूजा विधीयते ।

एवकारः प्रणवपरिसंख्यार्थः । तथा नृसिंहतापनीये—'सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्राय नेच्छन्ति' ।

भविष्येऽपि—स्वाहा प्रणवसंयुक्तं शूद्रे मन्त्रं ददद्द्विजः ।
शूद्रो नरकमाप्नोति ब्राह्मणः शूद्रतामियात् ॥

रुद्रयामले—न प्राचीमग्रतः शंभोर्नोदीचीं शक्तिसंश्रिताम् ।
न प्रतीचीं यतः पृष्ठमतो दक्षं समाश्रयेत् ॥

पूजकः शंभोः पूजार्थं प्राचीमवस्थिततये न समाश्रयेत, पञ्चवक्त्रपक्षे यतः संहारकं वक्त्रं प्राच्यामवस्थितम् । एकवक्त्रपक्षे तु सुतराम् । शक्तिदेवी, दक्षं दक्षिणाम्, इदं वचनं सूर्योपलक्षितदिग्विषयमेव । वक्ष्यमाणा आवरणपूजाऽप्येतदनुसारेणैव । पूज्यपूज्यकान्तःप्राच्यास्तु नायं विषयः बाधात् ।

लिङ्गपुराणे—विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।
पूजितोऽपि महादेवो न तस्य स्यात्फलप्रदः ॥
तस्मान्मृदाऽपि कर्तव्यं ललाटेऽपि त्रिपुण्ड्रकम् ॥

संवत्सरप्रदीपे—
त्रिपुरस्य वधे काले रुद्रस्याक्ष्णोर्यतः स्रुताः ।
अश्रूणां बिन्दवस्ते तु रुद्राक्षा ह्यभवन् भुवि ॥

स्कान्दे—पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः ।

---

१ स्पर्शात् क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...स्य च भक्षणात् ।
...वक्त्रस्य धारणात् ॥
...कादिषु ... तं जप्त्वा शीताम्भसा प्रक्षाल
...आदीनां ...
"

... ना मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः ।
... स याति नरकं घोरं यावदिन्द्राश्चतुर्दश ॥ इति तत्रैवोक्ते

[वोपदेवः—

रुद्राक्षान्कण्ठदेशे दशनपरिमितान्मस्तके विंशती द्वे
षट्षट् कर्णप्रदेशे करयुगलकृते एकमेकं शिखायाम् ।
वक्षस्यष्टाधिकं यः कलयति शतकं स स्वयं नीलकण्ठः]

अथ पार्थिवपूजा नन्दिपुराणे—

आयुष्मान्बलवान्श्रीमान्पुत्रवान्धनवान्सुखी ।
वरमिष्टं लभेल्लिङ्गं पार्थिवं यः समर्चयेत् ।
तस्मात्तु पार्थिवं लिङ्गं ज्ञेयं सर्वार्थसाधकम् ॥

भविष्ये—मृद्भस्मनोः शकृत्पिण्डं ताम्रकांस्यमयं तथा ।
कृत्वा लिङ्गं सकृत्पूज्यं वसेत्कल्पायुषं दिवि ॥
राज्यवित्तप्रदं लिङ्गं स्फाटिकं सर्वकामदम् ।
नर्मदागिरिजं श्रेष्ठमन्यदपि हि लिङ्गवत् ।
कृत्वा पूजय विप्रेन्द्र लप्स्यसे चेहितं फलम् ।

लिङ्गवल्लिङ्गाकारम् ।

तिथितत्त्वे—अक्षादल्पपरिमाणं न लिङ्गं कुत्रचिन्नरः ।
कुर्वीताङ्गुष्ठतो ह्रस्वं न कदाचित्समाचरेत् ॥

अङ्गुष्ठतस्तद्वृहत्पर्वग्रन्थितः ।
अङ्गुष्ठाङ्गुलिमानं तु यत्र यत्रोपदिश्यते ।
तत्र तत्र वृहत्पर्वग्रन्थिभिर्मिनुयात्सदा ॥

इति छन्दोगपारिशिष्टात् ।

शिवधर्मे—सहस्रमर्चयेल्लिङ्गं निरयं स न गच्छति ।
रुद्रलोकमवाप्नोति भुक्त्वा भोगाननुत्तमान् ॥

तथा— वालुकानि च लिङ्गानि पार्थिवानि च कारयेत् ।
सहस्रपूजनात्सोऽपि लभते वाञ्छितं फलम् ॥

---

१ क. नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवीपुराणे— मृदाहरणसंघट्ट...
स्नपनं पूजनं चैव...
हरो महेश्वरश्चैव ...
पशुपतिः शिवश्चैव महादेव इति...

अत्रानुष्ठानम्—ॐ हराय नम इति मृदाहरणम् ... नम इति संघट्टनम् । ॐ शूलपाणे इह सुप्रतिष्ठितो भवेति ...

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परमशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

इति ध्यात्वा पिनाकधृगिहागच्छेत्यावाह्य । ॐ पशुपतये नम इति स्नपनम् । एवं पाद्यम् । ॐ नमः शिवाय नम इति । एवमर्घ्यादिना पूजयेत् । विसर्जनात्पूर्वं भविष्योत्तरपुराणोक्तं स्वभावप्रसिद्धैशान्यादिषु अष्टदिक्षु वामावर्तेन पूजनम् । यथा ॐ शर्वाय क्षितिमूर्तये नमः, ॐ भवाय जलमूर्तयेनमः, ॐ रुद्राय अग्निमूर्तये नमः, ॐ उग्राय वायुमूर्तये नमः, ॐ भीमाय आकाशमूर्तये नमः, ॐ पशुपतये यजमानमूर्तये नमः, ॐ महादेवाय सोममूर्तये नमः ॐ ईशानाय सूर्यमूर्तये नमः ।

मूर्तयोऽष्टौ शिवस्यैताः पूर्वादिक्रमयोगतः
आंग्नेय्यन्ताः प्रयोज्यास्तु वेद्यां लिङ्गे शिवं यजेत् ॥

ततः ॐ महादेव क्षमस्वेति संहारमुद्रया विसर्जयेत् ॥ इति ।

नन्दिपुराणे—गोभूहिरण्यवस्त्रादिबलिपुष्पनिवेदने ।
ज्ञेयो नमःशिवायेति मन्त्रः सर्वार्थसाधकः ॥
सर्वमन्त्राधिकश्चायमोंकाराद्यः षडक्षरः ।
तन्मन्त्रजापी तत्कर्मरतस्तद्गतमानसः ।
निष्कामो पुरुषो राजन्स रुद्रपदमश्नुते ॥

पञ्चाक्षरमुपक्रम्य भविष्ये—
अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
महापातकसंयुक्तो मन्त्रस्यास्य जपे यथा ।
अधिकारी भवेत्सर्वं इति वेदेऽब्रवीच्छिवः ॥ इति ।

---

१ एतत् क. पाठः । २ अग्नेय्येताः क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...धिकारी भवेत्तथाब्रवीदित्यर्थः।

...पात्रं महेश्वरः।

...कादिषु ... व नरकार्णवात् ॥

...दीन ... यं यद्दत्तं सर्वकारणकारणम्।

... न्तफलं दातुर्भवतीति किमद्भुतम् ॥

... दत्त्वा नैवेद्यवस्त्रादीन्नाददीत कदाचन।

त्यक्तव्यं शिवमुद्दिश्य तदाऽऽदाने न तत्फलम् ॥

आदाने ग्रहणे।

शिवधर्मे—तस्मात्पुष्पैः फलैः पत्रैस्तोयैरपि च यत्फलम्।

तदनन्तफलं ज्ञेयं भक्तिरेवात्र कारणम् ॥

तत्रैव— लिङ्गानुलेपनं कार्यं दिव्यगन्धैः सुगन्धिभिः।

वर्षकोटिशतं दिव्यं शिवलोके महीयते ॥

शिवधर्मे—तस्मात्पुष्पप्रदानेन लिङ्गेषु प्रतिमासु च।

अशीतिवर्षकोटीनां दुर्गतिं न नरो व्रजेत् ॥

स्कान्दे—शुष्काण्यपि च पत्राणि श्रीवृक्षस्य सदैव हि ॥

प्रदातव्यानीति शेषः।

भविष्ये—धत्तूरकैश्च यो लिङ्गं सकृत्पूजयते नरः।

स गोदानफलं प्राप्य शिवलोके महीयते ॥

[विल्वपत्रैरखण्डैश्च लिङ्गं पूजयते सकृत् [१]

सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥]

तथा— सर्वकामप्रदं विल्वं दारिद्र्यस्य विनाशनम्।

विल्वपत्रात्परं नास्ति येन तुष्यति शंकरः ॥

तथा— केशकीटादिविद्धानि निशि पर्युषितानि च।

स्वयंपतितपुष्पाणि त्यजेत्परहृतान्यपि ॥

तथा— देवदारुसमेतं च सर्जश्रीवासकुन्दुरम्।

श्रीफलं चाज्यसंमिश्रं दग्ध्वाऽऽप्नोति परां गतिम् ॥

सर्जः शालरसः। श्रीवासः सरलद्रवः। कुन्दुरुः शैलेयमिति स्मार्त सल्लकीनिर्यास इति दामोदरः।

एभ्यः सौगन्धिकं धूपं षट्सहस्रगुणोत्तरम्।

---

१ क. नास्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अगरुं शतसाहस्त्रं ...
गुग्गुलं घृतसंयुक्तं ...
तथा— तैलेनाऽपि हि यो द...
तेन दीपप्रदानेन शिववेद्रां ...
नन्दिकेश्वरे—अथ भक्त्या शिवः पूज्यो नैवेद्यमुप...
यद्यद्देवात्मनः श्रेयस्तदीशाय प्रकल्पयेत् ...
भविष्ये तु— शालितण्डुलप्रस्थं तु कुर्यादन्नं सुसंस्कृतम् ।
शिवाय तु चरुं दद्याच्चतुर्दश्यां समाहितः ॥

शैवसर्वस्वे स्कान्दे—

एकमाम्रफलं पक्कं यः शंभो[1]र्विनिवेदयेत् ।
वर्षाणामयुतं भोगैः[3] शिवलोके महीयते ॥
एवं मोचाफलं पक्कं यः शिवाय निवेदयेत् ।
सर्वभक्ष्यमहाभोगैः[2] शिवलोके महीयते ॥

मोचा कदली । शिवपुराणे—

नैवेद्यं घृतसंयुक्तं मधुपर्कं निवेदयेत् ।
अग्निष्टोमस्य यज्ञस्य फलमाप्नोति मानवः ॥
परिपक्कं सुसंसृष्टमाज्यसिक्तं सुसंस्कृतम् ।
शिवाय मांसं दत्त्वा तु शृणु यत्फलमाप्नुयात् ॥
अशेषफलदानेन यत्फलं परिकीर्तितम् ।
तत्फलं प्राप्नुयान्नित्यं सर्वं मांसनिवेदनात् ॥

[शि[4]वधर्मे]—लिङ्गवेदी भवेद्देवी लिङ्गं साक्षान्महेश्वरः ।
तयोः संपूजनात्स्यातां देवी देवश्च पूजितौ ॥
देवीपुराणे—सव्यं व्रजेत्ततोऽसव्यं प्रणालं नैव लङ्घयेत् ।
एकीभूतमना रुद्रे यः कुर्यात्त्रिः प्रदक्षिणम् ॥
छिन्नस्तेन भवेद्ग्रन्थिर्न तस्य पुनरुद्भवः ।
भविष्ये—जानुभ्यां चैव पाणिभ्यां शिरसा च विचक्षणः ।
कृत्वा प्रणामं देवेशे सर्वान्कामानवाप्नुयात् ॥
लिङ्गपुराणे— गन्धधूपनमस्कारैर्मुखवाद्यैश्च सर्वशः ।
यो मामर्चयते तत्र तदा तुष्याम्यहं सदा ॥

---

१ त्वं क.पाठः । २ सर्वभक्ष्यमहा॰ क.पाठः । ३ वर्षाणामयुतैर्भो॰क. पाठः । ४ क. नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...क्तो वा सर्वपातकैः ।
...भावयञ्शिवमात्मना ॥
...स्तेऊर्ध्वास्यं दक्षहस्तकम् ।
...ताङ्गुलोरङ्गुलीभिः संयुज्य परिवर्तयेत् ।
...प्रोक्ता संहारमुद्रेयमर्पणे तु प्रशस्यते ।
...मनीति शेषः ।

स्कान्दे— निर्माल्यं यो हि मद्भक्त्या शिरसा धारयिष्यति ।
अशुचिर्भिन्नमर्यादो नरः पापसमन्वितः ॥
नरके पच्यते घोरे तिर्यग्योनौ च संभवेत ।
ब्रह्महाऽपि शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत् ।
तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रतैः ॥

शुचिः स्नानादिनेत्यर्थः । एवं च—
स्पृष्ट्वा रुद्रस्य निर्माल्यं सवासा आप्लुतः शुचिः ॥
इति कालिकापुराणीयमशुचिविषयमनुपनीतविषयं [1]चेति स्मार्तः ।
वह्वृचगृह्यपरिशिष्टे—

अग्राह्यं शिवनिर्माल्यं पत्रं पुष्पं फलं जलम् ।
शालग्रामशिलास्पर्शात्सर्वं याति पवित्रताम् ॥ इति कौर्मे ।

[[2]कृत्यमहार्णवे शिवागमे लिङ्गपूजायां गुणफलसंबन्धः ।
लवणेन च सौभाग्यं पार्थिवं सार्वकामिकम् ।
अनेकफलदं भूरिसैकतं परिकीर्तितम् ॥
ग्रामदं तिलपिष्टोत्थं तुषोत्थं मारणे स्मृतम् ।
अन्नोत्थमन्नदं प्रोक्तं गुडोत्थं शान्तिवर्धनम् ॥
गन्धोत्थं गुणदं भूरिशर्करोत्थं सुखप्रदम् ।
वंशाङ्कुरोत्थं वश्यार्थं गोमयं सर्वरोगहृत ॥
वंशाद्वि संभवं लिङ्गं सर्वशत्रुनिवर्हणम् ।
आसुरीलवणोत्थं तु सर्वलोकवशंकरम् ॥
स्तम्भने रजनीपिष्टसंभवं लिङ्गमुत्तमम् ।
तण्डुलोद्भवपिष्टस्य लिङ्गं सर्वसुखप्रदम् ॥
दधिदुग्धोद्भवं लिङ्गं कीर्तिग्रामाज्यवर्धनम् ।

१ वेति क. पाठः । २ एतदादिशालग्रामशिलापरीक्षान्तं क. नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दूर्वागुडूचीसंभूत[illegible]
इक्षुवृक्षोद्भवं लिङ्गमु[illegible]
आगमोक्तनियोगं तु[illegible]
वस्तुमात्रस्य कुर्वीत लिङ्गं त तत्फल[illegible]
वार्क्षं वित्तप्रदं लिङ्गं स्फाटिकं सर्वका[illegible]
आयुष्यं हीरजं ज्ञेयं रोगहृन्मौक्तिकोद्भवम् ॥
सुखकृत्पुष्परागोत्थं वैडूर्यं शत्रुदर्पहृत् ।
पद्मरागं च लक्ष्मीदमैन्द्रनीलं यशःप्रदम् ॥
महाभूतिप्रदं हैमं राजतं भूतिवर्धनम् ।
आरकूटं तथा कांस्यं शुल्वं सामान्यमुक्तिदम् ॥
त्रपुसीसायसं लिङ्गं शत्रूणां नाशने हितम् ।
विद्यार्थी लिङ्गसाहस्रं कामार्थी शतपञ्चकम् ॥
सुहृत्कामः सहस्रं तु वस्त्रार्थी शतमष्टकम् ।
उच्चाटनपरं चैवमथोक्तं च सहस्रकम् ॥
मारणार्थी सप्तशतं मोहार्थी शतमष्टकम् ।
स्तम्भनं तु तदर्धेन मारणे तु तदर्थकम् ॥
निगडान्मुक्तिकामस्तु सहस्रं तु समाचरेत् ।
महाराजभये पञ्चसहस्रं सर्वकामदम् ॥
एकं पापहरं प्रोक्तं द्विलिङ्गं कार्यसिद्धिम् ।
त्रिलिङ्गं सर्वकामानां कारणं परमाद्भुतम् ॥
लिङ्गानामयुतं वापि महाराजभयं हरेत् ।
कारागृहविमुक्त्यर्थमनन्तं कारयेद्बुधः ॥
डाकिन्यादिभये प्राप्ते सहस्रं कारयेत्तदा ।
सहस्राणां पञ्चशतं पुत्रकामेन कारयेत् ॥
कृत्वा नित्यं विधानेन सगुणं पुत्रमाप्नुयात् ।
लक्षमेकं तु लिङ्गानां यः करोति नरो भुवि ।
शिव एव भवेन्नित्यं नात्र कार्या विचारणा ॥

एतेषां च प्रतिष्ठापूजादिसर्वं प्रतिष्ठामयूखे वक्ष्यते ।

॥ इति लिङ्गप्रकृतिद्रव्यभेदेन फलभेदः ॥

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...ङ्गम् ।

...का...
... ...भागसमं नयेत् ।
...गुणं कुर्यान्नाहवत्पीठविस्तृतिम् ॥
...शांशत्रिगुणं कुर्यादुन्नतं पठिमुत्तमम् ।
वृत्तं वा चतुरस्रं वा मध्ये कण्ठसमन्वितम् ॥
द्विगुणं लिङ्गनाहाच्च कण्ठनाहं समाचरेत् ।
त्रिमेखलमधश्चोर्ध्वं समं वाऽथ द्विमेखलम् ॥
लिङ्गमस्तकविस्तारं षड्भागं विभजेत्ततः ।
मेखलामेकभागेन कुर्यात्खातं च तन्समम् ॥
लिङ्गदैर्घ्यसमं कुर्यात्प्रणालं पीठबाह्यतः ।
विस्तारं तत्समं मूले तदर्धं च तदग्रतः ॥
जलमार्गः प्रकर्तव्यस्तस्य मध्ये त्रिभागतः ।
कुर्यात्पीठार्धदीर्घं वा प्राणालं च शिवागमात् ॥ इति ।

पूजा शलाका । आभोग उच्चता । नाहः पुष्टता । अयमाशयः—लिङ्गमस्तकव्यासो लिङ्गोच्चतासमः । व्यासत्रिगुणो नाहः । तावानेव पीठव्यासः । पीठं च वृत्तं चतुरस्रं वा । प्रणालिका च लिङ्गव्यासवन्मूले विस्तृता । अग्रे तदर्धा तद्विगुणा सार्धा वा दीर्घेति चन्द्रिकायाम् ।

॥ इति लिङ्गपरिमाणम् ॥

चमत्कारचिन्तामणौ—

नार्च्या गृहेऽश्मजामूर्तिश्चतुरङ्गुलतोऽधिका ।
न वितस्त्यधिका धातुसंभवा श्रेय इच्छता ॥ इति ।

अथ शालग्रामशिलापरीक्षा ।

विष्णुरहस्ये—गण्डकी सरितां पुण्या चक्रतीर्थं च तत्र च ।
शालग्रामाभिधं क्षेत्रं तत्र तेषां समुद्भवः ॥
द्वारदेशे समे चक्रे दृश्येते नान्तरीयके ।
वासुदेवः स विज्ञेयः शुक्लाभश्चातिशोभनः ॥
द्वे चक्रे एव संलग्ने पूर्वभागे तु पुष्कलः ।
संकर्षणः स विज्ञेयो रक्ताभश्चैव सर्वतः ॥
प्रद्युम्नः सूक्ष्मचक्रस्तु श्यामवर्णस्तथैव च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुशिरच्छिद्रबहु…
अनिरुद्धश्च नील… …ोलि…
अतसीपुष्पसंकाश… …कैः …
परितो वर्तुलश्चैव … …भीर … …कंप।
विन्दुत्रयसमायुक्तः शङ्खचक्रान्वि…
तत्तल्लक्षणसंयुक्तो धनुर्वलयपश्चकः ।
दीर्घदक्षिणक्षामास्यो मत्स्याकृतिसमीपगः ॥
कूर्ममूर्तिर्गर्भवक्त्रौ दुर्लभः सर्वकामदः ।
वनमालाङ्किता श्यामा वर्तुलाचातिशोभना ॥
श्रीवत्सकौस्तुभाभ्यां च विन्दुना परिशोभिता ।
सा चैवं देवदेवस्य पूजनीया महीक्षिता ॥
वराहशक्तिलिङ्गस्तु चक्रे च विषमे स्थिते ।
इन्द्रनीलनिभः स्थूलस्त्रिरेखालाञ्छितः शुभः ॥
कपिलो नारसिंहस्तु बहुचक्रस्तथोन्नतः ।
वामपार्श्वे स्थिते चक्रे कृष्णवर्णे सविन्दुके ॥
लक्ष्मीनृसिंहो विख्यातो भुक्तिमुक्तिप्रदायकः ।
पारिजातध्वजी वज्री वर्तुलः स्यात्सुशोभनः ॥
पुरुषोत्तमः स विज्ञेयः सर्वसौभाग्यदायकः ।
रेखाद्वितयसंयुक्तः पद्मचिह्नित एव च ॥
श्यामो नारायणो देवो नाभिचक्रस्तथोन्नतः ।
ध्वजवज्राङ्कुशोपेतश्चतुश्चक्रश्च वर्तुलः ॥
गदाकृतिस्तथा रेखातल्लक्ष्मीर्मध्यदेशतः ।
लक्ष्मीनारायणो देवो ह्यभीष्टफलदः शुभः ॥
चतुश्चक्रः सूक्ष्मरन्ध्रो वनमालाङ्कितोदरः ।
लक्ष्मीनारायणः प्रोक्तो भुक्तिमुक्तिफलप्रदः ॥
अनन्तचक्रैर्बहुभिश्चिह्नैरप्युपलक्षितः ।
अनन्तः स तु विज्ञेयः सर्वपूजाफलप्रदः ॥
नानावर्णोऽनन्तः स्यान्नागभोगेन चिह्नितः ।
कृष्णवर्णस्तथा विष्णुः स्थूलचक्रः सुशोभनः ॥
गदाकृतिस्तथा रेखा दृश्यते मध्यदेशतः ।
श्रीधरस्तु तथा देवश्चिह्नितो वनमालया ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धिफलप्रदः ।
श्यामवर्णो महाद्युतिः ॥
रेखा चैव तु दक्षिणे ।
दनः स विज्ञेय एकचक्रो महाद्युतिः ॥
वर्णोऽव्रणश्चैव वर्तुलश्च सुशोभनः ।
श्यामलश्च महासूक्ष्मो दधिविन्दुसमन्वितः ॥
दधिवामन इत्युक्तः पशुपुत्रधनप्रदः ।
वामपार्श्वे तथा चक्रे रेखा चैव तु दक्षिणे ॥
पीतवर्णो धनुःपर्शुलाङ्गलाङ्कितशोभितः ।
वामेतरे च रामश्च सर्वमृत्युहरः शुभः ॥
परमेष्ठी तु शुक्लाभः पद्मचक्रसमन्वितः ।
वर्तुलस्तु तथा पीतः पृष्ठे तु सुषिरः स्मृतः ॥
हयग्रीवोऽङ्कुशाकारो रेखापद्मसमीपगः ।
वहुरेखासमाकीर्णः पक्षे नीलमथापि वा ॥
कृष्णवर्णः समाख्यातो महासारस्वतप्रदः ।
चतस्रो यत्र दृश्यन्ते रेखाः पार्श्वसमीपगाः ॥
द्वे चक्रे मध्यदेशे तु सा शिला तु चतुर्मुखी ।
कूर्मचक्रे महाभागे श्वेताभा गोखुरान्विता ॥
शिवनाभिरिति ख्याता भुक्तिमुक्तिफलप्रदा ।
चक्रं तु केवलं यत्र पङ्कजेन समन्वितम् ॥
लाञ्छनं वनमालायाः श्रिया युक्तः स्थितो हरिः ।
एकं चक्रं शिरोदेशे नानावर्णं मुखे तथा ॥
सुदर्शनमिति ज्ञेयं सर्वपापप्रणाशनम् ।
चतुश्चक्रः श्यामवर्णो भवेद्देवो जनार्दनः ॥
वैकुण्ठो मणिवर्णाभश्चक्रमेकं तथाम्बुजम् ।
द्वारोपरि तथा रेखा पूजयेत्तं सुखप्रदम् ॥
गोविन्दः पुण्डरीकाक्षः कृष्णवर्णो महाद्युतिः ।
दक्षिणे तु गदाचक्रे वामे पर्वतलाञ्छनम् ।
अर्धचन्द्राकृतिर्देवो हृषीकेशः स उच्यते ॥

अथ तन्महिमा लिङ्गपुराणे—

लिङ्गकोटिसहस्रैस्तु पूजितैर्यत्फलं भवेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्फलं कोटिगुणितं ...
शालिग्रामसमीपे तु क्रो...
कीटकोऽपि मृतो याति ...
तथा— शालग्रामशिलाचक्रं यो दद्याद्दानमुत्तमम् ।
भूचक्रं तेन दत्तं स्यात्सशैलवनकाननम् ॥

शिववाक्यम्—

अनर्हं मम नैवेद्यं पत्रं पुष्पं फलं जलम् ।
शालग्रामशिलासंगात्सर्वं याति पवित्रताम् ॥
शालग्रामशिलायां तु सदा श्रीविष्णुपूजनम् ।
नित्यं सन्निहितस्तत्र शालग्रामे जगद्गुरुः ॥

सदा सन्निहित इत्यनेन प्रतिष्ठादिकं नास्तीत्युच्यते ।

अपूज्या उक्ताः—

कपिला कर्बुरा भग्ना बहुचक्रैकचक्रिका ।
बृहन्मुखी बृहच्चक्रा लग्नचक्राऽथवा पुनः ॥
अधोमुखी भग्नचक्रा पूजिता दुःखदायिनी ।
अविज्ञाता च वक्रा च रूक्षा स्थूलाऽतिदुःखदा ॥ इति ।

॥ इति शालग्रामशिलापरीक्षा ॥]

अथ गुरुपूजा मात्स्ये—

तत्रोपदेष्टारमपि पूजयेच्च ततो गुरुम् ।
न पूज्यते गुरुर्यत्र नरैस्तत्राफला क्रिया ॥

शिवपुराणे—

वस्त्राभरणमाल्यानि शयनान्यासनानि च ।
प्रियाणि चात्मनो यानि तानि देयानि वै गुरोः ॥ इति ।

अथ वैश्वदेवविधिः ।

नृसिंहपुराणे—पौरुषेण च सूक्तेन ततो विष्णुं समर्चयेत् ।
वैश्वदेवं ततः कुर्याद्बलिकर्म तथैव च ॥ इति ।

शातातपः—वैश्वदेवः प्रकर्तव्यः पञ्चसूनापनुत्तये । इति ।

सूना हिंसास्थलम् ।

यमः— पञ्चसूना गृहस्थस्य वर्तन्तेऽहरहः सदा ।
कण्डणी पेषणी चुल्ली जलकुम्भ अवस्करः ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...।

...स्कर उत्करः । उपस्कर इति पाठे

...विप्रः सोऽन्नं व्याहृतिभिः स्वयम् ।
...ह्त्वा शाकलमन्त्रैस्तु शिष्टाद्भूतबलिं हरेत् ॥

...भार्याऽभावेन श्रौतस्मार्ताग्निपरिग्रहाधिकारशून्यः ।

कर्मप्रदीपे— अग्न्यादिर्गौतमेनोक्तो होमः शाकल एव च ।
अनाहिताग्नेरप्येष युज्यते बलिभिः सह ॥

अग्न्यादिरग्निवाय्वादिदैवत्यभूरादिव्याहृतिकरणकः । अपिरेवकारार्थे ।

विष्णुः— प्रजापतिहविर्हुत्वा पूजयेदतिथिं ततः ।

प्रजापतिहविरिति "प्रजापतये स्वाहा" इति हुत्वेत्यर्थः। पूजयेदिति तु स्वकालीनमनुष्ययज्ञानुवादमात्रं न तु होमोत्तरं तद्विधिः । ज्योतिष्टोमे शाकलहोमाङ्गभूता "देवकृतस्यैनसोऽवयजनमसि" इत्याद्याः षट् शाकलमन्त्राः कातीयानां प्रसिद्धाः ।

आश्वलायनगृह्ये—'अथ सायंप्रातः सिद्धस्य हविष्यस्य जुहुयात् अग्निहोत्रदेवताभ्यः सोमाय वनस्पतयेऽग्नीषोमाभ्यामिन्द्राग्निभ्यां द्यावापृथिवीभ्यां धन्वन्तरय इन्द्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे स्वाहेति । सायंशब्दो रात्रिपरः, प्रातःशब्दोऽहःपरः । सिद्धस्य पक्वस्य अग्निहोत्रदेवताभ्य इति । सायमग्निः प्रातः सूर्यः, प्रजापतिरुभयत्र । सोमाय वनस्पतय इत्येकाहुतिः वनस्पतिशब्दस्य यौगिकत्वेन विशेष्यापेक्षत्वेनासमासंस्थसन्निहितसोमपदान्वयात् । यथा " त्वाष्ट्रं पात्नीवतमालभेत " इत्यत्र पात्नीवतशब्दस्य त्वाष्ट्रपदान्वयः। अग्निर्बृहस्पतिः सोमो वनस्पतिरित्यादौ वनस्पतेर्गुणत्वदर्शनाच्च विश्वेभ्यो देवेभ्य इत्यप्येकैवाहुतिः विश्वशब्दस्य सर्वनाम्नो बुद्धिस्थापेक्षत्वेन सन्निहितदेवशब्दान्वयात् । एवं दशाहुतयो भवन्ति । वृत्तिकृतो नारायणस्याप्ययमेवाशयः। इत्येष देवयज्ञः ।

भूतयज्ञमाह स एव—अथ बलिहरणमेताभ्यश्चैव देवताभ्योऽद्भ्य ओषधिवनस्पतिभ्यो गृहाय गृहदेवताभ्यो वास्तुदेवताभ्य इन्द्रायेन्द्रपुरुषेभ्यो यमाय यमपुरुषेभ्यो वरुणाय वरुणपुरुषेभ्यः सोमाय सोमपुरुषेभ्य इति प्रतिदिशं, ब्रह्मणे ब्रह्मपुरुषेभ्य इति मध्ये, विश्वेभ्यो देवेभ्यः सर्वेभ्यो भूते-

---

१ अन्नं व्याहृतिभिरिति क. पाठः । २ म्रस्य क. पाठः । ३ थैकाहुतिरित्याहुः क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्यो दिवाचारिभ्य इति दिवा, नक्तंच...
अथानन्तरमेताभ्यः पूर्वोक्ताभ्यो दशा...

उदगिन्द्राद्बलेरिन्द्रपुरुषे...

इति कारिकोक्तेः इन्द्रादिप्रधानदेवतोत्तरदेशेषु त... पूर्वोक्तदशाहुतिदेवताकोन्वलीन् प्राक्संस्थान् दत्त्वा किं... ऽद्भ्य इत्यादिभ्यो वलीन्दत्त्वाऽन्तराले प्रागादिषु इन्द्रादिभ्यस्तत्पुरु... यक्ष्म दत्त्वा तन्मध्ये ब्रह्मणे तच्चतुर्दिक्षु ब्रह्मपुरुषादिभ्यो दद्यात्। प्रथमं दिवाचारिभ्यो वल्युक्तेर्वैश्वदेवः प्रातरारभ्यः इति वृत्तौ। इति भूतयज्ञः ॥

पितृयज्ञमाह—स्वधा पितृभ्य इति प्राचीनावीती शेषं दक्षिणा निनयेत्। [१]शेषग्रहणादानन्तर्यं परप्रयुक्तं च द्रव्यं लभ्यते। दक्षिणा दक्षिणस्यां दिशि "दक्षिणादाच्" ॥ इति पितृयज्ञः ॥

इदमेव कर्मत्रयं वैश्वदेवशब्दवाच्यं [देवभूतयज्ञयोर्विश्वेदेवसंबन्धेन तत्प्रख्यानात् पितृयज्ञस्य तच्छेषप्रतिपादकत्वेन तदङ्गत्वाच्च।]

कारिका—गृहस्थो वैश्वदेवाख्यं कर्म प्रारभते दिवा।
तन्त्रं नास्त्यत्र भगवद्वृत्तिकारवचो यथा ॥
औपासनाग्निमन्यं वा समिध्याथ हविर्भुजम्।
पर्यूह्य परिषिच्याग्निमलंकृत्य च पूर्ववत् ॥
हविष्यं पक्वमादध्यादधिश्रित्यानले च तत्।
प्रोक्ष्योद्वास्य घृताभ्यक्तं हृदि सव्यं निधाय च ॥
हुत्वा हस्तेन सूर्यायेत्यादिभिर्दशभिस्ततः।
प्रजापतिपदस्योक्तिर्वैश्वदेवे न तु स्मृतिः ॥
पर्यूहनोक्षणे कुर्याद्देवयज्ञोऽयमीरितः।
एतैर्भुवि वलीन्दत्त्वा प्राक्संस्थानान्निरन्तरान् ॥
मुक्त्वाऽन्तरालं प्राक्संस्थानद्भ्य इत्यादिभिर्हरेत्।
इहाऽपि भवति स्वाहाकारो न पितृयज्ञके ॥
अद्भ्यो हृताद्बलेः प्रत्यगिन्द्रायेति वलिं हरेत्।
यमायेत्यन्तरालस्य हरेद्दक्षिणतो वलिम् ॥
याम्याद्बलेरुदग्याम्यपुरुषेभ्यो वलिं हरेत्।
प्राग् ब्रह्मणो वलेर्हुत्वा वरुणायेति मन्त्रतः ॥

१ कव' क. पाठः। २ क. नास्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...ः ।

...पुरुषेभ्यो वलिं हरेत् ।
...य हरेदुत्तरतो बलिम् ॥
...पुरुषेभ्यो वलिं हरेत् ।
...न्तिस्त्वाह स्वाहान्तैर्वलीन्दत्त्वा निरन्तरान् ॥
...त्वाऽन्तरालमिन्द्रादिदिग्देवानां वलीन्हरेत् ।
इन्द्रादिवलितः पूर्वं प्राच्यां स्यात्पौरुषो वलिः ॥
अन्तराले वलीन्हृत्वा शिष्टैर्मन्त्रैरतः परम् ।
रक्षोभ्य इति सर्वस्माद्बलिमुत्तरतो हरेत् ॥
भूतयज्ञोऽयमुदितः प्राचीनावीत्यतः परम् ।
स्वधा पितृभ्य इत्युक्त्वा दक्षिणस्यां तु निर्वपेत् ॥ इति ।

अयं च नराकारः संपद्यते । चक्राकारमप्याह ।

शौनकः—चक्राकारेण यो विप्रः सदा भूतवलिं हरेत् ।
सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥ इति ।

अथ गृहवलिः ।

शौनकः—देवयज्ञान्नशेषात्तु गृहद्वारादिषु क्षिपेत् ।
चण्डालपतितादिभ्यो भूतयज्ञान्नशेषतः ।
पितृयज्ञान्नशेषेण वायसेभ्यो वलिं हरेत् ॥ इति ।

गृह्यपरिशिष्टे—"अथास्य शेषेण गृहदेवतानां वलीन्द्वारे पितामहाय प्रकीले रुद्रायाऽथ गृहप्राच्यादिप्रतिदिशं सनवग्रहायेन्द्राय वलभद्राय यमाविष्णुभ्यां स्कन्दवरुणाभ्यां सोमसूर्याभ्यामश्विभ्यां वसुभ्यो नक्षत्रेभ्योऽथ मध्ये वास्तोष्पतये ब्रह्मणे प्रागादिभित्तिमूलेषु सिद्ध्यै वृद्ध्यै श्रियै कीर्त्यै वरुणायोदधानेऽश्विभ्यां दृषदुपलयोर्द्यावापृथ्वीभ्यामुलूखलमुसलयोरथ निष्क्रम्य भूमावप आसिच्य श्वचाण्डालपतितभूतवायसेभ्योऽन्नं भूमौ विकिरेद्ये भूताः प्रचरन्ति दिवा वलिमिच्छन्तो वितुदस्य प्रेष्टाः । तेभ्यो वलिं पुष्टिकामो ददामि मयि पुष्टिं पुष्टिपतिर्ददातु इति । रात्रौ चेन्नक्तं वलिमिति ब्रूयादथ प्रक्षालितपाणिपाद आचम्य " शान्ता पृथिवी शिवमन्तरिक्षम्" इति जप्त्वाऽन्यानि च स्वस्त्ययनानि । ततो मनुष्ययज्ञपूर्वकं भुञ्जीत ॥ इति ।

अथ मनुष्ययज्ञः ।

मनुः— अतिथिभ्योऽन्नदानं तु नृयज्ञः स तु पञ्चमः । इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मार्कण्डेयपुराणे—

आचम्य च ततः कुर्या[illegible]
मुहूर्तस्याष्टमं भागमुदी[illegible]कैः,
न मित्रमतिथिं कुर्यान्नैकग्रामनिवासि[illegible]
अज्ञातकुलनामानं तत्काले समुपस्थितं [illegible]
बुभुक्षुमागतं श्रान्तं याचमानमकिंचनम् ।
ब्राह्मणं प्राहुरतिथिं संपूज्यः शक्तितो बुधैः ॥ इति ।

कौर्मे— हन्तकारमथाग्रं वा भिक्षां वा शक्तितो द्विजः ।
दद्यादतिथये नित्यं बुध्येत परमेश्वरम् ॥ इति ।

अतिथिं परमेश्वरं भावयेदित्यर्थः ।

मनुः— ग्रासमात्रं भवेद्भिक्षा अग्रं ग्रासचतुष्टयम् ।
अग्रं चतुर्गुणीकृत्य हन्तकारो विधीयते ॥ इति ।

पराशरः—दद्याच्च भिक्षात्रितयं परिव्राड्ब्रह्मचारिणौ ।
इच्छया च ततो दद्याद्विभवे सत्यवारितम् ॥ इति ।

माधवीये पुराणे—

यत्फलं सोमयागेन प्राप्नोति धनवान् द्विजः ।
सम्यक्पञ्चमहायज्ञैर्दरिद्रस्तदवाप्नुयात् ॥ इति ।

व्यासः—पञ्चयज्ञांस्तु यो मोहान्न करोति गृहाश्रमी ।
तस्य नायं च न परो लोको भवति धर्मतः ॥ इति ।

अथ कात्यायनीयो वैश्वदेवानुष्ठानप्रयोगः ।

पञ्चमहायज्ञनिमित्तं मातृपूजापूर्वकमाभ्युदयिकश्राद्धं कृत्वा वैश्वदेवार्थं पाकं विधाय समुद्धृत्याभिघार्य पश्चादग्नेः प्राङ्मुख उपविश्य दक्षिणं जान्वाच्य मणिकोदकेनाग्निं पर्युक्ष्यौदनमादाय ब्रह्मणे स्वाहा इदं ब्रह्मणे, प्रजापतये स्वाहा इदं प्रजापतये, गृह्याभ्यः स्वाहा इदं गृह्याभ्यः, कश्यपाय स्वाहा इदं कश्यपाय, अनुमतये स्वाहा इदमनुमतये, इति पञ्चाहुतीर्दत्त्वा मणिकसमीपे हुतशेषेणान्नेन पर्जन्याय नमः इदं पर्जन्याय, अद्भ्यो नम इदमद्भ्यः, पृथिव्यै नमः इदं पृथिव्यै इति प्राक्संस्थमुदक्संस्थं वा बलिं दत्त्वा दक्षिणोत्तरयोर्द्वारशाखयोर्यथाक्रमं धात्रे नमः इदं धात्रे, विधात्रे नमः इदं विधात्रे, इति बलिद्वयं दत्त्वा प्रागादिक्रमेण वायवे नमः इदं वायवे, इति प्रतिदिशं बलिचतुष्टयं दत्त्वा प्राच्यै दिशे नमः इदं प्राच्यै,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...ः।

... प्रतीच्यै दिशे नमः इदं प्रतीच्य...
... इति दिग्भ्यश्च बलिं दत्त्वा तदन्तराले
...य नमः इदमन्तरिक्षाय, सूर्याय नमः
...त्रयं दत्त्वा तदुत्तरतो विश्वेभ्यो देवेभ्यो नमः
...ः, विश्वेभ्यो भूतेभ्यो नमः इदं विश्वेभ्यो भूतेभ्यः
... दत्त्वा तयोरप्युत्तरतः उषसे नम इदमुषसे, भूतानां पतये नम इदं भूतानां पतये, इति बलिद्वयं दत्त्वा ब्रह्मादिबलीनां दक्षिणतः प्राचीनावीती दक्षिणामुखः पितृभ्यः स्वधा नम इति मन्त्रेण पात्र्यवशिष्टान्नेनैकं बलिं दत्त्वा पात्रीं प्रक्षाल्य "यक्ष्मैतत्ते निर्णेजने नमः" इति निर्णेजनजलं वायव्यां दिश्युत्सृज्येदं यक्ष्मणे इत्युक्त्वा

ऐन्द्रवारुणवायव्याः सौम्या वै[1] नैरृतास्तथा ।
वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयाऽर्पितम् ॥

इदं वायसेभ्यः ।

द्वौ श्वानौ श्यामशबलौ वैवस्वतकुलोद्भवौ ।
ताभ्यां पिण्डं प्रदास्यामि स्यातामेतावहिंसकौ ॥

इदं श्वभ्यः ।

देवा मनुष्याः पितरो वयांसि सिद्धाश्च यक्षोरगदैत्यसंघाः ।
प्रेताः पिशाचास्तरवः समस्ता ये चान्नमिच्छन्ति मयाद्य दत्तम् ॥

इदं देवादिभ्यः ।

पिपीलिकाः कीटपतङ्गिकाद्या बुभुक्षिताः कर्मनिबन्धबद्धाः ।
तृप्त्यर्थमन्नं हि मया प्रदत्तं तेषामिदं ते मुदिता भवन्तु ॥

इदं पिपीलिकादिभ्यः ।

इति काकादिबलीन्बहिर्दत्त्वा पादौ प्रक्षाल्याचम्यातिथिप्राप्तौ पादप्रक्षालनपूर्वकं गन्धमाल्यादिभिरभ्यर्च्यान्नं परिविष्य हन्त तेऽन्नमिदं मनुष्याय इति संकल्प्य दद्यात् । इति दिक् ।

॥ इति कातीयानां वैश्वदेवः ॥ इति पञ्चमहायज्ञाः ॥

अथ भोजनम् ।

व्यासः—पञ्चार्द्रो भोजनं कुर्यात्प्राङ्मुखो मौनमास्थितः ।
हस्तौ पादौ तथैवास्यमेषु पञ्चार्द्रता मता ॥ इति ।

१ ये क. पाठः । २ पशवो ख. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आश्वमेधिके—आर्द्रपादस्तु भुञ्ज [illegible]

पादाभ्यां धरणीं [illegible] वोल्लि [illegible]

वौधायनः—उपलिप्ते समे स्थाने शु [illegible] कैः, [illegible]

चतुरस्रं त्रिकोणं वा [illegible] र्धेच [illegible] कम्।

कर्तव्यमानुपूर्व्येण ब्राह्मणादिषु मण्ड [illegible]

पैठीनसिः—सौवर्णे राजते ताम्रे पद्मपत्रपलाशयोः। [illegible]

भाजने भोजनं कुर्वन्त्रिरात्रफलमश्नुते ॥

एक एव तु यो भुङ्क्ते विमले कांस्यभाजने।

चत्वारि तस्य वर्धन्ते आयुः प्रज्ञा यशो बलम् ॥ इति।

पद्मपलाशपत्रग्रहणं गृहस्थभिन्नपरम्।

ताम्रपात्रे न भुञ्जीत भिन्नकांस्ये मलाविले ॥

पलाशपद्मपत्रेषु गृही भुक्त्वैन्दवं चरेत्।

ब्रह्मचारियतीनां तु चान्द्रायणफलं भवेत् ॥

इति वृद्धमनुव्यासोक्तिरिति मदनादयः। पलाशो वल्लीपलाश इति स्मृत्यर्थसारे। कांस्यपात्रं गृहिमात्रपरम्।

ताम्बूलाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम्।

यती च ब्रह्मचारी च विधवा च विवर्जयेत् ॥

इति प्रचेतस उक्तेः। पात्रं प्राणाहुतिग्रहणोत्तरं यन्त्रादौ स्थाप्यम्।

न्यस्तपात्रस्तु भुञ्जीत पञ्च ग्रासान्महामुने।

शेषमुद्धृत्य भोक्तव्यं पित्र्यर्थे तु न चोद्धरेत् ॥

इति व्यासोक्तेः। न्यस्तपात्रः भूमिन्यस्तपात्रः। उद्धृत्य यन्त्रादौ स्थाप्य। पित्र्यर्थे श्राद्धे भूमितो नोद्धरेदित्यर्थ इति मदनादयः।

तथाच ब्रह्मपुराणे—

पित्र्ये कर्मणि भुञ्जानो भूमौ पात्रं न चालयेत् ॥ इति।

[तत्रैव—अन्नं दृष्ट्वा प्रणम्यादौ प्राञ्जलिः कथयेत्ततः।

अस्माकं नित्यमस्त्वेतदिति भक्त्याथ वन्दयेत् ॥ इति।]

गोभिलः—'अथातः प्राणाहुतिकल्पः व्याहृतिभिर्गायत्र्याभिमन्त्र्य ऋतं त्वा सत्येन परिषिञ्चामि इति सायं। सत्यं त्वर्तेन परिषिञ्चामि, इति प्रातः' इत्यादि। तदनन्तरं कृत्यमुक्तं भविष्यत्पुराणे—

भोजनात्किंचिदन्नाग्रं धर्मराजाय वै बलिम्।

भुञ्जीयात् क. पाठः। १ क. नास्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ः।

भ्यश्चेदमुच्चरेत् ॥
क्षुत्तृष्णोपहतात्मनाम् ।
मिदमस्तु यथासुखम् ॥ इति ।
याज्ञवल्क्यः—
नेनोपरिष्टादधस्तादश्नता तथा ।
अनग्नममृतं चैव कार्यमन्नं द्विजातिना[1] ॥ इति ।

कौर्मे— अमृतोपस्तरणमसीत्यपोशानक्रियां चरेत् ॥ इति ।

शौनकः—स्वाहान्ताः प्रणवाद्याश्च नाम्ना मन्त्राश्च वायवः ।
तर्जनीमध्यमाङ्गुष्ठलग्ना प्राणाहुतिर्भवेत् ॥
मध्यमानामिकाङ्गुष्ठैरपाने जुहुयात्ततः ।
कनिष्ठानामिकाङ्गुष्ठैर्व्याने च जुहुयात्ततः ॥
तर्जनीं तु वहिः कृत्वा उदाने जुहुयाद्धविः ।
समाने सर्वहस्तेन स(मु?मा)दायाहुतिर्भवेत् ॥
जिह्वयैव ग्रसेदन्नं दशनेन न संस्पृशेत् ॥ इति ।

जिह्वाग्रसने च विशेष उक्त आश्वमेधिके—
यथा रसं न जानाति जिह्वा प्राणाहुतौ नृप ।
तथा समाहितः कुर्यात्प्राणाहुतिमतन्द्रितः ॥ इति ।

विष्णुपुराणे—
अश्नीयात्तन्मना भूत्वा भुञ्जीतमधुरं रसम् ।
लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्ततः ॥
प्राग्द्रवं पुरुषोऽश्नीयान्मध्ये च कठिनाशनः ।
अन्ते पुनर्द्रवाशी तु वलारोग्यैर्न मुञ्चति ॥

[[2]आपस्तम्बः]—
अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः ।
द्वात्रिंशत्तु गृहस्थस्य ह्यमितं ब्रह्मचारिणः ॥ इति ।

वृद्धमनुः—[[3]पीत्वापोशानमश्नीयात्पात्रदत्तमगर्हितम् ।
भार्याभृतकदासेभ्य उच्छिष्टं शेषयेत्ततः ॥ इति ।

पुलस्त्यः—]भोजनं तु न निःशेषं कुर्यात्प्राज्ञः कथंचन ।
अन्यत्र दधिसक्त्वाज्यपललक्षीरमध्वपः ॥ इति ।

---

१ द्विजातये क. पाठः । २ क. नास्ति । ३ क. नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पललं तिलमिश्र ओदनः ।

मनुः—सायंप्रातर्द्विजातीनामशनं श्रोतिचो...

नान्तरा भोजनं कुर्यादग्निहोत्रसमो विधिः...

अत्र पूर्वार्धे कालद्वयविशिष्टभोजनक्रियाया एव...

तुर्निशाः स्त्रीणां तस्मिन्युग्मासु संविशेत् ॥ इतिवत्...

अतः सत्यां बुभुक्षायां सति चान्ने भोजनमकुर्व...

विज्ञानेश्वरः । सायंप्रातरेवेति कालान्तरपरिसंख्येति हरदत्तः । इयं च तदुपपत्तिः । नेयं त्रिदोषा कालान्तरस्य विध्यप्राप्तत्वेन शास्त्रप्राप्तबाधरूपदोषाभावात् । पञ्च पञ्चनखा भक्ष्या इत्यत्रेव शशादिभिन्नश्वादिपञ्चनखभक्षणस्य रागप्राप्तत्वेन तद्बाधेऽपि दोषाभावः । स्वार्थहानिपरार्थकल्पनादोषद्वयवती लक्षणा तु नान्तरेत्याद्येकवाक्यतानुरोधेनाङ्गीकार्या । सोढा च 'जातपुत्रः कृष्णकेशोऽग्निमादधीत' इत्यत्र वयोविशेषस्य 'अर्धमन्तर्वेदि मिनोत्यर्धं वहिर्वेदि' इत्यत्र च संधिदेशस्य लक्षणा वाक्यभेदभिया तत्र तत्र तन्त्रे । सायंप्रातर्भुञ्जीतैवेति नियमविधौ हि मध्येऽपि भोजनस्य प्राप्तत्वेन तन्निषेधार्थं नान्तरेत्यादि पृथग्वाक्यं स्यादिति । अहं तु ब्रुवे—नान्तरेत्यादिकमेव विधिप्रत्यययुक्तत्वादन्तरालकालनिषेधकम् । पूर्वार्धे त्वर्थवादोऽन्त्यपादश्च । तद्गतावेव सायंप्रातःशब्दावन्तराशब्दार्थनिरूपकौ 'संदिग्धेषु वाक्यशेषात्' इतिन्यायात् 'जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजति' इत्यत्रेवान्तराशब्दार्थस्य पुरोडाशाविति । एवं च सायंप्रातःपदयो रात्रिमध्याह्नलक्षणाऽपि युक्ता ।

उपास्य पश्चिमां संध्यां हुत्वाग्निं समुपास्य च ।
भृत्यैः परिवृतो भुक्त्वा नातितृप्तोऽथ संविशेत् ॥

'मध्यंदिनो मनुष्याणां,' 'मध्यंदिने मनुष्या अशनमभ्यवहरन्ति' इत्यादिवाक्यप्राप्तानुवादत्वात् । पूर्वमतद्वये तु विधौ लक्षणातिक्लिष्टेति दिक् ।

भोजने च पञ्चग्रासभक्षणान्तं मौननियमः ततस्त्वनियमः ।

पञ्चग्रासान्महामौनं प्राणाद्याप्यायनं महत् ॥

इति वृद्धमनूक्तेः । पुराणे—

स्नास्यतो वरुणः शक्तिं जुह्वतोऽग्निः श्रियं हरेत् ।
भुञ्जतो मृत्युरायुष्यं तस्मान्मौनं त्रिषु स्मृतम् ॥ इति ।

---

१ ग्नींस्तानु° क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

:।

...रत्नावल्याम्—
...भुक्त्वा श्राद्धिकभोजनम्।
...नासौ मौनं समाचरेत्॥ इति।
...याप्यथवाऽमानी प्रहृष्टः संयतेन्द्रियः।
...त विधिवद्विप्रो न चोच्छिष्टानि वापयेत्॥ इति।
...रादित्यर्थः।

पैठीनसिः—लवणं व्यञ्जनं चैव घृतं तैलं तथैव च।
लेह्यं पेयं च विविधं हस्तदत्तं न भक्षयेत्॥ इति।

स एव—दर्व्या देयं घृतान्नं तु समस्तव्यञ्जनानि तु।

तथा—उदकं यच्च पक्वान्नं यो दर्व्या दातुमिच्छति।
स भ्रूणहा सुरापश्च स स्तेनो गुरुतल्पगः॥ इति।

शातातपः—हस्तदत्तानि चान्नानि प्रत्यक्षलवणं तथा।
मृत्तिकाभक्षणं चैव गोमांसाशनवत्स्मृतम्॥ इति।

आश्वमेधिके—उदक्यामपि चण्डालं श्वानं कुक्कुटमेव च।
भुञ्जानो नैव पश्येत्तु तदन्नं तु परित्यजेत्॥
केशकीटावपन्नं च मुखमारुतवीजितम्।
अन्नं तद्राक्षसं विद्यात्तस्मात्तत्परिवर्जयेत्॥

शातातपः—अग्र्यासनोपविष्टश्च यो भुङ्क्ते प्रथमं द्विजः।
बहूनां पश्यतां सोऽज्ञः पङ्क्त्या हरति किल्बिषम्॥

गोभिलः—एकपङ्क्त्युपविष्टानां विप्राणां सहभोजने।
यद्येकोऽपि त्यजेत्पात्रं नाश्नीयुरितरेऽप्यनु॥
मोहात्तु भुङ्क्ते यस्तत्र तप्तसांतपनं चरेत्।
भुञ्जानेषु तु विप्रेषु यस्तु पात्रं परित्यजेत्।
भोजने विघ्नकर्ताऽसौ ब्रह्महाऽपि तथोच्यते॥ इति।

इदं च गुरुभिन्ने आचान्ते उत्थिते वा बोध्यम्। तदाहोशनाः—अगुरुभिराचमनोत्थानं चेति पङ्क्तिस्थानां भोजननिषेधकप्रयोजकमिति शेषः। अयं च निषेधो युगान्तरपरः। 'उच्छिष्टस्याऽपि वर्जनम्' इति कलिनिषिद्धेषु पाठादिति केचित्। तन्न, एकस्मिन्नुत्थितेऽपीतरपात्रस्थान्नस्योच्छिष्टत्वाभावेन तद्वर्जनाप्रसक्तेः। वस्तुतस्तु उच्छिष्टस्यापवर्जनमिति पाठः। तदर्थस्तु अपवर्जनं दानम्। तत्तु "ब्राह्मणायोदङ्ङुच्छिष्टं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रयच्छेत्" इति मधुपर्के प्रसक्तं

भ्रातृचरणैः कलिवर्ज्यविवेके ।

वृहस्पतिः—न स्पृशेद्वामहस्तेन

न पादौ न शिरो बस्तिं न पदा

आदित्यपुराणे—

नोच्छिष्टो ग्राहयेदाज्यं जग्ध्वा शिष्टं न स

शूद्रभुक्तावशिष्टं तु नाद्याद्भाण्डस्थितं त्वपि ॥

ब्रह्मपुराणे—

यस्तु पाँणितले भुङ्क्ते यच्च फूत्कारसंयुतम् ।

प्रसृताङ्गुलिभिर्यश्च तस्य गोमांसवच्च तत् ॥

नाजीर्णे भोजनं कुर्यात्कुर्यान्नातिबुभुक्षितः ।

नार्द्रवासा नार्द्रशिरा देवालयगतोऽथवा ॥

न प्रसारितपादस्तु पादरोपितपाणिमान् ।

न वेष्टितशिराश्चापि नोत्सङ्गकृतभाजनः ॥

ग्रासशेषं न चाश्नीयात्पीतशेषं पिवेन्न च ।

शाकमूलफलेक्षूणां दन्तच्छेदैर्न भक्षयेत् ॥

वहूनां भुञ्जतां मध्ये नाश्नीयाच्च त्वरान्वितः ।

वृथा न विकिरेदन्नं नोच्छिष्टश्च कचिद्व्रजेत् ॥

वृद्धमनुः—न पिवेन्न च भुञ्जीत द्विजः सव्येन पाणिना ।

नैकहस्तेन च जलं शूद्रेणावर्जितं पिबेत् ॥

पिवतो यत्पतेत्तोयं भाजने मुखनिःसृतम् ।

अभोज्यं तद्भवेदन्नं भोक्तां भुञ्जीत किल्बिषम् ॥

पीतावशेषितं तोयं ब्राह्मणो न पुनः पिवेत् ।

पिवेद्यदि हि तत्तोयं द्विजश्चान्द्रायणं चरेत् ॥ इति ।

कौर्मे— नार्धरात्रे न मध्याह्ने नाजीर्णे नार्द्रवस्त्रधृक् ।

न भिन्नभाजने चैव न भूम्यां न च पाणिषु ॥

नोच्छिष्टो घृतमादद्यान्न मूर्धानं स्पृशन्नपि ।

न ब्रह्म कीर्तयन्वापि न निःशेषं न भार्यया ।

नाङ्गारे न च नाकाशे न च देवालयादिषु ॥ इति ।

भार्ययेति सहयोगे तृतीया ।

शातातपः—उद्धृत्य वामहस्तेन यत्तोयं पिवति द्विजः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राह प्रजापतिः ॥
ह्मणो न पिबेत्कचित् ।
वं मनुरब्रवीत् ॥

निर्दशावत्सागोपयः परिवर्जयेत् ।
औष्ट्रमेकशफं स्त्रैणमारण्यकमथाविकम् ॥ इति ।

औष्ट्रमिति विकारमात्रे तद्धितः तेनोष्ट्रसंबन्धि मांसाद्यपि [1]निषिद्धम् ।

गौतमः—'गोश्च क्षीरमनिर्दशायाः सूतकेऽजामहिष्योश्च नित्यमाविकमपेयमौष्ट्रमैकशफं च स्यन्दिनीयमसूसंधिनीनां विवत्सायाश्च' इति । अत्र विवत्साया गोरेव वर्ज्यं न महिष्यादेरपि गोत्वसमवायिवयोविशेषस्यैव वत्सपदशक्यत्वेन महिष्यादेरपत्ये तदप्रसक्तेः । एतेन 'विवत्सागवादिः' इति हरदत्तीयमादिपरं परास्तम् । स्यन्दिनी प्रस्रवत्स्तनी । यमसूर्यमलजननी । संधिनी सगर्भा, सायं प्रातर्वातिक्रम्य या दुग्धे सा वा योजितान्यवत्सा वा । अन्त्यव्याख्याने विवत्सापदं पुनरुक्तमिति केचित् तन्न, तदर्थयोः परस्परव्यभिचारात् । विज्ञानेश्वरोऽप्येवमेवाभिप्रैति ।

श्लोकगौतमः—

कलहभ्रमणग्रावचक्रस्योलूखलस्य च ।
एतेषां निनदो यावत्तावत्कालमभोजनम् ॥

कात्यायनः—

चण्डालपतितोदक्यावाक्यं श्रुत्वा द्विजोत्तमः ।
भुञ्जीत ग्रासमात्रं तु दिनमेकमभोजनम् ॥

[बृहस्पतिः][2]—

अप्येकपङ्क्त्यां नाश्नीयाद्ब्राह्मणैः स्वजनैरपि ।
को हि जानाति किं कस्य प्रच्छन्नं पातकं भवेत् ॥
एकपङ्क्त्युपविष्टानां दुष्कृतं यद्दुरात्मनाम् ।
सर्वेषां तत्समं तावद्यावत्पङ्क्तिर्न भिद्यते ॥
अग्निना भस्मना चैव स्तम्भेन सलिलेन च ।
द्वारेणैव च मार्गेण पङ्क्तिभेदो बुधैः स्मृतः ॥ इति ।

पराशरः—यो वेष्टितशिरा भुङ्क्ते यो भुङ्क्ते दक्षिणामुखः ।
वामपादकरः स्थित्वा तद्वै रक्षांसि भुञ्जते ॥ इति ।

---

१ वर्ज्यम् क. पाठः । २ क. नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वामपादे करो यस्येत्यर्थः । स्थि[illegible]
मनुः—आयुष्यं प्राङ्मुखो भुङ्क्ते [illegible]
श्रियं प्रत्यङ्मुखो भुङ्क्ते [illegible]
दक्षिणामुखभोजननिषेधस्तु नित्यभोजनपरः । [illegible]

अथ भोजनोत्तराङ्गानि ।

देवलः—भुक्तोच्छिष्टं समादाय सर्वस्मात्किंचिदाचमन् ।
उच्छिष्टभागधेयेभ्यः सोदकं निर्वपेद्भुवि ॥ इति ।

तत्र मन्त्रः—

रौरवेऽपुण्यनिलये पद्मार्बुदनिवासिनाम् ।
उच्छिष्टोदकमिच्छूनामक्षय्यमुपतिष्ठताम् ॥ इति ।

व्यासः—'ततस्तृप्तः सन्नमृतापिधानमसीत्यपः प्राश्य तस्माद्देशान्मनागपसृत्य विधिवदाचामेत्' इति ।

श्लोकगौतमः—

गण्डूषस्याथ समये तर्जन्या वक्त्रचालनम् ।
कुर्वीत यदि मूढात्मा रौरवे नरके पतेत् ॥ इति ।

तथा— तस्मिन्नाचमनं कुर्याद्यत्र भाण्डेऽथ भुक्तवान् ।
यद्युत्तिष्ठति नाचान्तो भुक्तवानासनात्ततः ।
स्नानं सद्यः प्रकुर्वीत सोऽन्यथाऽप्रयतो भवेत् ॥ इति ।

व्यासः—हस्तं प्रक्षाल्य गण्डूषं यः पिबेदविचक्षणः ।
स देवांश्च पितृंश्चैव ह्यात्मानं चैव घातयेत् ॥ इति ।

कौर्मे— आचान्तः पुनराचामेदायंगौरितिमन्त्रतः ।
द्रुपदां वा त्रिरावृत्य सर्वपापप्रणाशिनीम् ॥
प्राणानां ग्रन्थिरसीत्यालभेद्धृदयं ततः ।
आचम्याङ्गुष्ठमानीय पादाङ्गुष्ठे तु दक्षिणे ॥
निःस्रावयेद्धस्तजलमूर्ध्वहस्तः समाहितः ।
हुतानुमन्त्रणं कुर्यात्श्रद्धायामितिमन्त्रतः ॥
अष्टाक्षरेण स्वात्मानं योजयेत् ब्रह्मणेति हि ।
सर्वेषामेव यागानामात्मयागः परः स्मृतः ।
योऽनेन विधिना कुर्यात्स याति ब्रह्मणः पदम् ॥ इति ।

विष्णुपुराणे—विष्णुरत्ता तथैवान्नं परिणामश्च वै तथा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ः।

... जीर्यत्वन्नमिदं तथा ॥
...न परिमृज्यात्तथोदरम् ।
...नि कुर्यात्कर्माण्यतन्द्रितः ॥ इति ।
...तोऽप्यशुचिस्तावद्यावत्पात्रमनुद्धृतम् ।
...ऽप्यशुचिस्तावद्यावन्नोन्मृज्यते मही ॥
भूमावपि हि लिप्तायां तावत्स्यादशुचिः पुमान् ।
आसनादुत्थितस्तस्माद्यावन्न स्पृशते महीम् ॥ इति ।

मार्कण्डेयः—

भूयोऽप्याचम्य कर्तव्यं ततस्ताम्बूलभक्षणम् । इति ।

वसिष्ठः—सुपूगं च सुपत्रं च चूर्णेन च समन्वितम् ।
अदत्त्वा द्विजदेवेभ्यस्ताम्बूलं वर्जयेद्‌बुधः ॥
एकपूगं सुखारोग्यं द्विपूगं निष्फलं भवेत् ।
अतिश्रेष्ठं त्रिपूगं च ह्यधिकं नैव दुष्यति ॥
पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः ।
जीर्णपर्णे क्षिपेदायुः शिरा बुद्धिविनाशिनी ॥
तस्मादग्रं च मूलं च शिरां चैव विशेषतः ।
जीर्णपर्णं वर्जयित्वा ताम्बूलं खादयेद्बुधः ॥ इति रविः ।

अथ भोजनोत्तरं कृत्यम् ।

दक्षः— इतिहासपुराणाद्यैः षष्ठसप्तमकौ नयेत् ।
अष्टमे लोकयात्रा तु बहिःसंध्या ततः पुनः ॥

यमः— रवेरस्तमयात्पूर्वं घटिकैका यदा भवेत् ।
सायंसंध्यामुपास्याथ कुर्याद्धोमं च पूर्ववत् ॥

दीपकालः संग्रहे—

रवेरस्तं समारभ्य यावत्सूर्योदयो भवेत् ।
यस्य तिष्ठेद्गृहे दीपस्तस्य नास्ति दरिद्रता ॥
आयुर्दः प्राङ्मुखो दीपो धनदः स्यादुदङ्मुखः ।
प्रत्यङ्मुखो दुःखदोऽसौ हानिदो दक्षिणामुखः ॥

संध्यावन्दनं पूर्वमुक्तं तत्र विशेषमाह ।

व्यासः— जपेद्वारुणमन्त्रांस्तु इमंमेवरुणादिकान् ।

१ चूर्णपर्णं क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्मन्त्रान्विशेषज्ञ...

संध्यावन्दनाकरणे जमदग्निः— प्रोक्तं...

एकाहं चाप्यतिक्रम्य भोके...
अहोरात्रोषितो भूत्वा गायत्र्याश्चा...
द्विरात्रे द्विगुणं प्रोक्तं त्रिरात्रे त्रिगुणं...
त्रिरात्रात्परतश्चेत्स्याच्छूद्र एव न संशयः ॥

कालातिक्रमे पारिजाते गौतमः—

संध्याकाले त्वतिक्रान्ते स्नात्वाऽऽचम्य यथाविधि ।
जपेदष्टशतं देवीं ततः संध्यां समाचरेत् ॥ इति ।

वसिष्ठस्तु—

कालातिक्रमणे चैव त्रिसंध्यमपि सर्वदा ।
चतुर्थार्घ्यं प्रकुर्वीत भानोर्व्याहृतिसंपुटम् ॥

यमस्तु— प्राणायामत्रयं प्रातः संगवे त्रिगुणं चरेत् ।
मध्याह्ने त्रिगुणं प्रोक्तमपराह्णे चतुर्गुणम् ।
सायाह्ने पञ्चगुणकं संध्यातिक्रमणे भवेत् ॥
यदा "दीध्येति" मन्त्रं वै सप्तवारं जपेद्यदि ।
अकाले कुर्वतः कर्म काले काले कृतानि तु ॥

भवन्तीति शेषः । श्राद्धभोजने तु गर्गः—

दशकृत्वः पिवेदापो गायत्र्या श्राद्धभुक् द्विजः ।
ततः संध्यामुपासीत शुद्धयेत्तु तदनन्तरम् ॥

इदं तु संध्याधिकारार्थं न तु श्राद्धभोजनप्रायश्चित्तमिति नृसिंहः । प्रायश्चित्तमेवेत्यन्ये, तत्तु गुरुप्रायश्चित्तान्तराशक्ताविति ।

अथ सायंहोमकालः ।

कात्यायनः—

सूर्येऽस्तशैलं संप्राप्ते षड्भिः षड्भिरिहाङ्गुलैः ।
प्रादुष्करणमग्नीनां प्रातर्भासां च दर्शनात् ॥

तथा— यावत्सम्यङ् न भाव्यन्ते नभस्युक्षाणि सर्वतः ।
न च लोहितमायाति तावत्सायं च हूयते ॥ इति ।

---

१ °श्या वाऽयु° क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

:।

पः ।

गोमयेनोपलेपयेत् ।

मन्त्र्य स्वपेत्ततः ॥

पूर्णकुम्भं च शिरःस्थाने निधापयेत् ।

तशुष्कपादस्तु स्वाचान्तः शयने शुचौ ॥

अभीष्टदेवतां स्मृत्वा संविशेन्मङ्गलध्वनौ ।

रात्रिसूक्तं जपेद्रात्रौ रात्रिक्षामो भवेन्नरः ॥

[क्षामः शान्तः ।]

तथा— पूर्वरात्रे व्यतीते तु स गच्छेद्रतिमन्दिरम् ।
पादौ प्रक्षालयेत्पूर्वं पश्चाच्छय्यां समाविशेत् ॥
धौतवस्त्रं च ताम्बूलं संयोगे च शुभावहम् ॥

अथ स्त्रीकृत्यम् ।

भर्तुः पादौ नमस्कृत्य पश्चाच्छय्यां समाविशेत् ।

अथ रतिः ।

संस्मृत्य परमात्मानं पत्नीजङ्घे प्रसारयेत् ।
योनिं स्पृष्ट्वा जपेत्सूक्तं "विष्णुर्योनिं" प्रजापतेः ।
रेतः सिञ्चेत्ततो योन्यां तस्माद्गर्भं बिभर्ति सा ॥ इति ।

याज्ञवल्क्यः—षोडशर्तुर्निशाः स्त्रीणां तस्मिन्युग्मासु संविशेत् ।
ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रस्तु वर्जयेत् ।
यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन् ॥ इति ।

कामे— ऋतुकालाभिगामित्वं स्वदारेषु रतात्मनः ।
पर्ववर्ज्यं गृहस्थस्य ब्रह्मचर्यमुदाहृतम् ॥ इति ।

एवंप्रकारेण गच्छतः श्राद्धादौ न ब्रह्मचर्यक्षतिदोष इति मिताक्षरायाम् । पञ्चदशदिनपर्यन्तं गमनाभावेऽन्त्यदिने च श्राद्धप्रसक्तौ तद्दिने गच्छतो दोषाभावपरमिति हेमाद्रिः । प्रमाणं त्वत्र चिन्त्यम् ।

मनुः— तासामाद्याश्चतस्रस्तु निन्दितैकादशी तथा ।
त्रयोदशी च शेषास्तु प्रशस्ता दश रात्रयः ॥ इति ।

तथा— अष्टम्यां च चतुर्दश्यां दिवा पर्वणि मैथुनम् ।

---

१ क. नास्ति । २ च रमानाथं क. पाठः । ३ च क. पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृत्वा सचैलं स्नात्वा

मनुः— अमावास्याष्टमी चैव ...

ब्रह्मचारी भवेन्नित्यम ...

तथा— स्त्रीणां तु प्रेक्षणात्स्पर्शाद्धास्यशृङ्गार ...

स्पन्दते ब्रह्मचर्यं च न दारेष्वृतुसंगमा ...

तथा— ऋतौ तु गर्भं शङ्कित्वा स्नानं मैथुनिनः स्मृतम्

अनृतौ तु यदा गच्छेच्छौचं मूत्रपुरीषवत् ॥ इति ।

विष्णुः— कृतपादादिशौचस्तु भुक्त्वा सायं ततो गृही ।

गच्छेच्छय्यामस्फुटितामपि दारुमयीं नृप ॥ इति ।

गच्छेच्छय्यां शयनार्थमित्यर्थः । शयने विधिमाह हारीतः—'सुप्रक्षालितचरणः सर्वतो रक्षां कृत्वोदकपूर्णघटादिमङ्गलोपेत आत्माभिरुचितामनुपहताम् "सूत्रामाण"मिति पठन् शय्यामधिष्ठाय रात्रिसूक्तं जप्त्वा विष्णुं नमस्कृत्य 'सर्पापसर्प भद्रं ते' इत्येतत् श्लोकद्वयं जप्त्वेष्टदेवतास्मरणं कृत्वा समाधिमास्थायान्यांश्च वैदिकान्मन्त्रान्सावित्रीं जप्त्वा मङ्गलं शुचिं शङ्खं च शृण्वन् दक्षिणाशिराः स्वपेत्' इति ।

विष्णुपुराणे—

रात्रिसूक्तं जपेत्स्मृत्वा देवांश्च सुखशायिनः ।

नमस्कृत्वाऽव्ययं विष्णुं समाधिस्थः स्वपेन्निशि ॥ इति ।

सुखशायिनो देवा गोभिलेन प्रदर्शिताः—

अगस्तिर्माधवश्चैव मुचुकुन्दो महामुनिः ।

कपिलो मुनिरास्तीकः पञ्चैते सुखशायिनः ॥ इति ।

दक्षिणशिरा इति प्रदर्शनार्थम् । तथा विष्णुपुराणे—

प्राच्यां दिशि शिरः शस्तं याम्यायामथवा नृप ।

सदैव स्वपतः पुंसो विपरीतं तु रोगदम् ॥ इति ।

हारीतोऽपि—'न तिर्यगुदक्प्रत्यक्शिराः कोणशिराः पश्चिमशिरा उत्तरशिराश्च' इति । दिग्विशेषेण फलविशेष उक्तो मार्कण्डेये—

प्राक्शिरःशयने विद्याद्धनमायुश्च दक्षिणे ।

पश्चिमे प्रबला चिन्ता हानिमृत्युरथोत्तरे ॥

स्थलविशेषे दिग्विशेषमाह गार्ग्यः—

स्वगृहे प्राक्शिराः शेते श्वाशुर्ये दक्षिणाशिराः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...त कदाचिदुदक्शिराः ॥ इति ।
...ग यत्किंचिदनुलेपनम् ।
...नित्यं कुरु युधिष्ठिर ॥
...ह मार्कण्डयः—
...लये स्मशाने च एकवृक्षे चतुष्पथे ।
महादेवालये वापि मातृवेश्मनि न स्वपेत् ॥
न यक्षनागायतने स्कन्दस्यायतने तथा ।
कुलच्छायासु च तथा शर्करालोष्टपांसुषु ॥
न स्वपेच्च तथा दर्भे विना दीक्षां कथंचन ।
धान्यगोधनविप्राणां गुरूणां च तथोपरि ॥
नाकाशे सर्वतः शून्ये न च चैत्यद्रुमे तथा ॥ इति ।

निषिद्धशय्योक्ता विष्णुपुराणे—

न विशालां न वा भग्नां नासमां मलिनां तथा ।
न च दन्तमयीं शय्यामधितिष्ठेदनास्तृताम् ॥

न तु जन्तुमयीमित्यपि क्वचित्पाठः । दन्तमयीं मृतहस्तीदन्तमयीमित्यर्थः ।

तथाच तत्रैव—

मृतदन्तमये विद्युद्दग्धे दर्भे पलाशजे ।
न शयीत नरो धान्ये शयने पञ्चदारुजे ॥
पञ्चदारूणि चोक्तानि चूतजम्बूद्रुमास्तथा ।
अश्मपीठोत्थिताश्चैव घटसिक्ततरूंस्तथा ॥
करिभग्नकृते चैव न शयीत क्वचिन्नरः ॥ इति ।

स्वापकालमाह दक्षः—

प्रदोषपश्चिमौ यामौ वेदाभ्यासे न योजयेत् ।
यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते ॥ इति ।

तथा— निद्रासमयमासाद्य ताम्बूलं वदनात्त्यजेत् ।
पर्यङ्कात्प्रमदां भालात्पुण्ड्रं पुष्पाणि मस्तकात् ॥

॥ इति शयनविधिः ॥

यदेतदुक्तमाह्निकमेतदकरणे प्रत्यवाय उक्तः कौर्मे—

इत्येतदखिलं प्रोक्तमहन्यहनि वै द्विजाः ।

१ वगृहे ख॰ पाठः । १ च क॰ पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्रै

ब्राह्मणानां कृत्यजात...
नास्तिक्यादथवाऽऽलस्यात्...
स याति नरकान्घोरान्...
नान्यो विमुक्तये पन्था मुक्त्वाऽऽश्र...
तस्मात्कर्माणि कुर्वीत तुष्टये परमेष्ठिनः ॥ २...

स्वप्नफलानि ।

अथ रात्रौ स्वप्नफलनिर्णयः । तत्रादौ स्वप्नदर्शनावस्थामाह वैद्यः—

सर्वेन्द्रियव्युपरतौ मनोऽनुपरतं यदा ।
विषयेभ्यस्तदा स्वप्नं नानारूपं प्रपश्यति ॥

स च स्वप्नो द्विविधः, इष्टफलोऽनिष्टफलश्चेति । तत्र सामान्यत इष्टफलो यथा—

नदीसमुद्रतरणमाकाशगमनं तथा ।
भास्करोदयनं चैव प्रज्वलन्तं हुताशनम् ॥
ग्रहनक्षत्रताराणां चन्द्रमण्डलदर्शनम् ।
हर्म्यस्यारोहणं चैव प्रासादशिरसोऽपि वा ।
एवमादीनि संदृश्य नरः सिद्धिमवाप्नुयात् ॥
स्वप्ने तु मदिरापानं वसामांसस्य भक्षणम् ।
क्रिमिविष्टानुलेपं च रुधिरेणाभिषेचनम् ॥
भोजनं दधिभक्तस्य श्वेतवस्त्रानुलेपनम् ।
रत्नान्याभरणादीनि स्वप्ने दृष्ट्वा प्रसिध्यति ॥
देवविप्रध्वजच्छत्रतुषपङ्कजपार्थिवान् ।
शुक्लपुष्पाम्बरधरान्प्रशस्ताभरणाङ्गनाः ॥
वृषेभपर्वतक्षीरिफलिवृक्षाधिरोहणम् ।
दर्पणामिषमाल्याप्तिस्तरणं च महाम्भसाम् ॥
दृष्ट्वा स्वप्नेऽर्थलाभः स्याद्व्याधिमुक्तश्च जायते ॥ इति ।

सामान्यतोऽनिष्टफलो यथा—

यूपकिंशुकवल्मीकपारिभद्राधिरोहणम् ।
तैलकार्पासपिण्याकलोहावाप्तिर्विपत्तये ॥
विवाहकरणं स्वप्ने रक्तस्रग्वस्त्रधारणम् ।
स्रोतसाहरणं नेष्टं पक्वमांसस्य भोजनम् ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...वः।

...कालभेदेन फलभेदः स्वप्नाध्याये—

...संवत्सरविपाकिनः।
...सैस्त्रिभिर्मासैस्त्रियामके॥
...मे यः स्वप्नो मासेन फलदः स्मृतः।
अरुणोदयवेलायां दशाहेन फलं भवेत्।
गोविसर्जनवेलायां सद्य एव फलं भवेत्॥ इति।

अथ विशेषत इष्टफलाः स्वप्नाः—

यस्तु पश्यति वै स्वप्ने राजानं कुञ्जरं हयम्।
सुवर्णं वृषभं गां वा कुटुम्बं तस्य वर्धते॥
आरोहणं गोवृषकुञ्जराणां प्रासादशैलाग्रवनस्पतीनाम्।
विष्ठानुलेपो रुदितं मृतं वा स्वप्नेष्वगम्यागमनं च धन्यम्।
क्षीरिणं फलिनं वृक्षमेकाकी योऽधिरोहति।
तत्रस्थः स विबुध्येत धनं शीघ्रमवाप्नुयात्॥
यस्य श्वेतेन सर्पेण ग्रस्यते दक्षिणः करः।
सहस्रलाभस्तस्य स्यादपूर्णे दशमे दिने॥
उरगो वृश्चिको वाऽपि जले ग्रसति यं नरम्।
विजयं चार्थसिद्धिं च पुत्रं तस्य विनिर्दिशेत्॥
प्रासादं शैलमारुह्य समुद्रं तरते नरः।
अपि दासकुले जातो राजा भवति वै ध्रुवम्॥
यस्तु मध्ये तडागस्य भुङ्क्ते च घृतपायसम्।
अखण्डपुष्करे पत्रे तं विद्यात्पृथिवीपतिम्॥
वलाकां कुक्कुटीं क्रौञ्चीं दृष्ट्वा यः प्रतिबुध्यति।
कुलजां लभते कन्यां भार्यां स प्रियवादिनीम्॥
निगडैर्बध्यते यस्तु वाहुपाशेन वा पुनः।
पुत्रो वा जायते तस्य धनं शीघ्रमवाप्नुयात्॥
आसने शयने याने शरीरे वाहने गृहे।
ज्वलमाने विबुध्येत तस्य श्रीः सर्वतोमुखी॥
आदित्यमण्डलं स्वप्ने चन्द्रं वा यदि पश्यति।
व्याधितो मुच्यते रोगादरोगी श्रियमाप्नुयात्॥
रुधिरं पिबति स्वप्ने सुरां वापि तथा नरः।
ब्राह्मणो लभते विद्यामितरो लभते धनम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

ये—

शुक्लाम्बरधरा नारी ...
अवगूहति यं स्वप्ने श्रि..., ...
पादुकोपानहौ छत्रं ल...
असिं वा निर्मलं तीक्ष्णं सांध्वन्नं त...
रथाङ्गं वृषसंयुक्तमेकाकी यः प्ररोहति ।
तत्रस्थः स विबुध्येत धनं शीघ्रमवाप्नुयात् ॥
दधिलाभे भवेदर्थो घृतलाभे ध्रुवं यशः ।
घृताशने ध्रुवः क्लेशो यशस्तु दधिभक्षणे ॥
आन्त्रैस्तु वेष्टितो यो वै नगरेऽपि गृहेऽपि वा ।
गृहे माण्डलिको राजा नगरे पार्थिवो भवेत् ॥
मानुषाणि च मांसानि स्वप्नान्ते यस्तु पश्यति ।
हरितानि तु पक्वानि शृणु तस्य च यत्फलम् ॥
पद्भक्षणे शतं लाभः सहस्रं बाहुभक्षणे ।
राज्यं शतसहस्रं वा भवेद्वै शीर्षभक्षणे ॥

सर्वाणि शुक्लान्यपि शोभनानि कार्पासतक्रोदनभस्मवर्ज्यम् ।
सर्वाणि कृष्णान्यतिनिन्दितानि गोहस्तिदेवद्विजवाजिवर्ज्यम् ॥

क्षीरं पिबति यः स्वप्ने सफेनं दोहने कृते ।
सोमपानं भवेत्तस्य भुक्त्वा भोगानशेषतः ॥
दधि दृष्ट्वा भवेत्प्रीतिर्गोधूमैश्च धनागमः ।
यवाद्यज्ञागमं विन्द्याल्लाभं सिद्धार्थकादपि ॥
नागपत्रं लभेत् स्वप्ने कर्पूरमगरुं तथा ।
चन्दनं पाण्डुरं पुष्पं तस्य श्रीः सर्वतोमुखी ॥ इति ।

॥ इति विशेषत इष्टफलाः स्वप्नाः ॥

अथ विशेषतोऽनिष्टफलाः स्वप्नाः । तत्र शौनकः—

अथ स्वप्नानि वक्ष्यन्ते दुर्निमित्ताद्भुतानि तु ।
आदित्यं वाथ चन्द्रं वा विगतच्छविकं तथा ॥
पतन्तं वाथ नक्षत्रं तारकादींश्च वा यदि ।
वीक्षेत मानवः स्वप्ने मरणं शोकमाप्नुयात् ॥

स्वप्नाध्याये—

अशोकं करवीरं वा पलाशं वाथ पुष्पितम् ।
स्वप्नान्ते यस्तु पश्येत नरः शोकमवाप्नुयात् ॥

म् ।
न्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...ः।

...नां च समुत्तरे।
... शीघ्रं च पुनरागमम्॥
... रक्तगन्धानुलेपना।
...ते यं स्वप्ने मृत्युं तस्य विनिर्दिशेत्॥
...लेनाभ्यक्तकायस्तु पयसा तु घृतेन वा।
स्नेहेन वा तथान्येन व्याधिं तस्य विनिर्दिशेत्॥
केशा यस्य विशीर्यन्ते यदि दन्ताः पतन्ति वा।
अर्थनाशो भवेत्तस्य पुत्रो वा यदि नश्यति॥
खरोष्ट्रमाहिषरथमेकाकी यः प्ररोहति।
तत्रस्थः स तु बुध्येत मृत्युं शीघ्रमवाप्नुयात्॥
कर्णनासाकरादीनां छेदनं पङ्कमज्जनम्।
पतनं दन्तकेशानां पक्वमांसस्य भक्षणम्॥
खरोष्ट्रमाहिषं यानं तैलाभ्यङ्गं च मृत्यवे॥

इति विशेषतोऽनिष्टफलाः स्वप्नाः।

॥ इति स्वप्नफलनिर्णयः॥

स्वस्थारिष्टानि।

अथ स्वस्थारिष्टानि—

अरुन्धतीं ध्रुवं चैव विष्णोस्त्रीणि पदानि च।
आयुर्हीना न पश्यन्ति चतुर्थं मातृमण्डलम्॥
देहेऽप्यरुन्धती जिह्वा ध्रुवो नासाग्रमुच्यते।
भ्रुवोर्मध्यगतं मध्यं तारका मातृमण्डलम्॥
आकीर्णश्रवणे यस्य न घोषं शृणुयात्तथा।
नभोमन्दाकिनीमिन्दोश्छायां नेक्षेद्गतायुषः॥
पांसुपङ्कादिषु न्यस्तं खण्डं यस्य पदं भवेत्।
पुरतः पृष्ठतोऽवापि सोऽष्टौ मासान्न जीवति॥
स्नानाम्बुलिप्तगात्रस्य यस्यास्यं प्राक् प्रशुष्यति।
गात्रेष्वार्द्रेषु सर्वेषु सोऽर्धमासं न जीवति॥

दुःस्वप्नशान्तिः।

अथ दुःस्वप्नशान्तिमाह शौनकः—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवमादीनि चान्यानि
स्वप्नोत्पातानि चैतेषां क
पूजाविधानं पूर्वोक्तं कूर्या

पूर्वोक्तमिति रात्रिसूक्तकल्पवदित्यर्थः। रात्रिसू
स्वभयान्न लिखितः।

होमं कुर्यात्प्रयत्नेन रात्रावेव द्विजोत्तमः।
उक्तेनैव विधानेन सघृतं पायसं हुनेत् ॥

उक्तेन विधानेनेति स्वगृह्योक्तविधानेनेत्यर्थः।

प्रत्यृचं पायसं हुत्वा रात्रिव्यख्यदिति क्रमात्।
अष्टोत्तरशतं हुत्वा सूक्तेनानेन वित्तमः ॥

स्वप्नाधिपतिमन्त्रेण कालरात्रनाममन्त्रेणेत्यर्थः।

ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत्।
पूर्वोक्तमभिषेकं यत्तदत्रापि विधीयते ॥

पूर्वोक्तं ग्रहयज्ञोक्तमित्यर्थः।

गुरवे दक्षिणां दद्याद्वस्त्रहेम पशूनपि ॥
यद्यस्ति दक्षिणाभावोऽप्यशक्तो होमकर्मणि।
हिरण्यं दक्षिणां दद्यात्तदानीमेव वा बुधः ॥
वस्त्रकुम्भादि सकलं तद्धोत्रे प्रतिपादयेत्।
ब्राह्मणान्भोजयेच्छक्त्या सुशीलान्वेदपारगान् ॥
भक्ष्यैश्च पायसाद्यैश्च रत्नानि सुबहूनि च।
अनेन विधिना यस्तु शान्तिं कुर्वीत शक्तितः।
तस्य वर्षशतायुष्यं भवत्येव न संशयः ॥ इति।

चर्मण्वतीतरणिजाशुभसंगमस्य
सान्निध्यभाजि कृतिशालिनि मध्यदेशे।
ख्याता भरेह नगरी भुवि तत्र राजा
राजीवलोचनरतो भगवन्तदेवः ॥

इतिश्रीसेंगरवंशावतंसमहाराजाधिराजश्रीभगवन्तदेवोद्योजितेन मीमांसापारावारपारीणधुरीणभट्टशंकरभट्टात्मजभट्ट-नीलकण्ठकृते भगवन्तभास्करे आचारमयूखो द्वितीयः समाप्तः।

१ °न्यपि क. पाठः। २ इदं पद्यं क. पुस्तके नास्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

...u S...

'गुजराती' मुद्रणालयस्था... त्रोल्लि... ...कैः... ...क्षेकयं।

१ श्रीमद्भगवद्गीता Bhagavat-Geet- with 7 commentaries–प्रथमो गुच्छः आनन्दगिरिकृतटीकासंवलितशांकरभाष्य– जयतीर्थविरचितटीकासंवलितानन्दतीर्थीय (माध्व) भाष्य–रामानुजभाष्य– पुरुषोत्तमजीप्रकाशितामृततरङ्गिणी–नीलकण्ठीसमेता । मञ्जुलैरायसाक्षरैर्मुद्रिता । पृष्ठान्यष्टशतपरिमितानि सुचिक्कणानि । मूल्यम् रू. ६–०–० ०–७–०

२ श्रीमद्भगवद्गीता Bhagavat-Geeta with 8 other commentaries– द्वितीयो गुच्छः । निम्बार्कमतानुयायिश्रीकेशवकाश्मीरिभट्टाचार्यपादप्रणीता–'तत्त्वप्रकाशिका' श्रीमधुसूदनसरस्वतीकृता–'गूढार्थदीपिका' श्रीशङ्करानन्दप्रणीता–'तात्पर्यबोधिनी' श्रीधरस्वामिकृता— 'सुबोधिनी' श्रीसदानन्दविरचितः—'भावप्रकाशः' श्रीधनपतिसूरिविरचिता–'भाष्योत्कर्षदीपिका' दैवज्ञपण्डितश्रीसूर्यविरचिता 'परमार्थप्रपा' पूर्णप्रज्ञमतानुसारिश्रीराघवेन्द्रकृतः–'अर्थसंग्रहः' इत्येताभिर्व्याख्याभिः सहिता अत्र श्लोकाः स्थूलतमाक्षरैष्टीकाश्च स्थूलाक्षरैर्मुद्रिताः, वृद्धा मा क्लेशिषतेति । मू. रू. १०–०–० ०–१५–०

३ उत्तरगीता Uttara-Geeta with a commentary—गौडपादीयदीपिकाख्यव्याख्यायुता । भगवत्पादश्रीशंकराचार्याणां परमगुरुभिः श्रीशुकाचार्याणां च शिष्यैः श्रीगौडपादाचार्यैः प्रणीतेयं व्याख्येत्येतावत्कथनमलमस्या महिमानमवगमयितुम् । मूल्यम् रू. ०–३–० ०–०–६

४ श्रीमद्वाल्मीकिरामायणम् । बालकाण्डम् Valmiki Ramayana with 3 well-known commentaries, Bal Kanda सर्वतन्त्रस्वतन्त्रप्रतिभेन शब्देन्दुशेखरादिनानानिबन्धप्रणेत्रा श्रीमन्नागेशभट्टेन स्वशिष्यस्य सतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...र्गः श्रीरामरा- ...व्यया टीकया, ...गीतया रामायण- ...या, श्रीगोविन्दराजप्रणीतया ...च सह मुद्रयितुमारब्धमस्माभिः ...ल्मीकिरामायणम् । तच्च सप्तभिः खण्डैः समाप- यिष्यामः । तत्रेदं प्रथमं खण्डम् । मूल्यम् रू. ...	मूल्यं ३–०–०	मार्गव्ययः ०–५–०
अयोध्याकाण्डम् । Ayodhya Kanda, **द्वितीयखण्डम्**—उर्ध्वनिर्दिष्टटीकात्रयोपेतम् । मू. रू.	 ५–०–०	 ०–७–०
अरण्यकाण्डम् । Aranya Kanda तृती- **यखण्डम्** । उपरिनिर्दिष्टटीकात्रयोपेतम् । मूल्यम् रू.	 २–१२–०	 ०–६–०
५ **स्तोत्रमुक्ताहारः– Stotra-muktahar containing 256 Stotras** अस्मिन् २५६ स्तोत्राणि संगृहीतानि । यद्यपि सन्ति भूरीणि स्तोत्रपुस्तकानि मुद्रितानि भूरिभिस्तथापि न तेष्वियतां स्तोत्ररत्नानां संग्रहः । अस्माभिः पूर्वममुद्रितानां स्तोत्राणां पुस्तकानि काश्यादिक्षेत्रेभ्यो भूयसा प्रयासेन द्रविणव्ययेन च समासाद्य तेभ्यश्च प्रसादगुणयुक्तानि स्तोत्राणि संकलय्य संशोध्य च तानि भाविकजनानां कृतेऽत्र समावेशितानि तदाशास्महे श्रद्धावन्तो जनाः सफलयिष्यन्ति प्रयत्नमस्माकममुमिति । मूल्यम् रू.	०–८–०	०–२–०
६ **संस्कारमयूखः–Samskar Mayukha** मीमांसकनीलकण्ठभट्टसुतशंकरभट्टकृतः । अत्र संस्काराणां स्वरूपं कालः इतिकर्तव्यता वर्णधर्मा आश्रमधर्माश्च विस्तरतो मूलवचनोपन्यासपुरःसरं निरूपिताः । मूलवचनानि चाप्रतिपत्तिविप्रतिपत्तिसंभावनास्थलेषु क्रमेण पर्यायशब्दप्रदर्शनेन मीमांसकाभिमतन्यायानुसरणेन च व्याख्यातानि । अन्ते कातीयसूत्रानुसारिप्रयोगाश्च दत्ताः । पूर्वं वाराणस्यादिषु मुद्रितोऽप्ययं वर्णपदवाक्यभ्रंशविपर्ययादिदोषप्रचुरतयाऽप्रविभक्तविषयतया च भृशं दुर्बोधो विपरीतबोधकरश्चासीत् । अस्माभिस्तु ग्रन्थकृतैव पुनः शोधितस्य वर्धितस्य चास्य ग्रन्थस्य पुस्तकमासाद्य विषयांश्च प्रविभज्य शोधने च महान्तमायासमास्थाय मुद्रितः । मू. रू.	०–१२–०	०–१–०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७ मनुस्मृतिः—Manu S...
टीकया, ग्रन्थान्तरेषु मनुना ...
तिपुस्तकेष्वनुपलभ्यम. जैः ...
शेन, विषयानुक्रमेण च सहिता । ...
धिता च । मू. रू. ... ...

८ विदुरनीतिः–Vidura-Niti with a commentary संस्कृतटीकोपेता नीतिशास्त्राभ्यासिनां विद्यार्थिनामतीवोपयोगिनी । मू. रू. ... ०–४–० ०–१–०

९ वेदान्तरहस्यम्–Vedanta Rahasya वेदान्तवागीशभट्टाचार्यविरचितम् । अत्राद्वैतमतसिद्धान्तो निरूपितः । उपपत्तिश्च प्रदर्शिता । भाषाऽतिसरला प्रौढा च । मूल्यम् रू. ०–१–० ०–०–६

१० विशिष्टाद्वैतमतविजयवादः–Vishishtadvaita-Mata-Vijaya-Vada नरहरिपण्डितकृतः । अत्र विशिष्टाद्वैतमते परेषामाक्षेपान्निराकृत्य विशिष्टाद्वैत एवोपनिषदां तात्पर्यं व्यवस्थापितम् । मूल्यम् रू. ०–१–० ०–०–६

११ रघुवंशमहाकाव्यम्—Raghuvamsha Mallinatha's commentary श्रीकालिदासकृतम् । मल्लिनाथकृतसंजीविन्याख्यटीकासहितम् । मू. रू. ०–१०–० ०–३–०

१२ रघुवंशमहाकाव्यं–मल्लिनाथकृतटीकोपेतम् । सर्गाः १–५ ... ... ०–४–० ०–१–०

१३ कुमारसंभवं महाकाव्यम्—Kumar-Sambhav with 3 known commentaries कविवरश्रीकालिदासविरचितमिदं सप्तमसर्गपर्यन्तं मल्लिनाथकृतसंजीविन्या चारित्र्यवर्धनकृतशिशुहितैषिण्या च संवलितं तत आसमाप्ति सीतारामकृतसंजीविन्याऽलंकृतं सुललितैरायसाक्षरैर्मुद्रितमतीव दर्शनीयमस्ति । मूल्यम् रू. १–४–० ०–२–०

१४ कारिकावली सिद्धान्तमुक्तावलीसहिता—Karikavalee with Siddhanta-Muktavali and other notes न्यायवैशेषिकदर्शनयोर्व्युत्पित्सूनां कृते प्रणीतेषु प्रकरण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारिकावली मूल्यं मार्गव्ययः

...तु तत्र दीधि- ... सूक्ष्मतमानाम- ...वः ...न्ति नव्याश्छात्राः, ...माभिः प्रायः सर्वेषु विषमस्थले- ...कृता सरलां सुबोधां च टिप्पनीं पण्डित-जी- ...रामशास्त्रिभिः कारयित्वा तया सहेयं दृढतरेषु सु- चिक्कणेषु पत्रेषु स्थूलाक्षरैर्मुद्रिता। सार्धशताभ्यधिकपत्र- युतामपीमां सर्वसौलभ्यायाल्पीयसा मूल्येन वितरामः। मू. रू. ०-७-० ०-१-०

१५ वैशेषिकदर्शनम्— **Vaisheshika Darshana with several commentaries** श्रीशंकरमिश्रकृत—**वैशेषिकसूत्रोपस्कार**—जयनारायणतर्कपञ्चाननभट्टाचार्यप्रणीत—**विवृति**-चन्द्रकान्तभट्टाचार्यप्रणीत—**भाष्य**सहितम् । मू. रू. २-०-० ०-३-०

१६ वादार्थसंग्रहः—**Vadartha Samgraha (प्रथमो भागः)** अत्र शेषकृष्णकृतं स्फोटतत्त्वनिरूपणं, श्रीकृष्णमौनिकृता स्फोटचन्द्रिका, गोडवोलेकृतः प्रातिपदिकसंज्ञावादः, वाक्यवादः, हरियशोमिश्रकृता वाक्यदीपिकेति पञ्च ग्रन्थाः संकलिताः। पण्डितानां प्रौढच्छात्राणां च बहुतरमुपकारकः। मू. रू. ०-६-० ०-०-६

१७ वादार्थसंग्रहः (द्वितीयोभागः)—अत्र भवानन्दसिद्धान्तवागीशकृतं षट्कारकविवेचनम्, जयरामभट्टाचार्यकृतः कारकवादः समासवादश्च, एवकारवादश्चेति चत्वारो ग्रन्थाः सन्ति। मू. रू. ०-६-० ०-०-६

१८ महाभागवतम्—**Maha Bhagavata** देवीपुराणम्। अस्मिन् भगवत्या ब्रह्मस्वरूपिण्या महाकाल्या दाक्षायणी–गङ्गा–पार्वती–श्रीकृष्णेत्यवतारचतुष्टयचरितानि, महाकाल्या मूलस्थानं च प्रधानतयोपवर्णितानि। प्रसङ्गाद्रामचरितं स्कन्दचरितं पाण्डवचरितं गणेशोत्पत्तिर्गङ्गावतरणं भगवतीगीता ललितासहस्रनाम शिवसहस्रनामादयश्च विषया निरूपिताः। सार्धपञ्चसाहस्री संहितेयम् मू. रू.... ... ... २-०-० ०-३-०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१९ तैत्तिरीयोपनिषत् — T... Upanishat श्रीमच्छंकर... णानन्दगिरिकृतटीकायुतेन तैत्तिरीया... सहिता । मू. रू. ... ...

२० दशरूपकम्—Dasha Rupaka नाट्य शास्त्रं धनञ्जयविरचितमवलोकसहितं पञ्चनदीयपण्डित-सुदर्शनाचार्यप्रणीतप्रभाख्यव्याख्यासहितं च । मू. रू. १—०—० ०—२—

२१ ब्रह्मसूत्रवृत्तिः–Brahma Sutra Vritti अद्वैतमञ्जरी । भगवत्पाद(आद्यशंकराचार्य)शिष्य-कृता । मू. रू. ... ... ०—१२—० ०—२—०

२२ चन्द्रालोकः—Chandraloka with a commentary श्रीपीयूषवर्ष जयदेवकवि-विरचितोऽलंकारग्रन्थः । पायगुण्डोपाह्ववैद्यनाथ (बाळंभट्ट) विरचितरमाख्यव्याख्यासहितः मू. रू. ... ... ०—८—० ०—१—०

२३ महाभारतविराटपर्व--Mahabharata-Virata Parvan with eight commentaries नीलकण्ठकृतभारतभावदीप–अर्जुनमिश्रकृतदीपिका—चतुर्भुजमिश्रकृतप्रकाश—सर्वज्ञनारायणकृतभारतार्थप्रकाश–विमलबोधकृतदुर्घटार्थप्रकाशिनी–रामकृष्णकृतविरोधार्थभञ्जनी—विषमपदविवरण–वादिराजतीर्थविरचितलक्षाभरणेत्यष्टटीकोपेतं विपुलपाठभेदसहितं च । मू. रू. ... ... ३—८—० ०—६—०

२४ चन्द्रकान्त Chandrakanta(Hindi) (वेदान्त ज्ञानका मुखग्रन्थ) प्रथम भाग. यह वह ग्रन्थ है कि, जो नितान्त निर्भ्रान्त वेदान्त सिद्धान्तका एकांत प्रतिपादक **"चन्द्रकान्त"** मणि बम्बई प्रान्तके प्रसिद्ध साप्ताहिक **'गुजराती'** पत्रके मुख्य–आद्य संपादक गुजराती भाषाके सुविख्यात लेखक, अनेक ग्रन्थोंके निर्माता देशभक्तधुरीण, सारासारविवेकप्रवीण, वैश्यकुलभूषण श्रीमान् शेठ **इच्छाराम सूर्यराम** देसाईके शुद्ध हृदयमें दैदीप्यमान प्रबोधरत्न-भाण्डागारका चमचमाता हुआ एक अमूल्य रत्न है. किं. रू. ... ... २—८—० ०—४—०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Public Domain. Digitization by eGangotri.Funding: MIDF

कारिकावली

...तु तत्र दीघि... sha विचार- मूल्यं मार्गव्ययः
...सूक्ष्मतमान... गीने किया हुआ
...वः ...न्त ... ९. इसमें वेदान्तका ३९
...मांभिः प्रायः छीतरहसे सिद्ध किये गये है.
...ृता सरला सन्दे... सब जिज्ञासुलोकोंको ज्ञात होनेसे
...रामशास्त्रिभि... शप निरूपणकी कुछ जरूरत है नहीं. और जिज्ञा-
चिक्क... सुलोकोंको ये ग्रन्थ बहुत उपयुक्त है. पक्की जिल्द
और अच्छा कागज. १-०-० ०-२-०

१...

'गुजराती' मुद्रणालयाधिपतिः।

कोट सर्कल सासून बिल्डिंग–मुंबई.

१६

१७

...
चत्व...
१८ मह...
देवे...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

मार्गव्ययः

-० ०-२-०

ग-मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu